7. B °punar ácaryá ye de° C °r áryyá ye de°. — 8. C digharátram̃° BC °anyamanyam̃ sa°. — 9[1]. C °jam̃ paçyatu yathá mama |. — 9[2]. B çvaçru nam̃ áha ‖ C çvaçruram áha ‖. — 10[1]. C putri suve nam̃ darçanam̃ ca paçyehi | B °çuve nam̃ darçanam̃ detum paçyahi |. — 10[2]. B °kuçodrumo rájá kṛitvá rá° C °drumo rájása° BC °çayito |.

11. BC °chatram̃ dhá° B °rá pi atyá pi nai° C °tyá yi nai° BC °kasvake ása° C °vishṭo |. — 12. B °jam̃ paçyatvá° BC °sarvam̃ ca pari° shṭá chatradhá° B °manase prati° C °manase pravihṛitam̃ ‖. — 13. C °çvaçruram áha ‖. — 14. BC çobhaná rájá (C °já kuça) çobhaná (B °ná rájá) kumá° B °shá | chatradhá° C °shá chatradhá° BC °kahiyo e°. — 15[1]. BC °nyati ya°. — 15[2]. C °esha echatradhá° B yadi eshaḥ echatradhá° BC °bheya çva°.

16[1]. BC çvaçrume áha ‖. — 16[2]. BC °echatradhá°. — 17. C °çilavám̃ mahátmá esho çilavám̃ mahádha °yam̃ sarvam̃ sa°.

महावलो एषो शीलवां महाधनो एतस्यानुभावेन वयं सर्वे सुखिता ॥ सा दानि शयनगता राजानमाह ॥

न नूनं त्वं लभे अन्यं लोकस्मिं छत्रधारकं ।
यादृशो ते अयं देव अहिरीको अनोत्रपो ॥

राजा आह ॥

किन्नु रूपेण [262b] कल्याणि अपि चायं महावलो ।
महावलो ति कृत्वान एषो स्माकं हि रोचति ॥
किं नु रूपेण कल्याणि अपि चायं महाधनो ।
महाधनो ति कृत्वान एषो स्माकं हि रोचति ॥
किं नु रूपेण कल्याणि अपि चायं शूरो सिया ॥
स शूरो इति कृत्वान एषो स्माकं हि रोचति ॥
किं नु रूपेण कल्याणि अपि चायं सुशीलवान् ।
सुशीलवानिति कृत्वान एषो ऽस्माकं हि रोचति ॥
किं नु रूपेण कल्याणि अपि चायं महास्वरो ।
एतस्य अनुभावेन वयं सर्वे जीवामथ ॥
सुखमित्रो च मे सहायो प्रियो प्राणसमो च मे ।
एतस्य मे विनाभावे उभये पि न भवेमथ ॥

देवी दानि सर्वा च अन्तःपुरो पद्मसरः प्रेक्षितुं गता ॥ तत्र राजा प्रकृत्यैव पद्मसरमोतरित्वा आसति । देवी चोत्तीर्णमात्रा तेन गृहीता । देवी जानति द-

1. B °gatá ‖ rá°. — 3. B na nútam̃ alabhe° C °nam̃ alabhe° BC °chatradhá°. — 4. C °riko apatrayo | .

6. BC °balo ti kṛi°. — 7. BC ti kṛitvá esho°. — 8. C ki nú rû° BC °peṇa api° C °hádha ti kṛi° B °dhano kṛi°. — 9. B kṛitvána° C ti kṛitvánaisho 'smá° BC °smákam̃ ro°. — 10. C kim̃ nú rû° B °yam̃ suçuro ti çyaçuro kṛi° C °yam̃ suçûro kri°.

11. B çyaçûro kṛi° C kṛitvá çureti paçya naisho° BC °sho 'smákam ro°. — 12. C kim̃ nú rú° B °lyâṇi api° C °çîlaván iti kṛi° B °ván su°. — 13. B suçalavám̃n iti° C ti kṛitvá e° BC °kam̃ ro°. — 14. BC °svaro e°. — 15. BC etasyámubhá° C °vena veyam̃° BC °yam̃ jivá°.

16. B sukham̃ mitrá ca me° C sukham̃m ivá ca me° BC °háyá ca pri° B °ṇasamá ca me | C °ṇasamá ca re | . — 17. BC °bhávo n°. — 18[1]. B °ni sarvá ca° C °ni sarván̄ ca antaḥ padmasaro pre° BC °tum̃ etá | . — 18[2]. BC °pratikṛityo(C °tya) ca pa° B °dmasarom o° C °dmasaro ca otari°. — 19[1]. C devim ottîrṇṇamátá te° BC °hitá de°. — 19[2]. C devim̃ jánati | uda° BC °hitáni.

कराचसेन गृहीता ति ॥ अन्तःपुरिकाहि पुष्पवृष्टी पि मोचिता ॥ राजा आह ॥

अगमासि देवी उद्यानं वापिपद्मिनिप्रेचिका ।
न मे पद्मानि आनेसि न खु ते हं प्रिये प्रियो ॥

देवी आह ॥

अगमं देव उद्यानं वापियोदके स्नायितुं ।
पिशाचं अद्दर्शि तत्र मूर्छिता प्रपते भृशं ॥
यो च ते छत्त्रं धारेति यो च पद्मवने अभू ।
मन्ये एकिना स्त्रिया जाता तादृशमस्य लचणं ॥

देवी च अपरकालेन अन्तःपुरेण सार्धं आम्रवनं प्रेचिका निर्गता ॥ राजा प्रकृत्येव आम्रवनं गत्वा आम्रउद्याने स्थितः ॥ तत्र तेन देवी अण्वन्ती गृहीता ॥ देवी जानति वनराचसेन गृहीता ति । अन्तःपुरिकाहि पुष्पवृष्टि पि मोचिता ॥ राजा शयनगृहे देवीं आह ॥

अगमासि देवि आम्रवनं वर्धमानं निरीचिका ।
न मे आम्राणि आनेसि न खु ते हं प्रिये प्रियो ॥

देवी आह ॥

अगमं देव आम्रवनं वर्धमानं निरीचका ।
पिशाचं अद्दर्शि तत्र मूर्छिता प्रपते भृशं ॥

1. C °vṛishṭi hi mo° B °shṭi hi mo°. — 2. B °vá padmaniprekshiká | C °vá padmanim prekshitá | . — 3. C °ni ásanesi na khu te ham̃ priyo priye | . — 5. B ágamá devam̃ udyánam vá pi codaka snápitum̃ pi° C ágamo de° vápiyodaka snápitum̃ | .

6. C °cam̃ adarçi tatra° B °ddarçi | tatra°. — 7. C °echatra dhárayati° B °chatram̃ dhá ° bhú ma° C °bhút ‖ . — 8. C anye ekiná já° B °ekiná já° C °dṛiçam̃ asya°. — 9[1]. BC deviya(C °yo°) para ° C°pureṇa ámra ° kshitá ni°. — 9[2]. B °pratikṛitye cámravanam̃° C °pratikṛityevam̃ cámravanam̃° B °ámlaúttayena sthi° C °mraúttáyena sthi°. — 10[1]. B tatrá tam̃ de ° ṇvati gri° C °tra tám̃ devi aṇveti gri° BC °hítá tu sá°. — 10[2]. *Omis dans* BC.

11[1]. B sá antaḥ° C sántaḥ° BC °vṛishṭi hi mo°. — 11[2]. C ° já samayenagṛihe devim áha ‖ . — 13. C °si davim ámravanam̃ marddhamánam̃ nirikkáḥ tena ámráni áne° B °nirikshitukámena ámra° C °ham̃ priyo priye ‖ .

16. B agamá de° C agamo devi á ° rikshiká BC °ká pi°. — 17. C °cam̃ tatra addarçi mú° B °ddarçi ta°.

मन्ये एकिना स्त्रिया जाता यो तव छत्रं धारये ।
यो च पद्मवने आसि यो च आम्रवने प्रभू ॥

हस्तिशाला दानि आदीप्ता । राजा स्वयं कच्छं बन्धित्वा हस्तिनो मुंचति । असिना बन्धनानि छिन्दति पटलानि बाह्यतोमुखं क्षिपति ॥

नारायणसंघटनो राजा बलेन हस्तिनः ।
पाणिना गृह्य क्षिपति हस्तामोचिता दीप्तका ॥

अन्तःपुरिका राज्ञो वर्णं भाषन्ति । अहो राज्ञो पराक्रमो ति । अन्यतरापि कुब्जा राज्ञो वर्णं भाषति ।

सिंहासुपीडो बलवां शोभे सुविपुलो महां ।
खे चन्द्रो इव आभाति समन्तपरिमण्डलं ॥
चकोरताम्रनयनः कामदेवो व शोभति ।
हस्तिनो मोचये राजा क्षामोपितो नरर्षभः ॥

राजा आह ॥

भद्रिका खु अयं कुब्जा या राजानं प्रशंसति ।
[२63ᵃ] काशिकानि ते वस्त्राणि ददामि चतुरो अहं ॥
महेन्द्रकराजधीता राजानं दृष्ट्वा दुःखिता ।
अयं नाम मम भर्ता एवंरूपो ति (शोकिता) ॥

1. BC anye e° B °ná striyo já° C °ná striyo játáḥ yo tava cchatra dhá° B °cchatraṁ dhá° BC °raye yo ca°. — 2. B °ási | yo ca á ° ne abhúḥ | C °bhútaḥ ha°. — 3¹. BC °ptá rá°. — 3². C °stiná muṁ°. — 4. BC asiná baṁdhaná° C °cchidanti pa°. — 5. B °saṁghatano rá ° stinaḥ pá° C °saṁghaṭṭano ° stino pá°.

6. C °hya kshiyanti no mokshitáḥ ásiptakáto a° B °panti hastiná mokshitá | álittakáto a°. — 7¹. C °krameti. — 7². B °rájñá va° C °varṇṇa bhá°. — 9. BC siṁhásupíṭhá ha° C °çobhate vi° B °bhe vi ° háṁ mukhaṁ candro°. — 10. B mukhaṁ candro va á° C sukhaṁ candraiva ábháshati sa° B °laṁ cako°.

11. C cakolatá ° deva ca ço° B °deví ca ço°. — 12. C °kshato rá ° petá nararshabho ‖. — 14. BC °driká ca (B ° ká da) vayaṁ kubjá yo rá° C °prasaṁçati | B °ti káci°. — 15. C kauçikáni ca va°.

16. C °rájá dṛiçyanti duḥ°. — 17. BC ayaṁ mama bha° C °rtá caivaṁ rúpeti marddakará° B °po ti madra°.

मद्रकराजधीता आह ॥

न भाषन्तीये कुब्जाये जिह्वाये अस्ति छेदको ।
सुतीक्ष्णेन शस्त्रेण या राजानं प्रशंसति ॥

कुब्जा आह ॥

प्रतितर्जेन्ति राजानो बन्धेन च वधेन च ।
तस्मास्य वर्णं भाषामि रक्षं जीवितमात्मनो ॥

देवी आह ॥

न पश्यामि न द्रक्ष्यामि को अर्थो जीवितेन मे ।
अद्यैवाहं गमिष्यामि पुरा प्राणा जहन्ति मे ॥
सा दानि कुपिता देवी मद्रकराजस्य आत्मजा ।
कुब्जाद्वितीया यानेन स्वकं ज्ञातिकुलं गता ॥

मातापि पुत्रशोकेन तालयष्टीव भग्ना भूम्यां निपतिता ।

सा च सालस्य व यष्टि छिन्ना परशुना यथा ।
एवं मेदिनियं पति पुत्रशोकसमन्विता ॥

राजा भार्याशोकदुःखितो गन्तुकामः भार्यामन्वेषितुं माता दुःखिता राजानं कुशं गाथाये प्रत्यभाषति ॥

अहो मम मन्दभाग्याये अर्थो पर्याहृतो कुले ।
पंचशतयोजनातो महेन्द्रधीता इहागता ॥
शकुभया जनपदा नित्यं कम्बलप्रावृता ।
लूहभुक्ता लूहकर्मा कथं मार्गं गमिष्यसि ॥

1. C marddakarâ°. — 2. B °bhâsiyâye ku° C° shiyâye ku ° hvâye asiccha° B ko ti°. — 3. BC tîkshṇe° ṇa yo (C °ṇa ca yo ca) râjâ°. — 5. C °no bandhanena ca bandhanâ | .
6. BC tasyâsya varṇṇa bhâshâṇi(C °shyâmi) rakshe ji°. — 8. BC °çyâmi na tâ(C °na ca)kshyâ° B °ko rtho jîvitatena me | C °jîvitona me | . — 9. BC °prâṇâm̃ jaha°. — 10. BC °pitâ duhitâ madra° C °tmajâḥ ‖ .
11. C °tîyâ jâne° B °gato | . — 12. BC râjânam âmantrayati mâtâ° C °trasoke ° layashṭi ca bhagno ‖ abhû° B °layashṭhiva bhagnâ abhû°. — 13. C sâ ca çâlasya vâshṭi°. — 14. BC evam̃ ceta(B °ceya)siyam̃ vâli(C °li) pu° C °çoko sa°. — 15. C °jâ bhâryyâye sokaduḥ° B °çokeduḥ° BC °maḥ ‖ bhâ° C °ryyâm̃ anyeshi°.
17. C aho ma manda ° ye anartho paryâhṛitaḥ kalîm̃ | B °ryâkṛito kali | . — 18. BC °çatâjâtâ mahe° B °hâgataḥ | . — 19. C °kambaraprâ° B °vṛitâ lû°. — 20. B lûhabhaktâ divâ karmâ katham̃° C lûbakarmâ divâ karmâ katham̃°.

राजा आह ॥

नृत्यगीतवाद्यक्रीडाये चित्तमायाशतेन वा ।
विविधेहि उपायेहि वृत्तिं कल्पेयमात्मनो ॥

राजा भ्रातरं कुशद्रुमं राज्ये स्थापयित्वा अमात्यानि संदिशित्वा

मातरमभिवादयित्वा कृत्वान च प्रदक्षिणं ।
ततो वीणां गृहीत्वान प्राक्रमे उत्तरामुखः ॥

सो दानि मद्रकविषयस्य अन्यस्मिं ग्रामे वासोपगतो अन्यतराये वृद्धाये प्रतिश्रयं दिन्नं । तदहो च तत्र ग्रामे वीणावाद्येन आराधितो । तस्य प्रभूतं खाद्यभोज्यं दिन्नं महन्तं गोपिटकं खज्जकस्य महती च अलिन्दा भक्तस्य दधिघटकं च नानाप्रकाराणि च व्यंजनानि ॥ वृद्धाये एतदभूषि । एष असौ एकमाहारं कृत्वा शुवे गमिष्यति एतं च मम द्वैमासिकं भक्तं भविष्यति । कुशेनापि वृद्धाये आलापं आनयन्तेन तं खज्जकस्य गोपिटकं एकदुकाये सर्वं खादितं । सा च ओदनस्य महती अलिंदा यो अष्टानां वा नवानां वा तण्डुलओदनानां पाको सर्वं भुक्तं । तानि च व्यंजनानि तं दधिकलशं । वृद्धा निराशा ॥

अविधाविधं प्रविशिय अन्तको इह आगतो ।
पिशाचो मानुषरूपेण यो [263b] मामिच्छति खादितुं ॥

कुशो आह ॥

सर्वे वसन्ति ग्रामस्मिं ये च कायेन पापका ।
एकरात्रिं वसित्वान शुवे गंसामि अम्बिके ॥

2. B note vâdya° C nâṭe vâdya° BC °ḍaye cyutamâ(B °mâpa)gatena va | . — 3. B °lpetham â° C °lpeshyam âtmane | . — 4. B mâjaprâtaram̃ ku °taram avâdayitvâ kṛitvâ ca pra° C °taram avâditvâ ca pra°.

6. C tato dhiṇâm̃ grahetvâna° BC °na parâkra°. — 7. C °drakarâjâvishayasya anyaṭarasmim̃ grâ° gataḥ anyatarasmim̃ anyatarâye vṛiddhâye praviçayam̃°. — 8[1]. BC °dhito tasya°. — 8[2]. C °nnam̃ | mahântam̃ gopiṭakam̃ svajja° linḍâ bha° dhighaṭam̃ ca nâ° BC °janâni vṛi°. — 10[2]. C esho 'sau° BC °mishyati || etam̃° C °dvaumâ°.

11. C °dukârye sarvam̃°. — 12. C °hatim̃ alim̃ḍâm̃ ashṭâ° B °hatim alim̃dâ ye ashṭâ° odanânâm̃ pâ°. — 13. BC °çam̃ vṛi°. — 15. B °prativeçikâ anta° C °praviveçitâ || antako ihâgato pi iccha° B °ihâgato | .

16. B °yo mâm̃ itthañm icchati°. — 18. B sarve ca santi° C sarvo ca santi grâmesmim̃° B °smim̃ yecche kâ° BC °ye va pâ°. — 19. BC °vaçitvâ°.

सो दानि एकरात्रोषितो कन्यकुब्जं गतः मालाकारमल्लीनो तथा पूर्वे शिल्पिकजाती पश्चात् महानसं। राजापि आराधितो यावद्राज्ञो प्रियो ति कृत्वा अन्तःपुरिकाहि अन्तःपुरं प्रवेशीयति क्रीडापनको भविष्यति ॥ अन्तःपुरिका पि महेन्द्रकस्यापि धीतरो पृष्ठेन वहति। सुदर्शनापि तेन वाहियमानेन अमाता वारेति।

किं दानि अहं करोमि कस्य वा गरहाम्यहं।
उत्त्रासयति मान्दृष्ट्वा समुद्रे राक्षसो यथा ॥
किं दानि अहं करोमि कस्य वा गरहाम्यहं।
उत्त्रासयति मान्दृष्ट्वा मृगी भ्रान्ता व लुब्धकं ॥
अनूर्जको येनागतो रात्रिंदिवमनुव्रजन्।
गच्छ कुश स्वकं राज्यं नेच्छामि दुर्वर्णं अहं ॥

राजा आह ॥

अहं सुप्रियो ते स्वामि सुश्रोणि तनुमध्यमे।
तव कामेहि महन्तं राज्यं पि नाभिप्रार्थये ॥
नाहं गमिष्यामि सुसंवृतोरु
दिशां न जानामि यतो स्मि आगतो।
संमूढरूपो विचरामि लोके
मत्तो स्मि कामैः मृगमन्दलोचने ॥

देवी आह ॥

विक्षेपो तव चित्तस्य यं अनिच्छन्तिमिच्छसि।
अकामां राज कामेसि नैतत्पण्डितलक्षणं ॥

1. C °tropito kam̃nyakubjam̃ gato mâlâkâram̃ mûle alli° B °kâlam alli ° jâti | pa° C °çcata mahâ° BC °sam̃ râ°. — 2. BC °priyeti kṛi° C °tvâ antaḥpuri ° ḥpurikam̃ praveçiya kri° B °ḍâyanako°. — 3. BC °rikâhi pi mahe ° ro pṛishṭena vâha(C °haya)nti | . — 4. C °amâtâ vâ°. — 5. B °dânaham̃° C °dânyaham̃°.

6. C uttrasyam̃ti mâm̃ dṛishṭvâ° C °mudrarâ°. — 7. B °dânaham̃° C °dânyaham̃° BC °romi kasya kasya°. — 8. B uttrasishyasi mân dṛi° C uttrasyam̃ti ca mâm̃ dṛishṭvâ° BC °ntâ ca lu°. — 9. B anurjjako yo na hato° C anujjako na hato° B °divâ evam anuvrajanto | C °vrajet | . — 10. BC °kuça kuça sva ° mi duvarṇṇam aham̃ | .

11. B am̃gâraḥ râjâham̃ su° C agâro râjâham̃ su°. — 12. BC ham̃ sukri(C °kri)yate° C °te suçreṇi° B °me suçoṇi°. — 13. B °mehi samantato râjyam̃° C °mehi samantato jyam̃ vinâ pi pârthivo | B °rthayet | . — 14. B na gami sam̃hato ru° C °sam̃hato ca di° BC °nâmi | ya° C °to smim̃ âgato B °smin âgato sam̃mû°.

16. B °mûḍharûḍho yo vi° C °mûḍho yo ca vi° B °mi | lo° C °ke mahatto° BC °tto smim̃ kâmaiḥ(C °m̃air ) mṛiga° B °loca ‖ C °locanaiḥ ‖ . — 19. B °po bodhitâ ci ° C °po bodhicittesya yam anicchanti icchasi | B °nti icchasi | . — 20. BC akâmam̃ bhaja kâme°.

कुशो आह ॥

अकामां वा सकामां वा यो नरो लभते प्रियां ।
लाभं तत्र प्रशंसन्ति अलाभो तत्र पापको ॥

देवी आह ॥

प्रभोसि स्त्रीसहस्रं पि एकरात्रेण रामितुं ।
एकस्त्रियार्थे कामेन महद्दुःखं निगच्छसि ॥

राजा आह ॥

नेतं दुःखं प्रजानामि यशस्विनी वर्णलाभिनी ।
यं सुचीर्णं ब्रह्मचर्यंस्मिं त्वं मे भार्या भविष्यसि ॥

देवी आह ॥

धिगस्तु ते ब्रह्मचर्यं अघन्तो भोतु पापकं ।
सुनखीं वा शृगालीं वा परत्र कामयिष्यसि ॥

कुशो आह ॥

मा एवं अवच भद्रे सुश्रोणि तनुमध्यमे ।
श्रमणा पि हिमे साधु ब्रह्मचर्येण शोभते ॥
ते पि भद्रे सुचीर्णेन इह चीर्णेन शोभते ।
स्वर्गेषु उपपद्यन्ति त्रिदशे कामकामिनो ॥
तन्ते भद्रे अहं ब्रूमि सुश्रोणि तनुमध्यमे ।
न ते अन्यो पति अस्ति इति सिंहस्वरो कुशः ॥

देवी आह ॥

सचेद सत्यं वचनं नैमित्तानां भविष्यति ।
न ते भार्या भविष्यामि कामं छिन्दाहि खण्डशः ॥

2. BC akâmam̃ vâ sakâmam̃ v°. — 3. B °praveçanti°. — 5. C °sram̃ ti ekarâtre râmi°.
6. C °mahaduḥkham̃°. — 8. BC etam̃ duḥ ° jâpati(C °tiḥ) ya_° ṛṇavilobhinim̃(C °nim̃) | . — 9. B tuvam̃ suci° C tuvam̃ sutirṇṇam̃ bra°.
11. C adhigantu te bra°. — 12. C °khim̃ ca çrigâlâm̃ vâ pa ° marishyati ‖ . — 15. B °suçoṇi° C °suçreṇi° BC °me çra°.
16. C °dre sutirṇṇena i°. — 17. B °ntis trida°. — 18. B °ham̃ krumi suçoṇi° C °ham̃ kruhi suçreṇi°. — 19. B °te anyâ pa° C °kuço ‖ .
21. C sacaivam̃ satyavacanam̃ naimittino bha° B °nam̃ nemittena bha° BC °shyasi | .
22. B °shyâma kâ° C °shyâma cchandâhi ca akhaṇḍaçaḥ ‖ .

राजा आह ॥

नाहं छेत्तुं तवेच्छामि सुश्रोणि तनुमध्यमे ।
अच्छिन्ना येव त्वं भ[264a]द्रे मम भार्या भविष्यसि ॥
महान्तं च मम राज्यं बह्वश्वं बहुपौरुषं ।
अनन्तवस्त्रप्रदानं वस्त्राच्छादनभोजनं ॥
सो हं राज्यं च राष्ट्रं च छोरयित्वा इहागतः ।
तव कामेहि समन्तराज्यं न अभिप्रार्थये ॥

देवी आह ॥

पाषाणे खनसे कूपं कर्णिकारेण कर्णिकां ।
वातं जालेन बन्धेसि अनिच्छन्तीं यमिच्छसि ॥
अकान्तो किं कामयसि . . . . . . . . . ।
गच्छ कुश स्वकं राज्यं आत्मानं किं किलामसि ॥

राजा आह ॥

न एतं किलमर्थं मह्यं ब्रह्मचर्यं इदं मम ।
परत्र मे तुवं भार्या मह्यं भद्रे भविष्यसि ॥

देवी आह ॥

एतत्तव ब्रह्मचर्यं उपात्तं भोतु पापकं ।
सुनखीं वा शृगालीं वा गर्दभीं वाभिप्रार्थये ॥
राजपुत्रो शूरो वीरो युद्धस्मिं अप्रतिपुङ्गवो ।
कुशो ऽयमारूढप्रज्ञो इदं वचनमब्रवीत् ॥

2. BC °cchetum tave° C °suçreṇi° B °çroni tanu°. — 3. BC acchiññá ye ca te bha°. — 4. BC °jyaṁ ca bahvaçvabahupau°. — 5. C °bhasaṁpadáṁ ca bahvá°.

6. B °jyaṁ ca ráshṭhraṁ ca ccho° C °jyaṁ ca ráshṭaṁ ca ccho °gato ‖. — 7. C °samantehi rá° BC °jyaṁ nábhi°. — 9. C pákháne khanase kupaṁ° BC °káro ca ka°. — 10. C °anicchintiṁham icchati | B °nicchantima icchasi |.

11. C akránto krántam áyámi suçreṇi tanumadhyame ‖ B °nto káttamáyasi gaccha°. — 12. BC °rájyam átmá° B °naṁ kilámayi ‖ C °naṁ ca kiláyasi ‖. — 14. B °lámarthaṁ mahyaṁ° C °lámatha rájyaṁ bra° B °mama pa°. — 15. C °me torvo bháryá mahyaṁ tvaivaṁ bha° B °hyaṁ bhavi°.

17. C evaṁ te bra° B etan te bra° BC °ryaṁ apráptaṁ bho°. — 18. C °gáláṁ vá garddabhaṁ vábhi° BC °rthaye ‖ kuço áhā ‖. — 19. B °çúro yu° C °yuddhesmiṁ vádipuṁgavo | B °smiṁ puṅgavo ku°. — 20. BC kuço sarúḍha su(C °sa)prajño ida va°.

गच्छन्तो ते ऽहं भद्रे सुश्रोणि तनुमध्यमे ।
निगडेहि ते बन्धेयं किन्ते कुर्यु सजातयो ॥

देवी आह ॥

तमेव धर्ममपराध्य यन्ते उत्पादितं पुरा ।
तमेव धर्मं स्मरमाणो त्वं मे बन्धितुमिच्छसि ॥

राजा आह ॥

प्रभोमि ते ऽहं भद्रे बन्धयित्वा प्रजापती ।
येनिच्छकं प्रचारेतुं पिता ते किं करिष्यति ॥
प्रभोमि स्त्रीसहस्रं पि एकरात्रेण रामितुं ।
त्वमेव मे वरं भद्रे शुद्धदन्ति प्रजापति ॥

देवी आह ॥

जानामि ते महाराज बलवां त्वं नरर्षभ ।
दुर्वर्णो दुर्दृशो चासि दुःस्पर्शो च महीपति ॥
स्थूलोष्ठो स्थूलशिरो च स्थूलाङ्गो सि महोदरो ।
पश्यितुं त्वां न इच्छामि मा आत्मानं किलामये ॥

देवी आह ॥

एते उद्विद्धप्राकारा अट्टाट्टालककोष्ठका ।
यो वा वहति मार्गेहि एतं हि वारयन्ति ते ॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . .

एते शक्तीहि युध्यन्ति तोमरेहि शरेहि च ।
असीहि च सुतीक्ष्णेहि त्वां जमेयं प्रजापति ॥

1. C °suçreṇi °. — 2. BC °galehi B °nte kurya sajñātayo ‖ C °sajñātaye | . — 4. C °dharmaṁ parā° BC °parādhyāya yan te (C °ya yataṁ) u°. — 5. C taṁ dharmma sma° ṇo yaṁ evamadhitum i° B °yaṁ evaṁ dhikshatum icchati ‖ .

7. BC bhavāmi ° C °patiḥ | . — 8. BC yenicchikaṁ pravāretu pi°. — 9. BC prabho (B °bha)smiṁ strisahasresmiṁ e°. — 10. C tvam evaṁ me °danti pra° BC °jāpatiḥ ‖ .

12. BC °rshabhaḥ | . — 13. B duvarṇṇo durdṛço vāsi nisparço ma° C °si nisparço si ma° BC °patiḥ | . — 14. C sthuloshṭo sthulaçiro sthulāṅgo so ma° B °loshṭo sthūlaçiro sthūloṅgo se ma° C °daraḥ | . — 15. C °çyitu tvāṁ ° B °tuṁ tvā na°.

17. C °prākāre aṭṭatalakashoḍakā B °aṭṭaṭṭālakakho°. — 18. C yo vahanti nā° B °hanti nā° BC °ete yo vahane yute | . — 20. C ete çaktihi yu ° marehi ca çarehi ca | . — 21. C asihi ca su° BC °kshṇehi hatvā labhe° C °bheya prajā ‖ pa° BC °patiḥ rā°.

राजा दानि महेन्द्रको धीतरं परिभाषति ॥ किं त्वं तादृशं राजानं यस्य प्रतिराजानः त्रसन्ति तं छोडित्वा इहागता ॥ अयं चाहं सप्तहि राजानेहि उपरुद्धो तव कृतेन । एषो दानि ते एतेषां सप्तानां राज्ञां सप्त खण्डानि कृत्वा दास्यामीति ॥

सा दानि भीता राजधीता अश्रुकण्ठा रुदन्मुखी ।
वारिपूर्णेहि नेत्रेहि इदं वचनमब्रवीत् ॥
सचेत् मामम्ब घातेन्सुः क्षत्रिया दूरगामिनो ।
अस्थीनि मे समानेत्वा एकमन्ते दहापये ॥
एकमन्ते दहापेत्वा एलूकं मम कारये ।
एलूकं मे करित्वान कर्णिकारमारोपये ॥
ततो च पुष्पिते सन्ते वसन्तस्मिं हिमान्तके ।
ततो मे अम्बे स्मरेयासि एवंवर्णा ममात्मजा ॥
ततो च सो राजपुत्रो युद्धस्मि कोविदो कुशो ।
संरूढप्रज्ञानो अस्ति समादाय इति स्थिता ॥
इमां वन्धित्वान भागभागं करित्वान क्षत्रिया ।
संग्रामं च ददित्वान ततः क्षेमं भविष्यति ॥

1[1]. B °shatiṁ | . — 1[2]. C ° tirājāna trasanti ca taṁ cchoḍayitvā ihāgataḥ | B ° cchoḍitvā °. — 2. B °ddho kṛi° C °ddho tuvaṁ kṛi°. — 3. B °rājña sapta kha°. — 5. BC sā dāni bhītā rājā dā(C °jā tā)ni ete (B °ni rājā) parigharshayanto(B °ghaparyante) dṛidhā aṭṭālakhoṭakā(B °kā | ) kuṁjarehi va mantre(C °hi ramante)hi ete paçya prajāpati(C °tiḥ) | bhītā açruka(C °kaṁ)ṇṭhā rudanmukhī(B °khī | ) vāripūrṇṇehi netrehi idaṁ vacanam abravīt | asinā vā yathā çūrā(C °ro) yathā te kuṭṭaye ahaṁ | sacet(C °sarve) tuvaṁ na gacchesi kuça rājaniveçanaṁ | sarve ca rājāno trasanti(C °nti bhītā tatra) nararshabhoḥ(C °bhaḥ) | sace(B °cet) tuvaṁ ācare(C °reyaṁ) kumāraṁ priyadarçanaṁ | jātikulīnaṁ(C °maṁ) ksha[264b]triyaṁ parasenāpramarddakaṁ | kuçasya rūpaṁ prajñānaṁ(C °taṁ) gatāye yamaçāsanaṁ | tato sā rājadhi°.

7. B sacet saṁ amba ghātetsuḥ ksha° C sacet so adya ghātetsuḥ kshetriyo dū°. — 8. B °ni mānsam āne° C °ni hi samāne ° nte dadāpayet | . — 9. C °dadāpe° BC °tvā elukaṁ ° B °kālaye | . — 10. BC elukaṁ me ka ° rṇṇikārontaropayet | .

11. BC °shpitaṁ santaṁ va° C °vasantesmiṁ himāraye | B °himānaye | . — 12. C °smarayāsi evaṁvarṇṇa mamā°. — 13. B tato ca rāja° C tato sau ca rā ° tro yuddhesmiṁ ko° B °yuddhesmi°. — 14. B sarūpaprajñāno āsi ādāyam utthito || C sarūpaprajñānoṁ āsi samādāpaya iti sthita | . — 15. C imāṁ vaṁshito ca pushpitaṁ samantaṁ smiṁ himānaye | tato me ambe smarayāsi evaṁvarṇṇa mamātmajā | tato sau ca rājaputro yuddhesmiṁ kovido kuço | surupaprajñāno āsi samādāya iti sthitaḥ | imāṁ vaṁshitvā ca bhāgaṁ° B imaṁ ābadhitvā ca bhāga° C °triyā na dadi°.

16. BC na daditvana tataḥ kshe(C °tato ksha)maṁ bhavishyasi | .

ततः च (सा राजपुत्रं) क्षत्रियाणी यशस्विनी ।
वेपमानेहि गात्रेहि इदं वचनमब्रवीत् ॥
सत्यन्ते प्रतिजानामि राजपुत्र महाबल ।
यदि ते कोचिदपराधे आचरे व नराधिपः ॥

कुशो आह ॥

अहं पि ते प्रजानामि शुद्धदन्ति प्रजापति ।
यदि ते कदाचिद्भूयो पि आचरेयं इतो परं ॥
ततो प्रजापतीमाता अश्रुकण्ठी रुदन्मुखी ।
वारिपूर्णेहि नेत्रेहि इदं वचनमब्रवीत् ॥
को नु वेणो वा पाणो वा अथ वा पुनर्पुक्कसो ।
किस्य राजकुले जातो किं स्व कुर्वन्ततो मुखं ॥

सुदर्शना मातरमाह ॥

न एष वेणो न चण्डालो अथ न पुनः पुक्कसो ।
पुत्रो इक्ष्वाकुराजस्य तं त्वं दासो ति मन्यसि ॥
मयूरक्रौंचाभिरुतं वादित्रध्वनिनिषेवितं ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥
शंखपाण्डरसंकाशं नारीसंघनिषेवितं ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥
सुवर्णभाजनप्रत्युप्तं नारीसंघसमाकुलं ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥

1. C tato ca râjaputra kshatriyâṇi ya° B tataḥ ca kshatriyâni ya yaça°. — 2. BC vepa-(B°ya)mânihi gâ°. — 3. B saptan te° C satyaṁ te pra° B °balaḥ | . — 4. B yadi te kâcid a° C °te kâçcid aparâdhe âcire vâ na° B °âkâre vâ na°.

6. BC ° patiḥ | . — 7. C °bhûye pi â°. — 8. BC ° patimâ° C ° tâ ayaṁ râjaputra mahâbalaḥ | yadi te kâçcid aparâdhe idaṁ vacanam abravît | tato prajâpatimâtâ açru° B ° khî vâ°. — 10. B °veṇo tapâ° C °punaḥ pukkaso | B °kkase | .

11. BC kasya râ° B °jâto kasya kurvanano mu° C °jâto kasya pûrvamano mu°. — 13. B °lo arthe na punaḥ° C °tha na punar pukkaso | . — 14. C °sya na tvaṁ° B °tvaṁ daso°. — 15. B °câpiru°.

16. C katri° B °triyaç ca ku° C °sphiṭaṁ na tvaṁ° B °sphitaṁ na tvaṁ°. — 17. C °ni-sevitaṁ | . — 18. C kshetriyasya ku sphiṭaṁ na tvaṁ° B ° sphiṭaṁ ta tvaṁ°. — 19. C *omet les lignes 19-20 et 1-2 de la page suivante.*

षष्टिं नगरसहस्राणि स्फीतं राज्यमकण्टकं ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥
षष्टिं नागसहस्राणि सुवर्णालंकारभूषिता ।
सुवर्णच्छदमातंगा ईषादन्ता समुद्गताः ॥
आरूढा ग्रामणीयेहि खड्गतोमरपाणिभिः ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥
षष्टिं रथसहस्राणि सनन्दिघोषालंकृता ।
अयोसुबद्धनेमिका द्वीपिचर्मपरिच्छदा ॥
आरूढा ग्रामणीयेहि चापहस्तेहि वर्मिहि ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥
षष्टिं अश्वसहस्राणि आजानेया हयोत्तमाः ।
सुवर्णमे[265*]खलाधरा खलीनरतनामया ॥
आरूढा ग्रामणीयेहि कशाहस्तेहि वर्मिभिः ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥
विंश ब्राह्मणसहस्राणि राज्ञो भुंजन्ति नित्यकं ।
दिवा वा यदि वा रात्री सदा सत्कृतपूजिता ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥
कुमाराणां शता पंच उपेता मातृपितृतो ।
क्षत्रियस्य कुलं स्फीतं तं त्वं दासो ति मन्यसि ॥

राजा दानि शृणोति देवीये जामाता आगतो त्ति इहैव अन्तःपुरे ति ॥ सो दानि भीतो च यं वाहिरे रात्रेहि भयं भवेया इमं अभ्यन्तरे भयं जातं । कुशो किं करिष्यति ॥

1. B shashṭiṁ naga ° akaṇṭhakaṁ | . — 3. C shashṭhiṁ nâ° B shashṭiṁ nâ ° varṇṇaṁ-kâ° C °rṇṇâkâra°. — 4. C °rṇnacchandamâtaṅgâ i ° dgatâ | . — 5. B °grâmaṇiye° BC °khadgato° C °pâṇihi | .

6. C °sphîṭaṁ na tvaṁ° B °sphitan taṁ tvaṁ°. — 7. B shashṭiṁ ratha° C shashṭhi ratha °. — 8. BC suba ° C ° dvipidvipicarma°. — 9. B ° grâmaṇiye ° stehi carmihi° C °rmibhiḥ | . — 10. C kshetri ° laṁ sphiṭaṁ na tvaṁ° BC °nyati | .

11. C shashṭhim açva ° ttamo | . — 12. B °mekhalodha° C °mekharâdharo kha° BC °khalli ca ratanâ°. — 13. B °grâmaṇiye ° stehi carmibhiḥ | . — 14. B kshetri° C °sphîṭaṁ na tvaṁ° B °nyati | . — 15. C viṁçad brâhma° BC ° bhuñjati ni°.

16. BC °trau yadâ °. — 17. C °sphîṭaṁ na tvaṁ°. — 18. C °çatâṁ paṁ°. — 19. C °sphîṭaṁ na tvaṁ°. — 20[1]. C râjâ çri ° gato ti ihaivaṁ antaḥ° B °gato nti ‖ ihaivam antaḥ°. — 20[2]. C °bhito ca yo vâhi° B °bhito ca yo vâhirahitvâ johi bhayaṁ bhave° BC °veyâ ‖ i ° taṁ ku°.

21. C °shyasi.

किं त्वमुन्मत्तरूपा व विचिप्तचित्ता च भाषसि ।
कीदृशो सो कुशो कस्मादनुपश्यामथ वयं ॥

देवी आह ॥

एष देव अभ्यन्तरतो वेश्मअन्तरे तिष्ठति ।
आगच्छति राजपुत्रः अभिनिष्क्रम्य तिष्ठति ॥
तस्यासौ वचनं श्रुत्वा भीतो संविग्नमानसो ।
प्रियअनुमतेकांसो कृत्वा अंजलिं तिष्ठति ॥
त्वं चमाहि महाराज त्वं चमाहि नरर्षभ ।
न वयमेवं जानाम सिंहस्वर इहागतः ॥
त्वं चमाहि महाराज त्वं चमाहि नरर्षभ ।
न वयमेवं जानाम महास्वर इहागतो ॥
त्वं चमाहि महाराज त्वं चमाहि महारथ ।
न वयमेवं जानाम मंजुस्वर इहागतो ॥

राजा दानि पुनर्धीतरं परिभाषति ॥ एत्तको कालो मम जामातु आगतस्य न च त्वं मम निवेदेसि ॥ सो दानि तत्थयो शतपाकेहि सहस्रपाकेहि च तैलेहि अभ्यङ्गित्वा स्नापितो महारहेहि विलेपनेहि विलिप्तो महारहेहि आच्छादनेहि आच्छादितो आमुक्तमकुटो पंचाङ्गिकेन तूर्येणोपस्थिहीयति ॥ कुशो श्वशुरं आह ॥

यत्तका ते हस्ती अश्वा च सर्वेषां कर्णा पिधीयन्तु ।
मा मम सिंहनादेन स्वकं सैन्यं भविष्यति ॥
चिप्रं च अश्वा योजेथ सुवर्णउच्छ्रितध्वजां ।

1. C °tvam uttamarûpâ vi° B °rûpâ vâ kshi°. — 2. C °dṛiço râjâ ku° BC °kuço asmâ° C °paçya yathâ ‖. — 4. C esho devam abhyantarako ve° B ° devam abhya° BC °veçla antaratishṭhati |. — 5. C antaram tishṭhati | â° B agacchantiko râ° C °cchantiko râjaputro a° B °traḥ açi nishkra°.

7. BC priyam anu(C °yam ma)matam ekâm° C °kâmço kṛi ° shṭhato |. — 8. C tvam kshamâhi mâhârâ° B °rshabhaḥ |. — 9. BC °vayam jânâma mahârâja sim° C °gata |. — 10. BC tam ksha° C °ja tam ksha° BC °rshabhaḥ |.

11. B na vayamm eva jâ° C na vayam eva jâ°. — 12. BC tam ksha° C °ja tam ksha°. — 13. B °vayam eva jâ° C °vayamm eva jâ ° gataḥ ‖. — 14[a]. C °gatasâ tatra tvam° B °sya tatra tvam; C °vedayasi |. — 15. BC °bhyangi(C °ûge)tvâ snâ° C °pito mahârahehi lepanehi vili ° hehi âcchoditaḥ âmu ° sthihiyati ‖.

17. C °çvaçruram âha ‖. — 18. C yattakâs te asti açvâ° B °hasti açvâ° BC °sham madhusitthena karṇṇo pidhîyantu mâ°. — 19. C °nyam bhamjishyati |. — 20. BC °pram caraçva° C °yojyetha suvarṇṇam ucchri°.

अन्तेपुरातो निर्यासि राज्ञो महेन्द्रस्य पश्यतो ॥
सो सिंहनादं ननदे शूरो युद्धस्मिं ईश्वरो ।
सिंहनादं नदित्वान परिगृह्णाति क्षत्रिया ॥

ते दानि सप्त क्षत्रिया जीवग्राहं गृह्य श्वशुरस्य अल्लीपिता ॥ ते राजा आहन्सु: ॥ किं करोमीति ॥ कुशो आह ॥ पादेहि मम श्वशुरं अल्लीयथ वृद्धिं च करोथ ॥ ते दानि पादेहि च महेन्द्रकस्य राज्ञो अभिगता जयवृद्धि च से कृता ॥ मद्रकराजा आह ॥ किं करोमि त्ति ॥ कुशो आह ॥ करिष्यसि [265b] मम वचनं ॥ श्वशुरो आह ॥ करिष्यन्ति ॥ अस्ति ते धीतरो सुवर्णसहस्रमण्डिताः कृत्वा एकमेकस्य राज्ञो एकमेकां धीतरं देहि जामातरो भोन्तु । सुखं अनुद्विग्नं वसिष्यसीति ॥ राज्ञा महेन्द्रकेन तेषां क्षत्रियाणां सर्वेषामेकमेका सुवर्णसहस्रप्रतिमण्डिता धीता दिन्ना सुवर्णसन्धीव पुत्रपौत्रा ॥ ते दानि स्वकानि राज्यानि विसर्जिता ॥

गतेषु सप्तराजानेषु श्वशुरं कुशो आमन्त्रयति ॥ अहमपि गमिष्यामीति ॥ मद्रकराजा आह ॥ पुत्रि सुदर्शने त्वं एवं पराक्रमयुक्तं राजानं शूरं दीर्घदर्शिनं इक्ष्वाकुपुत्रं महाबलं महाकुलीनं अरहसि प्रेम्णेन च गौरवेन च उपस्थिहितुं । यं नूनाहं सपरिवारो सर्वो च अधिष्ठानो संशयातो मोचितो ॥ साधूति धीता पितुः वचनमश्रोषीत् ॥ राजा दानि महेन्द्रको महता सत्कारेण प्रभूतं रत्नदानं दत्वा जामातुकस्य सुदर्शनाये च चतुरंगबलकायं संनाहयित्वा विसर्जिता ॥

सो दानि यथेच्छिते जनपदे आवासितो । तत्र पद्मसरे स्नानाय ओकस्तो ॥

1. C antaḥpu ° ndrakasya° B °ndraka pa° BC °paçyato | . — 2. B °nâda nanade° C °nâde nanade çûro yuddhesmiṁ içva°. — 3. B °daṁ nadatvâ° C °daṁ nâdetvâna pratigri° BC °grihnati ksha°. — 4[1]. BC °pta kshetri° B °grâmaṁ gri° C °grâhe gribya çvaçrura° B °çvasrura°. — 4[2]. C °hatsuḥ | . — 5[1]. B °romi ti | . — 5[2]. B °çvasruraṁ° C °çvaçruraṁ°.

6. C °dehi mahe° B °gato | jayavuddhi ca so kṛitâ ‖ C °gato jayaṁvuddhi ca so kṛito | . — 7[1]. C °râjaç ca âha ‖ . — 7[2]. BC °minti ‖ . — 8[1]. B çvasruro° C çvaçruro°. — 8[2]. C °kâṁ dhitarâṁ dehi jâmâtare bho°. — 9. BC °anuvignaṁ° C °vaçishyati iti | B °shyatiti ‖ . — 10. C râjño mahe° BC °teshân te ksha° C °ṇḍitâṁ kṛitvâ ekamekasya râjño dhitaraṁ dinnâ | su° BC °pautraṁ ‖ .

11. C °jyâṇi vi° BC °rjjitâni. — 13[1]. C °râjeshu sapta râjâneshu°. — 13[2]. C °gamishyâmiti ‖ . — 14. B °rçane te evaṁ pa° C °rçane taivaṁ pa ° jânaṁ ikshvâ ° linaṁ aharase premnena ca gaureṇa ca u°. — 15. B °haṁ ahañ ca sapari° BC °ro salvâ ca adhi°.

16. C sâdhu ti pituḥ° C °vacanaṁ ma°. — 17. BC °bhûtaṁ ratnaṁ(C °tanaṁ) dânaṁ datvâ jâ° B °rçanâye ca ‖ calu°. — 19[1]. BC °yathecchito ja°.

तत्र स्नापयन्तेन आत्मनो प्रतिविम्बं दृष्टः । स तं दुर्वर्णं दुर्दृशं आत्मनो प्रतिविम्बं दृष्ट्वा दुर्मनो आसि । तेन हि मे महेन्द्रकराजधीता परिभवति । आत्मानं उपक्रमिष्यामि ॥ सो दानि शक्रेण देवेन्द्रेण समन्वाहृतो ॥ अयं कुशो बोधिसत्वो दुर्वर्णताये आत्मानमुपक्रमितुकामः तेन तस्य ज्योतीरसएकावलिका मणिरत्नं दिन्नं । इममावन्धाहि ततः ते रूपेण सर्वजम्बुद्वीपे समसमो न भविष्यति । यत्र काले पौराणिकं रूपं अभिकांक्षसि तदेतं मणिं पाणिना पिधिययासि ॥ सो दानि तेन मणिरत्नेन आवद्धेन राजकुलं प्रविशति दिव्येन रूपेण प्रतिहाररक्षेण च वारि मा प्रविशाहीति ॥ सो दानि आह ॥ अहं कुशो ति ॥ प्रतिहाररक्षो आह ॥ भद्रं कुशो राजा एदृशो रूपेण भवेया ति ॥ राज्ञा कुशेन तं मणिरत्नकं हस्तेनापिहितं । तस्य यथापौराणं वर्णरूपं संवृत्तं ॥ प्रतिहाररक्षो दृष्ट्वा मूर्धेन प्रणिपतितो ॥ सो दानि प्रविष्टो देवीय मूले ॥ देवी आह ॥ मा राजकुलं अवमर्दाहीति । किस्य त्वं राजकुलं प्रविष्टो ॥ सो आह ॥ अहं कुशो ॥ देवी आह ॥ कुशो राजा [266a] एदृशेन रूपेण भवेया ॥ राज्ञा तं मणिं हस्तेन अपिहितं । सो दानि यथापौराणो संवृत्तो ॥ देवी आह ॥ अतो मणितो हस्तमपनेहि ॥ राज्ञा मणितो हस्तो अपनीतो दिव्यं चास्य पुनः रूपं संवृत्तं ॥ आत्मानमेव उपसंक्रमितुकामो । ततो मे इमं ज्योतीरसं नाम मणिरत्नं शक्रेण दिन्नं ॥ कुशो राजा आगच्छतीति श्रुत्वा एकूना पंच कुमारशतानि अमात्या च भटबलाग्रं च सर्वे प्रत्युद्गता । पश्यन्ति कुशं राजं हस्तिस्कंधवरगतं दिव्येन रूपेण आदित्यमिव प्रतपन्तं चतुरंगेन बलकायेन संपरिवृतं आगच्छन्तं । ते दानि न प्रत्यभिजानन्ति ।

1[1]. C °ntena âvâsito âtma ° mbaṁ dṛishṭvâ so taṁ°. — 1[2]. C so taṁ duvaṇṇadṛiçaṁ° BC °shṭvâ dutmano° B °âsi te°. — 2[1]. B °bhavanti | . — 2[2]. BC âtmanaṁ°. — 3[1]. B °samaññvâ° B °hṛitaḥ. — 3[2]. B °duvarṇṇa° C °rvarṇṇo durdṛiço tâye â ° sya jyotirasa°. — 5[1]. BC imaṁ âba° C ° hi | tato te rûpeṇa sarvaṁ ja ° samasamâ no bha° B ° jambûdvipe samasamâ bha°. — 5[2]. C yaṁ kâlaṁ paurâṇakaṁ rû° B ° kâlaṁ pau° BC °kshasi | tad etaṁ maṇi pâ ° B ° pithiye° C °pihiye°.

6. B °ni te maṇi° BC °çati | di° B °pena prati° C °ksheṇa dhâri mâṁ pravi° B °ksheṇa ca dhâri mâ pravisihiti ‖ . — 8[1]. BC ° ti pra °. — 8[2]. B ° tiâraraksho °. — 9[1]. BC bhadre ku° B ° dṛiçâ rû° C °rûpeṇâ na bha°. — 9[2]. C °steṇa âhitaṁ | . — 10[2]. B °na prapatito |.

11[2]. C °ha | ato maṇito hastam apanehi râjâ maṇihasto | mâ râ°. — 12[2]. BC ° kuço râjâ. — 13[1]. BC râjâ(C °jo) edṛi° B °ṇa ca bha°. — 13[2]. B râjâ taṁ maṇi ha° C râjânaṁ maṇiratnaṁ na âpi° B ° apyihitaṁ | . — 14[1]. BC sâ dâ° C °râṇaṁ saṁ°. — 14[2]. B ato maṇito ha° C ato maṇito divyaṁ°. — 15[1]. B râjâ maṇito ha°. — 15[2]. B âtmânaṁ me u ° C âtmânam evaṁ u ° kâmaḥ.

16[1]. B tataḥ so imaṁ ° C °jyotirasaṁ°. — 16[2]. C ° gacchantiti çru ° kûnapañcaçatâ kumârâmâtyo bhattabalâgraṁ sarvaṁ pra° B °tyutagatâ pa°. — 18. BC °nti | ku° C °stindhavara ° tyam iva prapatantaṁ | catu° B °tapantaṁ | catu° C °barakâ°. — 19. B °nti te°.

तेन दानि राज्ञा मणि हस्तेन पिहितो यथापौराणं च रूपं संवृत्तं ततः च सर्वे प्रणिपतिता ॥ एवं महता समुदयेन कुशो राजा देवीये सुदर्शनाय सार्धमन्तःपुरं प्रविष्टो ॥

एवं पुण्यवतो अर्था सर्वे भोन्ति प्रदक्षिणाः ।
यथा नाम कुशो भार्याय ज्ञातीहि च समागतो ॥
पूर्वेनिवासं भगवान्पूर्वेजातिमनुस्मरन् ।
जातकमिदमाख्यासि शास्ता भिक्षूणमन्तिके ॥
ते च स्कन्धा ते धातवः तानि आयतनानि च ।
आत्मनो र्थं च भगवानेतमर्थं वियाकरे ॥
अनवराग्रस्मिं संसारे यत्र मे उषितं पुरा ।
कुशो अहं तदा आसि सुदर्शना यशोधरा ॥
माया माता तदा आसि महानामो महेन्द्रको ।
मारो अन्यतरो राजा एवं धारेथ जातकं ॥
एवमिदमपरिमितं बहुदुःखं
उच्चनीचचरितं पुराणं ।
विगतज्वरो विगतभयो अशोको
स्वजातकं भाषति भिक्षुसंघमध्ये ॥

भिक्षू भगवन्तमाहन्सुः ॥ कस्य भगवन् कर्मस्य विपाकेन कुशो राजा दुर्वर्णो दुर्दर्शो प्रतिकूलदर्शनो अभूषि ॥ भगवानाह ॥

भूतपूर्वं भिक्षवः अतीतमध्वानं नगरे कम्पिल्ले पंचालजनपदे दुवे जायपतिका तरुणाभिरूपा परस्परानुरक्ता भवेन्सुः । ताये इस्त्रिये सादृशं तत्र गृहं निःशक्यकं

1. C te dâni râjñâm maṇihastena âpihi ° râṇâm ca rû° B °rûpa saṁ° B °ttaṁ | ta° C °ttaṁ | tato ca te sa° titâḥ | . — 2. B °jâ deye su°. — 5. BC °thâ na me kuço bharttâ jñâ° C °gatâ | .

6. C °nivâsa bhagavâṁ pûrvejâ°. — 7. BC °bhikshusa(C °kshuṇa)mantike | . — 8. C °ndhâs te ca dhâtavaḥ tânyâya° B °tânyâyanatanâ°. — 9. B âtmârthaṁ bha° C âtmânarthaṁ ca bha° rthaṁ ca vyâkare ‖ B °rthaṁ vyâkaro | . — 10. C °varâgresmiṁ°.

11. B kuço haṁ° C ° âsit | su°. — 12. C °tadâ âsit çuddhodana ikshvâku ca | mahendrako çâkya gopârah mâro sapta râjikâḥ | evam idaṁ aparimitaṁ evaṁ dhâ° B °nâma mahe°. — 14. C °duḥkhitaṁ u° BC °nîyacari° B °ṇaṁ vi°.

16. C vigatabhayo vigatajvaro a° B °açokaṁ sva°. — 18[1]. C bhikshur bhaga° hatsuḥ ‖ . — 18[2]. C °jâ duvarṇṇo durdri° tikulo da° bhûmi ‖ . — 20. C °kshavo a° dhvâne nagaraṁ kaṁpilye paṁcâraja° B °re kaṁpille° C °tikâs taru° B °ṇâhirâ° C °sparâgânu° BC °vetsuḥ ‖ .

21. C tâye indriye sâ° B °striye sodri° tra griha niḥçâyakaṁ° C °grihâṇi niḥçâpakaṁ° BC °kaṁ tâdriçaṁ siddhaṁ ‖ .

सिद्धं ॥ बुद्धानामनुत्पादे प्रत्येकबुद्धा लोके उत्पद्यन्ति तूष्णीकशोभना खड्गविषाणकल्पा । एकमात्मानं दमेन्ति शमेन्ति परिनिर्वायन्ति ॥ ताये स्त्रियाये तदाहारं सिद्धं ॥ प्रत्येकबुद्धो च तं गृहं प्रविष्टो पिण्डाय तरुणाभिरूपो प्रासादिकेन ईर्यापथेन ॥ प्रासादिकाभिप्रसन्ना देवमनुष्याः ॥ तस्या स्त्रियाये प्रत्येकबुद्धं दृ-[266b]ष्ट्वा प्रसादमुत्पन्नं । ताये तस्य प्रत्येकबुद्धस्य पिण्डपात्रो च दिन्नो ॥ सो चास्या कुटुम्बिको प्रविष्टो पश्यति तं च प्रत्येकबुद्धं गृहे भार्यां च ॥ तस्य दानि शंका उत्पन्ना । तरुणो यं प्रव्रजितो मा हैव मे कलत्रा ओलोकिता भविष्यति ॥ सो ताये भार्याये परुषवाचाये आह ॥ भुक्तपूर्वो ते एषो यथा त्वमेतस्य भोजनं देसि ॥ सा आह ॥ शान्तं पापं प्रव्रजितो एषो महाभागः अपूर्वो एषो अद्य गृहं प्रविष्टः प्रसादेन मे एतस्य भिक्षा दिन्ना ॥ ततो सो प्रत्येकबुद्धो तस्य पुरुषस्य अकुशलं चित्तोत्पादं ज्ञात्वा अनुग्रहार्थं ततो येव गृहातो हंसराजा विय वैहायसं क्रान्तो ॥ तस्य दानि पुरुषस्य तं प्रत्येकबुद्धं वैहायसगतं दृष्ट्वा प्रसादमुत्पन्नं महाभागो अयं ऋषि इति ॥ तेन सा भार्यां अनुक्षमापिता प्रणिधानं च उत्पादितं । अन्ये पि मे जाति त्वं भार्या भवेसीति अन्यराष्ट्रं पि गता नान्यस्य वशे वर्तेसि नान्यस्य मम येव त्ति ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन कंपिल्ले नगरे पुरुषो अभूषि येन भार्याये ईर्ष्याप्रकृतेन दुष्टचित्तेन प्रत्येकबुद्धो अभ्याचिक्षितो । कुशो राजा तेन कालेन तेन समयेन कंपिल्लनगरे सो पुरुषो अभूषि ॥ अन्या सा भार्यां अभूषि । सा सुदर्शना महेन्द्रनाथधीता ॥ तस्य भिक्षवः कर्मणो विपाकेन कुशो राजा विरूपो अभूषि ॥

कुशजातकं समाप्तं ॥

1. BC °tpâdâ pra(C °dân pra)tye° C °buddho lo° dyati tûshṇîshaço° B °nti tushṇî°. — 2[1]. B °tmânan dameñti ça° C °damenti pari°. — 2[2]. BC °yâye tañ cahâ°. — 3. C °ṇḍâyas taruṇâ° B °kena iryyâ° BC °thena prâ°. — 4[1]. B °kâbhiḥ pra°. — 4[2]. BC °shṭvâ prâsâ°nnañ tâ°. — 5[1]. C tâye tatpratye° tro ca dinnâ |. — 5[2]. BC °câsya ku° C °viçishṭaḥ | paçya° B °ti | tañ ca° C °bhâryyârtha ca.

6. C °çañktâ u° BC °nnâ ta°. — 7. C °haivañ me ka°. — 8[1]. BC °purushâye abhu°. — 8[2]. BC bhuktapûrvâ ye(C °rvâ te) ete esho(C °shâñ) yathâ° C °demi ‖. — 9[2]. C °jito esho bhâgo apû° vishṭo prasâ° B °shṭaḥ praçâde°. — 10. B °rthañ | tato ye gṛi° C °rthañ | tato gṛi°.

12. C °tyekañbu° hâyasañ gatañ°. — 13. BC tena so bhâ°. — 14. B °râshṭhrañ pi ga° C °shṭrañ pitâ ga° sya vaçavartte° BC °rtteti | nânyasya(B °nyatra) mama ye ca (C °mama eva) nti ‖.

16[2]. BC °vo asmâkam e° C °lena kâlena tena sa° rushâ abhû° BC °shi | yena bhâ° B °ryâye irshyâ° BC °bhyârikshito ‖. — 18. C °kañpille naga°. — 19[1]. B anyâ so bhâ°. — 19[2]. C °kshavo karma°. — 21. C iti çrîmahâvastuavadâne kuça°.

भिक्षू भगवन्तमाहन्सुः ॥ कथं भगवं मारो पापीमां भगवतो दुष्करं चरन्तस्य पृष्ठिमेन पृष्ठिमं समनुबद्धो अवतारार्थी अवतारं गवेषी अलभमानो निर्विद्य प्रत्यवक्रान्तो ॥ भगवानाह ॥ अन्यदापि मम एषो पृष्ठिमेन पृष्ठिमं समनुबद्धो अवतारार्थी अवतारं गवेषी अलभन्तो अवतारं निर्विद्य प्रत्यवक्रान्तो ॥ भिक्षू भगवन्तमाहन्सु ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥ भूतपूर्वं भिक्षवः अतीतमध्वानं ऋषभो गवांपतिः गोगणसमनुबद्धो ॥ तस्य दानि वृषभस्य वृषणा लंबा शिथिला च सो वृषभो लंबितेहि वृषणेहि गोगणस्य पृष्ठिमेन पृष्ठिमं अण्वति ॥ तहिं च अरण्यायतने गिरिको [267ª] नाम शृगालः प्रतिवसति ॥ तेन सो वृषभो दृष्टो गोगणेन सार्धं अण्वन्तो लम्बेहि वृषणेहि ॥ सो तस्य पृष्ठिमेन पृष्ठिमं बहूनि वर्षाणि समनुबद्धो ॥ तस्य अपरो शृगालो वयस्यो । तेन सो गिरिको दृष्टो तस्य वृषभस्य पृष्ठिमेन पृष्ठिमं समनुबद्धो दृष्ट्वा च पुनस्तं गिरिकं गाथाये अध्यभाषति ॥

कति वर्षाणि गिरिक अनुबद्धो सि गवांपतिं ।
मुहुर्मुहुश्च त्रससि भीतभीतं च पश्यसि ॥
इमे स्थूला च लम्बा च सुनिबद्धा शिथिला चिमे ।
इमा न पि पतिष्यन्ति ततो ऽभक्षो भविष्यसि ॥
मयापि समनुबद्धो दश वर्षाणि पंच च ।
शिथिला व सुबद्धा च नास्ति सानं पततां भयं ॥

1[1]. B bhikshu bha° C bhikshur bhaga ° hatsuḥ ‖ . — 1[2]. C bhagavan máro° BC °sya pṛishṭimena pṛishṭimaṁ° B °baddho | ava° C °baddhaḥ avatárárthi avatáraṁ gaveshi | B °shi ‖ ala°. — 3[2]. C enya° BC °sho pṛishṭimena pṛishṭimaṁ sa ° ddho | avatárárthi(C °rthi) avatáraṁ gaveshi | ala°. — 4. C bhikshur bhaga ° hatsuḥ | B °nsu kadá°. — 5[1]. B kadápi° C °gaván ‖ . — 5[2]. BC °vo bhú°.

6[1]. C °kshavo 'ti° B °vaḥ tita° C °naṁm ṛishabha bhogaváṁ° B °goganaṁ sama°. — 6[2]. C ° ni vṛishatasya° so vṛishá laṁvṛitehi vṛishaṇe° B °so vṛisho laṁbitehi vṛishaṇe °sya pṛishṭimena pṛishṭimaṁ° C °ṇasya pṛishṭimaṁ açvati | . — 8. C °ariçyáya ° riko ma çṛi°. — 9[1]. B °rdhaṁ aṇvati laṁbehi ° C °ṇvati laṁcakehi vṛi°. — 9[2]. BC °sya pṛishṭimena(C °ṇa) pṛishṭimaṁ bahú(C °hu)ni°. — 10. C °ro mṛigarájasya te° B °gálá vayasyo te°.

11. BC °bhasya pṛishṭimena pṛishṭimaṁ°. — 13. C °pati. — 14. C muhumuhu citraçaçiṁ bhita° B °rmuhuç cit tasasi bhita°. — 15. B imáṁ sthúlá ca lambá su° C imáṁ sthuláṁ ca raváṁ su° BC °baddho çithilá ca me | .

16. C imáṁ na pi patatishyanti tato bha° B °nti | tataḥ bha° C °shyati ‖ . — 18. C °sti çanaṁ tato bhashaṁ ‖ B °patato bhayaṁ ‖ .

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन वृषभो अभूत् । सो हं वृषभो ऽभूषी ॥ यः गिरिको नाम शृगालो ऽयमेव मारो अभूषि ॥ तदापि अवतारार्थी अवतारमलभन्तो निर्विद्यापक्रान्तः ॥

समाप्तं वृषभजातकं ॥

भिक्षू भगवन्तमाहन्सुः ॥ कथं भगवन्मारो पापीमां न शक्नोति भगवतो वतारमधिगन्तुं ॥ भगवानाह ॥ न भिक्षवो एतर्हिं एव मारो पापीमां न शक्नोति ममावतारं अधिगन्तुं । अन्यदापि एषो मम न शक्नोति अवतारमधिगन्तुं ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥ भूतपूर्वं भिक्षवो अतीतमध्वानं अनुहिमवन्ते प्रत्युद्देशे वानरो महान्तं वानरयूथं परिहरति । तहिं च अनुहिमवन्तप्रत्युद्देशे महन्तो उदकह्रदो यत्र वानरयूथं अभीक्ष्णं पानीयं पायको ओतरति । तत्र च उदकह्रदे उदकराक्षसो प्रतिवसति ॥ यो तत्रोदकह्रदे ओतरति पानीयपायो मृगो वा पक्षी वा वानरो वा मनुष्यो वा तं तत्रोदकराक्षसो ओकड्ढति ॥ सो पि वानरयूथो तमुदह्रदं पानीयपायो ओतरति ॥ सो दकराक्षसो दकगतो तानि वानराणि निध्यायित्वा अदृष्टो तेहि वानरेहि ततो वानरमेकमाकड्ढति ॥ एवं सो दकराक्षसो पुनपुनः यं वेलं ते वानरा उदकपाया ओकस्ता भवन्ति ततो निध्यायित्वा अदृष्टो ओकड्ढति ॥ सो दानि वानराधिपतिः यानि वानराणि तत्रोदकह्रदे ओकड्ढितानि तानि न पश्यति । तस्यैवं भवति । कहिं ते वानराणि मा अन्यहिं गता भवेन्सु ति । समन्ततोलोकेति न च पश्यति ॥ सो पण्डितो यूथपतिः तेषां [२६७b] वानराणां [उदकह्रदमोतरन्तानां]

1[2]. C °lu bhikshavaḥ yu° B °shmâkam evânyaḥ°. — 2[1]. C °bho abhûshi yo gi°. — 2[2]. C yo gi ° gâro ayam evaṁ mâ°. — 3. C tadâpyavatârârthi avatâra ° dyâprakrânto ‖ . — 4. C iti çrîmahâvastuavadâne vṛishabhajâtakaṁ samâptaṁ ‖ o ‖ . — 5[1]. C bhikshur bhaga ° hatsu ‖ B °nsuḥ ka°. — 5[2]. C °thaṁ bhagavân mâ ° gato vatâ°.

6[1]. B °âha ‖ anya° (8[2]). — 6[2]. C °rhi evaṁ mâro pâ ° târo dhi°. — 7[2]. C bhikshu âhaṁsuḥ | . — 8[2]. C °pi bhavagânâ°. — 8[3]. BC °vo bhû°. — 8[4]. C °dhvâne anu° B °dhvânam anu° C °tyudeçe° B °ddeçena vânaro° C °ro mahâ | ntaṁ yuthaṁ vânarayû° B °haranti | . — 10. BC tahiṁ ca hi° C °tyupadeçe mahânto u ° hruda tatra vâ ° yûtham abhi ° yaṁ pâyo otarati | B °rati | so daka°.

11[1]. B *remplace par :* so dakarâkshaso dakagato nâni vânarâṇi nidhyâyitvâ adṛishṭo tehi vânarehi | tato vânaram ekadṛiço kaṭṭati | . — 11[2]. C so tatro° B tatra ca uda° C °nîyapâyaḥ mṛi ° shyo vâ taḥ uda° B °shyo vâ tatoda° BC °okaṭṭati | . — 13. C °nîyaṁ pâyo°. — 14. *Omis par* B. C °rehi | tato ° m ekasâkaṭṭatiṁ | . — 15. C ° kshaso punarpunaḥ° BC °pâyo okastâ bhavanti | tataḥ(C °to) ni ° kaṭṭati | .

16. BC °ṇi tatodakahrade okaṭṭitâ(B °tâni tâ)ni na pa°. — 17. BC °ti ka°. — 18[1]. C °râni mâ a° BC °anyehi ga° B °vetsu ti sa° C °vetsuḥ sa°. — 19. C °ṇḍito yuthu

येन देशेन तं उदकह्रदं पानीयपाया ओतरन्ति तत्र ओतरन्तानां उत्तरन्तानां पादानि प्रत्यवेक्षति ओतरन्तानां वर्धन्ति उत्तरन्तानां परिहीयन्ति । तस्य बुद्धिरुत्पन्ना । अत्र एते ओकड्डियन्ति दकराक्षसेन ततो न पश्यामि एतेषां । अलं मुखेन स्वयमुदकं पिबितुं ॥ यं च तेन दृष्टा ओकड्डियन्ता तत्रोदके दकराक्षसेन वानरा आगत्ता ॥ गच्छथ अतो नलवनातो नलप्रान्तानि गृह्णथ येनोदकं पास्यथ । ततः दकराक्षसो न शक्ष्यति अवकड्ढितुं ॥ तेहि गच्छिय नलवनातो स्वकस्वका नलप्रान्ता गृहीता दीर्घदीर्घा यथा दूरतो स्थितका उदकं पिबमाना च न दकराक्षसः ओकड्डेया ति ॥ यं वेलं उदकपाया गच्छन्ति ततो स्वकस्वकानि नलान्यादाय ओतरन्ति ततः दूरतो भोन्ता तेन नलेन उदकं पिबन्ति । न शक्नोति दकराक्षसो भूयो वानरमोकड्ढितुं ॥

ओतरन्तस्य दृश्यन्ति पादानि उत्तरंतस्य न ।
नलेन पानं पातव्यं नास्ति जागरतो भयं ॥

भगवानाह ॥ स्यात्खलु भिक्षवो युष्माकमेवमस्यः स तेन कालेन तेन समयेन यो वानराधिपतिः । अहमेव तदा अभूत् ॥ यो दकराक्षसो अभूदयमेव मारो ऽभूत् ॥ तदापि न शक्नोति स्यावतारमधिगन्तुं ॥

समाप्तं वानरजातकं ॥

°ntâni yaṁ yena deçena tam uda° BC °niyâpâyo otaranti(C °raṁti |) tatra° C °ttarantâ-nâṁ pâdâ ° tyavekshiti ottarantânâṁ varddha° BC °hîyanti ta°.

2. B °r unpaṁnaṁ atra° C °tpannaṁ || . — 3[1]. BC ° okaṭṭiya° C °nti udararâ° B °se-na | ta ° teshâṁ pa°. — 3[2]. B parâ mukhe° C parân mukhe°. — 4. BC °dṛishṭvo(C °shṭo) okaṭṭiyanto(C °nto |) tatro° C °tro udako udakarâksha° BC °ttâ ga°. — 5. BC °cchatha | a ° nâto nalapotâni gṛihnatha | ye° B °nodakadaṁ yâsyatha | C °kaṁ paçya-tha | .

6[1]. C tato da° B °kshase na ça° C °kshase na çakyaṁtyavakarttituṁ | B °kaṭṭituṁ | . — 6[2]. BC °cchiye nalavanâto svakasvakâ nila(C °ni nara)prâ° C °ntâni gṛihito dirgha° BC °pibemâna ca ma dakarâ ° kaṭṭiyâti | . — 8. BC °cchanti | tato sva° C °otalaṁti || tato dûrâto bhonto te° BC °banti na°. — 9. B °knoti | da° C °râso bhû ° naro o° BC °ka-ṭṭituṁ.

11. C ottarantasya na dṛishṭvâni pâdâni narena pâ° B °ni utarantasya na dṛishṭâni pâ-dâni | . — 12. C narena pâṇiṁ pâtavyaḥ nâ° B °lena pâniṁ pâtavyaṁ° BC °jâgalato°. — 13[2]. C °shmâkam evam asyâd anyaḥ ° B °dhipatir aham e° C °dhipar aham e°. — 14[1]. BC °m evan tadâ°. — 14[2]. C yo uda ° so 'bhûd ayam evaṁ mâ° BC °ro 'bhût | . — 15. C °ti sma ava°.

16. B iti çrîmahâvastuavadâne vâ ° kaṁ samâptaṁ || .

भिक्षू भगवन्तमाहन्सुः ॥ कथं भगवाननुत्तराये सम्यक्संबोधिये प्रज्ञाविशेषेण मारस्य विषयातो अतिक्रान्तो ॥ भगवानाह ॥ न भिक्षवो एतरहिमेवाहं प्रज्ञाविशेषेण स्वस्तिना मारस्य विषयातो अतिक्रान्तो अन्यदापि अहं वानरभूतो सन्तो प्रज्ञाविशेषेण एतस्य मारस्य विषयातो मूर्धे पादां कृत्वा स्वस्तिना अतिक्रान्तो ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवः ॥

भूतपूर्वं भिक्षवो अतीतमध्वानं अनुहिमवन्ते वानरो महान्तं वानरयूथं परिहरति ॥ सो दानि ग्रीष्माणां पश्चिमे मासे तेन वानरयूथेन सार्धं ततो हिमवन्तातो नानाप्रकाराणि फलानि परिभुंजित्वा तृषितो उदकह्रदं पानीयपायो आगतो ॥ सो च उदकह्रदो अभ्रितकूलो नास्ति ओकाशो ओतरितुं नत्यितुं ॥ सो यूथपतिः तस्य उदकह्रदस्य समन्तेन विकाशं मार्गन्तो अनुक्रमन्तो पानीयतृषाये ततः उपलानां पटां छित्वा तहिं उद[२६८ª]कह्रदे पतितो ॥ तस्य च उदकस्य अभ्यन्तरे अजगरस्य बिलं । तत्र बिले महान्तो अजगरो प्रतिवसति ॥ तत्र तस्य प्रतिवसन्तस्य अल्पकिसरेण आहारो उत्पद्यति । यो तत्र उदकपायो आगच्छति मृगो वा पक्षी वा वानरो वा तं सो भक्षयति ॥ तेन सो वानराधिपो तहिं उदके पतन्तो दृष्टो । तेन ततो बिलातो ग्रीवा निष्कासिता एतं वानरं ग्रहीष्यामीति । तं वानरं गाथाये अध्यभाषे ॥

उत्पन्नो पुनरयं भक्षो वानरो वनगोचरो ।
यो यं बिलास्मिं कूलस्मिं पानीयं पातुमिच्छति ॥

सो दानि वानराधिपो तहिं उदके न किंचित्प्रतिष्ठां लभति यत्र पादं प्रतिष्ठा-

1[1]. C atha khalu bhikshur bhaga° hatsuḥ ‖ . — 1[2]. C °bhagagan anu° B °râye bodhiye pra° C °râye sammya° BC °abhikrânto ‖ . — 2[2]. BC °vâham anuttarâye bodhiye prajñâviçeshena sva° C °to abhikrânto | anya° B °sheṇa | e° C °to mûrddhnena pâ° BC °stinâ vishayâto ati(C °abhi)krânto ‖ . — 5[1]. C bhikshu âhatsuḥ ‖ . — 5[2]. B °kshavaḥ ati° C °kshavo ati°.

6. BC atita° C °vantâm vânarayû°. — 7. C °mâsena vânarayû ° vantato nânâpra ° hrade pâni°. — 9[1]. C °hrade nilâmbhakulo° B °do nirabhrakû° C °ço ottari°. — 9[2]. C so yuthapatis tasya udakahra ° trishâto tataḥ° B °trishâye | tataḥ° BC °lânâm paṭam chitvâ tahim°.

11. BC °galasya vi°. — 12[1]. C tasya tatra° BC °galo pra°. — 12[2]. B °lpaviçalena° C °lpakiçalena â°. — 13. B °cchati | mṛi° BC °pakshi vâ vâna°. — 15[1]. C °bilanto grivâ nishkârito e° BC °ram grahe(C °grihi)shyâmi | so ajagaro tam vânaram grahe(C °grihi)shyâmi°. — 15[2]. B °gâthâ a°.

17. C °tpanne pu° BC °bhaksho vâ°. — 18. B °biran tu kû° C °bilan tu kûlesmim. — 19. B °vânarodhi° BC °kimcin pratishṭhâm(B °shṭâm) labhati | ya° B °pratishṭâpe° C °krame | B °krameyam | .

पेत्वा उदकातो स्थलं क्रमेय । तस्यैवं भवति । यथैव अजगरो ग्रीवां पराङ्मुखां परिवर्तेय एतस्य एवाजगरस्य मूर्ध्ने पादं कृत्वा स्थलं क्रमेयं ॥ सो दानि अजगरं गाथाये अध्यभाषे ॥

अहमेव न ते भक्ष्यो इमा न पश्यसे पृथू ।
यो मामभिमुखं तर्जे यं भाषसि गिरामिमां ॥

तेन दानि अजगरेण येन ते वानरा यूथपतिना उपदर्शिता ततःमुखं से ग्रीवा परिवर्तिता तानि वानराणि द्रष्टुं । समनन्तरं तेन अजगरेण पराङ्मुखी ग्रीवा परिवर्तिता सो च वानराधिपो तस्य अजगरस्य पराङ्मुखस्य मूर्ध्ने पादं कृत्वा ततः उदकातो स्वस्तिना स्थलं प्रक्रान्तो ॥ सो दानि अजगरो तस्य वानरस्य बुद्धिविशेषेण विस्मितो ॥ एतस्य वानरस्य इह उदकह्रदे पादस्य प्रतिष्ठानं नास्ति यत्र पादं प्रतिष्ठापेत्वा इतो उदकातो स्थलं प्रक्रमेय । ततो तेन मम एते वानरा उपदर्शिता । तथा एष अतो मुखं परिवर्तेति मम च ग्रीवा येन एते वानरा तेन परिवृत्ता । एषो च बुद्धिविशेषेण मम एव मूर्ध्ने पादां कृत्वा स्थले प्रक्रान्तो ॥ सो तं वानराधिपतिं गाथाये प्रत्यभाषे ॥

लघुं च त्वये क्षिप्रं च निरुद्धं पुनर् चिन्तितं ।
यो मां पराङ्मुखं ज्ञात्वा शूरो वीरो अजायिषा ॥
यस्येमे चतुरो धर्मा वानरेन्द्र यथा तव ।
वीर्यं बुद्धिः स्मृतिः प्रज्ञा सो दुःखमपवर्तति ॥

स्यात्खलु पुनः भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन अनु-

1[1]. BC °ti yadye°. — 1[2]. C °dyeshaḥ ajagalo grivām parāṅmukhām parivarttayaḥ | etasya evaṁ ajagalasya mū ° tvá sthalam°. — 4. B °m evaṁ na te bhakshyá imám na pa° BC °prithum | . — 5. B so mam a° C yo mam a° B °kham arja yam bháshesi° C °shasi imám girám ‖ .

6. B °galeṇa ye° C °galena yato te vánarayá° B °rá yutha° BC °rçita | tataḥ° C °rttito | tani vá ° shṭum sa° B °rttitá | táni ° shṭum sa°. — 7. C samantaraṁ tena ajaṁgale paráṁmukhá gri° B °gare pará° BC °rttitá | so° C °galasya pa°. — 9. C °galo te ° shena vi°. — 10. C °de pádasya pratisthánam násti | yatra pratisthápayetvá itaḥ udakáto sthalam prakra° BC °krameyam | .

11. BC tato na mama e° C °vánaro u ° rçitáḥ tathá°. — 12. C °esho a ° varttantá mama ca° B °rttento mama ca° C °vṛitá e°. — 13. C °evaṁ mürddhni pá°. — 14. C °dhipam gá° B °dhipatiyam gá°. — 15. C laghum ca paryyakshipam ni° B °pram ni° C °punaḥ cinti°.

16. C °kham dṛishṭvá çúlo viro ajánetha ya°. — 18. C °buddhim smṛitim prájñáḥ so yam duḥkha pravarttiti ‖ . — 19. C °khalu bhi°.

हिमवन्ते वानराधिपो अभूषि। सो हं तेन कालेन तेन समयेन वानराधिपो अभूषि॥ अन्यः स तत्र उदकह्रदे अजगरो अभूषि। न खल्वेतदेवं द्रष्टव्यं। तत्कस्य हेतोः। [268b] एष भिक्षवः पापीमां मारो तेन कालेन तेन समयेन तहिं उदकह्रदे अजगरो नैवासिको अभूषि॥ तदापि अहं एतस्य उदकह्रदातो बुद्धिविशेषेण मूर्ध्ने पादं कृत्वा स्वस्तिमतिक्रान्तः। एतरहिं पि अहं एतस्य मारस्य विषयातो बुद्धिविशेषेणातिक्रान्तः॥

वानरजातकं समाप्तं॥

भिक्षू भगवन्तमाहन्सुः॥ पश्य भगवान्कथं पुण्यानां वर्णवादी॥ भगवानाह॥ न हि भिक्षवः एतरहिमेवाहं पुण्यानां वर्णवादी। अन्यदाप्यहं भिक्षवो पुण्यानां वर्णवादी॥ भिक्षू आहन्सुः॥ अन्यदापि भगवन्॥ भगवानाह॥ अन्यदापि भिक्षवः॥ भूतपूर्वं भिक्षवो अतीतमध्वानं नगरे वाराणसी काशिजनपदे अंजनको नाम राजा राज्यं कारयति कृतपुण्यो महेशाख्यो सुसंगृहीतपरिजनो दानसंविभागशीलो महाबलो महाकोशो महावाहनो। तस्य राज्यं ऋद्धं च स्फीतं च सुभिक्षं चाकीर्णजनमनुष्यं च सुखितजनमनुष्यं च॥ तस्य दानि राज्ञो अंजनस्य पुत्रो पुण्यवन्तो नाम कुमारो सर्वकालं पुण्यानां वर्णवादी। तस्य दानि कुमारस्य चत्वार अमात्यपुत्रा वयस्या॥ एको अमात्यपुत्रो वीर्यवन्तो नाम सर्वकालं वीर्यस्य व वर्णवादी वीर्यं लोके अनुत्तरं ति॥ द्वितीयो अमात्यपुत्रो शिल्पवन्तो नाम सर्वकालं शिल्पस्य व वर्णवादी शिल्पं लोके अनुत्तरं॥ तृतीयो अमात्यपुत्रो रूपवन्तो नाम रूपस्य वर्णवादी रूपं व लोके अनुत्तरं॥ चतुर्थो अमात्यपुत्रो प्रज्ञावन्तो नाम सर्वकालं प्रज्ञाये वर्णवादी प्रज्ञा व लोके अनुत्तरं॥ ते दानि तेन कुमारेण पुण्यवन्तेन उच्यन्ति॥ नास्ति पुण्येहि समं पुण्यं लोके अनु-

2[1]. C anyo so tatra u° jagalo nâma a°. — 2[2]. C °shṭavyo | . — 2[3]. BC °toḥ e°. — 3. C °kshavo mâro pâpimâṁ tena kâ° B °garâ nai°. — 4. C °eta uda° BC °tvâ vishayâte(C °to) stha° C °lam abhikrânto | . — 5. C etarahiṁ pi a°.

7. C iti çrîmahâvastuavadâne vânarjâ°. — 8[1]. C atha khalu punar bhikshum âhatsuḥ | B °nsuḥ pa°. — 8[2]. C °gavan ka°. — 9[1]. C na bhikshavo etarahiṁm evâ°. — 10[1]. C bhikshu âhatsuḥ || . — 10[2]. BC °bhagavân || . — 10[3]. B °kshavaḥ bhû° C °kshavo bhû°.

11. B °vârâṇaçi kâçi° BC °de añjanako° B °yati || kṛi° BC °hano tasya°. — 13. C °jyaṁ sphîṭaṁ ca subhi° B °câkirṇṇâjanamanushyaṁ ca | sukhi°. — 14. BC °ro sarvâkâlaṁ° B °rṇṇavâdi ta°. — 15. B °tvâ ca a° C °putro vayasyo | .

16. B °amâtyâpu° C °sarvâkâ° BC °sya ca va° C °dî viryya lo°. — 17. C °sarvâkâ° BC °sya ca va° C °rṇṇavâdi çi°. — 18. C °sya va varṇṇa° BC °dî rûpavâṁ lo°. — 19. C °sarvâkâ° BC °dî prajñâye lo°.

21[2]. B °nâsti puṇyo hi sa° BC °ttare hi ya°.

त्तरं ति । यदि वो जानितु न शक्यथ परराष्ट्रं गच्छाम तत्र ज्ञास्याम: को विशेष्यति पुण्यवां वीर्यवां शिल्पवां रूपवां प्रज्ञावानिति ॥ ते दानि वाराणसीतो कम्पिल्लं नगरं गता यावत् ज्ञास्याम को लोके विशिष्यति पुण्यवां वीर्यवां शिल्पवां रूपवां प्रज्ञावां ॥

ते दानि कंपिल्लतो निर्गम्य गंगायां स्नापनाय गता पश्यन्ति च नदीये गंगाये स्रोतेन महान्तं दारुस्कन्धं ओरुह्यन्तं ॥ ते दानि अमात्यपुत्रा: सो च पुण्यवन्तो राजपुत्रो तं वीर्यवन्तममात्यपुत्रमाहन्सु: ॥ वीर्यवन्त अत्र त्वया दारुस्कं[269ª]-धे वीर्यं दर्शयितव्यं यं शक्नोसि इदं दारुस्कन्धं नदीये गंगाये ओरुह्यन्तं ओकड्डितुं ॥ तत: सो वीर्यवन्तो तेन दानि महाबलस्थाम संजनित्वा तं दारुस्कन्धं नदीये गंगाये ओरुह्यन्तं स्थले ओकड्डितं ॥ ते दानि तं प्रत्यवेक्षन्ति पश्यन्ति च महार्हं चन्दनद्रुमं ॥ सो दानि तेन वीर्यवन्तेन अमात्यपुत्रेण गन्धिकानां हस्ते पुराणानां शतसहस्रेण विक्रीतो ॥ तेन तं पुराणानां शतसहस्रमानेत्वा तेषां वयस्यकानां दत्तं । तां वयस्यकां गाथाय अध्यभाषे ॥

वीर्यं लोके प्रशंसन्ति वीर्यं लोके अनुत्तरं ।
पश्य वीर्यप्रभावेन धनस्कन्धो मे आहृतो ॥

ते दानि आहन्सु: ॥ दृष्टं वीर्यस्य फलं । शिल्पवन्तस्य शिल्पफलं पश्याम: ॥
सो दानि शिल्पवन्तो वीणामादाय वयस्यकानां मूलातो निर्धावित्वा अमात्यपुत्रेहि च श्रेष्ठिपुत्रेहि च सार्धं वीणाये कुशलेहि वीणां प्रवादितो ॥ तत्र महाजनकायो सन्निपतित: यत्तका पि कंपिल्ले नगरे वीणावाद्येषु शिक्षिता ते पि सर्वे

1. C yadi vâ jâ° BC °jânitu na ça° B °râshṭhraṁ ga° shyati | pu° C °viryyavân çilpavân rupavân prajñâvân iti ‖. — 2. C °gatâḥ yâva jñâsyâ° BC °shyati ‖ pu°. — 5. C °snâvanâya ga° nti ca nadiye gaṁgâye gotreṇa mahâ° B °diye gaṁgâye çrotena° C °dâruskaṁndhaṁ °.

6. C °ni amâtyaputro so ca puṇya° ryamantam a°. — 7. B viryyavavanta° C viryyavantaṁ atra° B °vyaṁ ye çaknosi | i° C °vyaṁ | ya ça° kaṭṭituṁ | B °okaṭṭituṁ ‖. — 9. C tato so viryavantaṁ te° B °taḥ se viyavanto° C °diye oruhya° B °gâye ohyantaṁ° BC °sthalaṁ okaṭṭi(C °ṭi)tuṁ |. — 10. B °kahanti | paçya° C °haṁ candranadrumaṁ |.

11. C °ryavantaṁna amâ° B °putrena gandhi° sreṇa vikrito te° C °kriyato |. — 12. B °ttaṁ tâṁ° C °ttaṁ gâ°. — 13. C °syakânâṁ dattaṁ gâ° syakâ gâ°. — 15. B °viryaṁ pra° skandhâ me â° C °skandhâto âhṛi°.

16[1]. B tena dâ° BC °nsuḥ dṛi°. — 16[2]. C dṛiḍhaṁ viryasya yat phalaṁ. — 17. C °çilpivanto° B °nâṁ sthûlato ni° BC °nirddhâ(C °niddhâ)vitvâ a° C °tyapotrehi ca çre° BC °çreshṭiputre° C °sârddha viṇâ° lehi viṇâ pra°. — 18. C °janakâye sannipatitâḥ yatta° B °kaṁppille° C °kshitâḥ te pi çru° titâḥ te°.

श्रुत्वा संनिपतिता ॥ तेन अमात्यपुत्रेण सार्धं परस्परस्य विस्पर्धं वीणां वादयन्ति । न च कोचिच्छक्नोति तस्य अमात्यपुत्रस्य वीणाये अभिभवितुं ॥ अथ खलु अमात्यपुत्रो सो शिल्पवन्तो सर्वेषां वीणावाद्येन विशिष्यति ॥ तेन दानि शिल्पवन्तेन तां वीणां वादयन्तेन तस्या वीणाये एका तन्त्री छिन्ना तादृशो एवं च ताये वीणाये स्वरो निश्चरति । तस्य द्वितीया तन्त्री छिन्ना तादृशो एवं च वीणाये स्वरो निश्चरति । तस्य तृतीया तन्त्री छिन्ना तादृशो एवं च ताये वीणाये स्वरो निश्चरति । एवमेकमेका षट्तन्त्रीयो छिन्ना एका तन्त्री अवशिष्टा । ततस्ताये एकाये तन्त्रीये तादृशो एव स्वरो निश्चरति ॥ सर्वा परिषा तस्य शिल्पवन्तस्य अमात्यपुत्रस्य वीणावाद्येन विस्मयमापन्ना ॥ तेन दानि प्रभूतं हिरण्यसुवर्णं आच्छादो च लब्धो । तेन तं हिरण्यसुवर्णं आहरित्वा तेषां वयस्यकानां दिन्नं । अयं पि मम शिल्पस्य फलं ॥ सो दानि तां वयस्यकां गाथाये अध्यभाषे ॥

शिल्पं लोके प्रशंसन्ति शिल्पं लोके अनुत्तरं ।
सुशिक्षितेन वीणायां धनस्कन्धो मे आहृतो ॥

ते दानि आहन्सुः ॥ दृष्टं इमस्य शिल्पवन्तस्यापि अमात्यपुत्रस्य शिल्पस्य फलं । रूपवन्तस्य पि रूपस्य फलं पश्यामः ॥

सो दानि रूपवन्तो अमात्यपुत्रो ततो वयस्यानां मूलातो निर्धावित्वा [269b] अन्तरापणवीथीमोकस्तो ॥ सो दानि अन्तरापणे वीथीयं अन्वन्तो अग्रगणिकाये दृष्टो प्रासादिको दर्शनीयो अक्षुद्रावकाशो परमाये शुभाये वर्णपुष्कलताये

1. B °treṇa para ° sparddha vî° BC °dayati | . — 2[1]. C na ca kvaciçça ° bhavatu | . 2[2]. C °khala so amâ ° tro nilpa ° dyena viçikshyati | B ° dyena çikshyati | . — 3. C te dâ ° lpavantena tâm̃ viṇâ vâda° BC °ntena tasya viṇâye e° B °kân tantrî° C °cchinnâḥ tâdṛi °vam̃ ca tâya viṇâye svarâ niçca° B °svarâni niçca°. — 5. B °dvitrî tantrî° C °dvitîya tantrî cchinnâs tâdṛi°.

6. C °tîyo tantrî cchinnâḥ tâdṛi°. — 7[1]. BC evam ekamekâm̃ evam̃ sha° B ° shaṭtri (?)-yo cchinnâm̃ ekâ ta° C °shattantriyâ cchinnâ | ekâ ta ° çishṭâḥ ta°. — 7[2]. C tato te pi ekâ° B tatas te pi ekâ ° dṛiçâ eva° C °dṛiçâ evam̃ sva°. — 8. C sarve pari ° pannâḥ | . — 9. B °hiranyam̃ su ° bdho te°. — 10[1]. B °hiraṇyam̃ su° C °rṇṇam̃ âgacchâdo ca labdham̃ tam̃ hiraṇyam̃ suvarṇṇam̃ âha ° syakâm̃ dinnam̃.

11. C °bhâshye | . — 12. B °nti çilpam̃ lo a°. — 13. B susicchinnena vî° C suvicchinnena vî ° naskam̃dho me âhṛitaḥ | B °naskam̃dhe me â°. — 14[1]. B tena dâ° BC °nsuḥ dṛi°. — 14[2]. dṛiḍham̃ i ° tyasya pu°. — 15. C so dâni rûpavantasyâpi° B rûpam̃ tasya pi°.

16. B °tyapu tato yasyânâm̃ rûpânâm̃ mû ° ntapaṇavîthîyoka° C °vîthim okasto | . — 17. B °ntarâyaṇam̃ vî° C °ntarâpaṇavîthîyam̃ akaṇṭhako agra° B ° dṛishṭho prâ° C °dike darça° B °nîyo | akshu ° nvâgato ta°.

समन्वागतो ॥ तस्या तत्र दृष्टमात्रे अत्यर्थं प्रेमं संजातं । ताये चेटी प्रेषिता ॥ गच्छाहि एतं पुरुषं मम वचनेन शब्दापेहि ॥ सो दानि ताये चेटीये शब्दावितो आर्यधीता तव आर्यपुत्र पश्यितुकामा ॥ सो दानि ताये चेटीये सार्धं तस्या अग्रगणिकाये गृहं प्रविष्टो ॥ अग्रगणिकाये अमात्यपुत्रो अभिनन्दितो । स्वागतमार्यपुत्रस्य इमस्मिं गृहमनुत्तरव्यसनं तं कल्याणं मया सार्धं पंचहि कामगुणेहि समर्पितो क्रीडाहि रमाहि परिचारेहि ॥ सो ताये अग्रगणिकाये एकपर्यंकेन उपविशापितो बहुप्रकारं च अर्थेन लोभितो । तस्य स्नानगृहं प्रवेशित्वा गंधतैलेन अभ्यंगो दिन्नो उदारेहि स्नानचूर्णेहि स्नापितो उदारेहि च आलेपनेहि अनुलेपितो महारहाणि च काशिकवस्त्राणि परिधापितो ॥ ताये अग्रगणिकाये सार्धमुपविष्टस्य महारहं भोजनमुपनामितं ॥ सो दानि ताये सार्धं आसन्तो आह ॥ अमुकत्र मे गृहे मम चत्वारो वयस्या आसन्ति तेषां शब्दाविता अर्थमात्रा दातव्या यथा ते न विहन्येन्सु ॥ अग्रगणिकाये वचनमात्रेण शतसहस्रं पुरतो थपितो इमन्तेषां वयस्यानां देहि ॥ तेन दानि ते वयस्या शब्दाविता । ते दानि ताये अग्रगणिकाये गृहमागता: पश्यन्ति रूपवन्तं अमात्यपुत्रं महतीये श्रियाये अग्रगणिकाये अंकगतमासन्तं ॥ सो दानि रूपवन्तो तां वयस्यां दृष्ट्वा गाथाये अध्यभाषे ॥

रूपं लोके प्रशंसन्ति रूपं लोके अनुत्तरं ।
गणिकाय च अङ्कगतो धनस्कंधो मे आहृतो ॥

इमं शतसहस्रं गृह्णथ व्ययं करोथ ॥ ते दानि शतसहस्रं गृह्य स्वकमोहारं गता ॥

$1^{1}$. B °shṭamátrá atya° C °shṭamátro atya° B °játam̃ tá°. — $1^{2}$. BC °ṭiye preshitá ga°. — $2^{1}$. B gacchehi e° C °cchâhi | evam̃ pu ° cane çabdá°. — $2^{2}$. BC °tra paçyatukámaḥ (C °maḥ |) so dá°. — 3. B °shṭo agra°. — $4^{1}$. B °ndito svá°. — $4^{2}$. C svágata árya-putrasya snánagriham̃ praveçitvá gandhataisena imam̃ te gṛi ° sanam̃ kalyáṇam̃ griham̃ mayá sá ° rpitá kri ° máhi anulepanehi parivárehi | B ° ricárâhi | .

6. B °ekaparyake° C °paryaṅkena upaviçáyitaḥ | ba° B °rthena lâbhi° BC °bhito ta°. — 7. B °tailam̃ na atyam̃go di° C °lena abhyaṅgo di° BC °nno | udárehi snánacû(C °cu)-rṇṇe° B °snápito | udárehi ca alepane° C °snápito udárehi ca anulepito ma° B °lepito | ma° BC °riháyito | . — 9. C ° sárddha upashṭaḥ tasya°. — $10^{1}$. C sá dá°. — $10^{2}$. B °vyá || yathá° C ° vyá ya yathá te na vihanyetsuḥ | B ° nyetsu | . — $13^{1}$. C te dá° BC °bdávitvá | . — $13^{2}$. C °graganiganikáye gṛi° BC °çyantam̃ rú° C °ṇikáye aṅkegata°. — 15. C °rúpavantam̃ tám̃°.

18. C °ca aṅgegato dhanaskandha ca me hṛitaḥ | . — $19^{1}$. B °sram̃ gaccha vya° C °sram̃ accha vâyayam̃ karotyatha || . — $19^{2}$. C °svakam áharagatá | B °gato || .

ते दानि आहन्सुः ॥ दृष्टं रूपवन्तस्यापि अमात्यपुत्रस्य रूपफलं । प्रज्ञावन्तस्यापि प्रज्ञाये फलं द्रष्टव्यं ॥

प्रज्ञावन्तो पि ततो वोहारातो निर्गम्य अन्तरापणवीथिमोकस्तो । तत्र पश्यति श्रेष्ठिपुत्रं अग्रगणिकाये सार्धं विवदन्तं महतो जनकायस्य मध्ये । श्रेष्ठिपुत्रेण सा अग्रगणिका उक्ता । आगच्छ [270'] मम अद्य रात्रिमुपस्थापनकारि । अहन्ते शतसहस्रं दास्यामि ॥ अग्रगणिका आह ॥ आर्यपुत्र नास्ति मम अद्य रात्री क्षणो अन्यस्याहमद्य रात्रीये गृहीतवेतना । अद्य तं उपस्थिहिष्यामः श्वे आर्यपुत्र आर्यपुत्रस्य सकाशमागमिष्यं ॥ सा दानि तस्य पुरुषस्य तां रात्रिमुपस्थापनकारि गता ॥ श्रेष्ठिपुत्रो पि तामेव अग्रगणिकां संकीयन्तो शयितो ॥ तेन दानि ताये अग्रगणिकाये सार्धं स्वप्नान्तरे सर्वरात्रीं यथाभिप्रायं क्रीडितं रमितं प्रविचारितं ॥ सा दानि अग्रगणिका तां रात्रिं तेन पुरुषेण क्रीडित्वा रमित्वा प्रविचारित्वा प्रभाताये रात्रीये तस्य श्रेष्ठिपुत्रस्य सकाशं गता । एषाहमागता आर्यपुत्रस्य उपस्थापनकारिका ॥ श्रेष्ठिपुत्रो आह ॥ अद्याहं स्वप्नान्तरे त्वया सार्धं सर्वां रात्रिं यथाभिप्रायं क्रीडितो रमितो परिचारितो गच्छ न मे त्वया कार्यं ॥ यदि आर्यपुत्रो मया सार्धं स्वप्नान्तरे सर्वरात्रिं यथाभिप्रायं क्रीडितो रमितो प्रविचारितो देहि मे शतसहस्रं ॥ श्रेष्ठी आह ॥ या दानि त्वमन्येन पुरुषेण सार्धं सर्वरात्रिमाश्रिता किस्य तवाहं शतसहस्रं दास्यामि ॥ सा आह ॥ आर्यपुत्र स्वयं जल्पसि यथा सर्वरात्रिं एव त्वया सार्धं स्वप्नान्तरे यथाभिप्रायं क्रीडितं रमितं प्रविचारितं दातव्यं आर्यपुत्रेण शतसहस्रं भाटकं ॥ तत्र तेषां तं विवादं ॥ महाजनका-

1[1]. B °nsuḥ dṛi°. — 1[2]. B dṛishṭa rûpam̃vanta° C °shṭam̃ rûpavam̃tasyâ ° trasyâpi rû° B °sya rûpam̃ phalam̃ | . — 3[1]. C °jñâvantasyâpi ta° BC °ohârito ni ° ntarâyaṇa° B °ṇavithim o° C °vîthi oka° BC °sto tatra pa°. — 3[2]. BC °çyati || çreshṭipu° C ° putram agra BC °dhye çre°. — 4. BC çreshṭipu° C °putraiṇa° BC °ktâ â°. — 5[1]. BC °sthânakâni (B °ni |) a°. — 5[2]. C aham̃n te ça ° sram̃ dâsvâmi || B °dâsyâpi || .

6[2]. C °sti mama adya râtrim̃ me gṛi ° BC ° hitacetanâ | . — 7. C adya tvam upa ° maḥ | çuve âryaputrasya sa°. — 8. C ° râtrim̃ upasthapanakâ nirgatâḥ | B °gatâ çre°. — 9[1]. B çreshṭipu° C çreshṭiputrâ pi° BC °pi tam evam agra ° C ° kâm̃ sakriḍanto ça °. — 9[2]. C °sârddha sva ° re sacarâtrim̃ yathâ ° yam̃ kṛidi°.

11. C °mitvâ parivâritvâ prabhâ° BC ° çreshṭipu°. — 12. B esho ha âryaputro° C esho ham âgato âryya ° sthânakâritâ | . — 13[1]. C çreshṭipu°. — 13[2]. B °svapnâm̃nta ° rito gakara me tvayâ kâryya | . — 14. C °mito parivârito de°.

16[1]. B çreshṭhi â ° C çreshṭi â °. — 16[2]. B °ni tvâm anye° C °ni tvâm̃ anye ° rddham̃ sarvâm̃ râtrim̃ âsitâ ki° B °sarvarrâtrim̃m âçri°. — 17[1]. C °putro sva° B °lpasi | yathâ sa° C ° trim̃m evam̃ tva ° mitam̃ paricâ°. — 19[1]. B °shâm̃ tam vivâ° BC °dam̃ ma°. — 19[2]. C °kâye samâgato na ca tam̃ kvacit te° B °tam̃ kâcit te° BC °dam̃ nivindi° B °tam̃ samartha so°.

यो समागतो न च तं कोचित्तेषां विवादं विच्छिन्दितुं समर्थो ॥ सो तत्र स्थितको प्रज्ञावन्तो अमात्यपुत्रो । एतेहि कांपिल्लेहि नैगमेहि वुच्चति ॥ जल्प कुमार त्वं पि यत्ते अत्र प्रतिभायति किं दातव्यं एतेन श्रेष्ठिपुत्रेण एतस्या अग्रगणिकाये शतसहस्रं अथ न दातव्यमिति ॥ प्रज्ञावन्तो आह ॥ यथापि श्रेष्ठिपुत्रस्य एताये गणिकाये समागमः आसि तथापि श्रेष्ठिपुत्रेण एताये गणिकाये भाटकं दातव्यं ॥ ते आहन्सु ॥ निर्दिशतु कुमारो यथा दातव्यं ॥ तेन प्रज्ञावन्तेन महन्तो आदर्शमण्डलो आनापितो शतसहस्रं च । श्रेष्ठिपुत्रो वुच्चति । गृह्ण एतं शतसहस्रकं करण्डकं एतस्य आदर्शमण्डलस्य अभिमुखं धारेहि ॥ श्रेष्ठिपुत्रेण तं शतसाहस्रिकं करण्डकं उत्क्षिपित्वा एतस्य आदर्शमण्डलस्य अभिमुखं स्थापितं । आगच्छ भद्रे यो इमस्य शतसाहस्रिकस्य करण्डकस्य [270b] अत्र आदर्शमण्डले प्रतिबिम्बं एतं गृह्णाहि । एषो ते भाटको ॥ एवं तस्य प्रज्ञावन्तस्य अमात्यपुत्रस्य निर्दिशिते महाजनकायेन हक्कारो दिन्नो प्रभूतं च हिरण्यसुवर्णमाच्छादयन्ति ॥ तेन तं हिरण्यसुवर्णं तेषां वयस्यानां दिन्नो ॥ सो तां वयस्यां गाथाये अध्यभाषे ॥

प्रज्ञां लोके प्रशंसन्ति प्रज्ञा लोके अनुत्तरा ।
सुचिन्तिताये प्रज्ञाये धनस्कन्धो मे आहतो ॥

ते दानि अमात्यपुत्रा आहन्सुः ॥ दृष्टं वीर्यवन्तस्य अमात्यपुत्रस्य वीर्यप्रभावो शिल्पवन्तस्य शिल्पप्रभावो रूपवन्तस्य रूपप्रभावो प्रज्ञावन्तस्य प्रज्ञाप्रभावो । अधुना कुमारस्य पुण्यवन्तस्य पुण्यप्रभावं पश्येमः ॥

सो दानि पुण्यवन्तो राजपुत्रो तेषां वयस्यानां मूलातो निर्धावित्वा येन राज-

1. C tatra° B °sthitaḥ ko pra ° tro sâ te°. — 2[1]. C sâ tehi kaṁ° C so tehi kaṁ°. — 2[2]. BC ° çreshṭipu ° etasya (B °sya a)gra° C °hasram arthaṁ na dâtavyaṁ ti ‖ B °sraṁ arthan dâta°. — 4[2]. B athâpi° B athâpi çreshṭipu ° mâgato âsi | tathâ° B °maḥ âçi tathâ° BC °ṇa etasya gaṇi°. — 5. C ° âhatsuḥ ‖ .

6[1]. B nirviçatu mâro° C °tu mâro°. — 6[2]. BC °ntena mahato â° C °ṇḍalâ â ° sraṁ çre° B °sraṁ | . — 7[1]. BC çreshṭipu°. — 7[2]. BC grihna etaṁ° B °hasraṁkaṁ kalaṇḍaka etasya â° C °srakaṁ etasya â°. — 8. BC çreshṭipu° C °hasrika ka° BC °raṇḍakaṁ e(C ° ṇḍakâsya e)tasya çatasâhasrikasya ukshipitvâ tasya âda ° pitaṁ â° — 9. B °rçanamaṇḍa° BC ° grihnâhi ‖ .

11[1]. BC eshâ o bhâṭako tena ta°. — 11[2]. BC tena ta° C ° nirviçate ° B ° dinnâ | prabhû ° cchâdayaṁti | C °cchâdayati taṁ tena hi°. — 12. C taṁ tena hi ° nâṁ dinnâḥ so°. — 14. BC °jñâṁ loke prasaṁçanti°. — 15. B sucintaye pra° C sucintaṁ ye va prajñâ me dhanaskaṁdhaṁ ca âhṛitaḥ | B °hṛitâ te dâ°.

16[1]. C °putro â°. — 16[2]. B °shṭaṁ vîryaṁ ca tasya a° C °shṭaṁ vîryaṁ vayaṁ tasya a° BC °ryaprabhâvâ çilpava° C °jñâprabhâvaḥ adhu°. — 17. C °ntasya prabhâvaṁ paçyâmaḥ | . — 19 C °nto râjakumâro te ° nâṁ nilâto nirddhâ° B °ṇatâ | .

कुलं तेन प्रणतो । सो तत्र राजकुलसमीपे आसति च ॥ अपरेण अमात्यपुत्रेण दृष्टो । सह दर्शनेन तस्य अमात्यपुत्रस्य पुण्यवन्तस्य राजपुत्रस्य मूले प्रेमं निपतितं । सो तेन भक्तेन निमन्त्रितो स्वकं गृहं नीतो व्यायामशालं प्रवेशितो ॥ व्यायामं कृत्वा स्नानोपविष्टो भक्ताग्रमुपविष्टो ॥ तत्र सो राजपुत्रो तेन अमात्यपुत्रेण सार्धं तं दिवसमुपस्थितो प्रणीतेन राजार्हेण अन्नपानेन ॥ सो च अमात्यपुत्रो राजकीयां यानशालामभिरुहापयित्वा शयापितो । ताये च राज्ञो ब्रह्मदत्तस्य धीताये दृष्टो ॥ तस्या एवं भवति । एषो अमात्यपुत्रो आगतः ॥ सा दानि विकाले राजकुलातो निर्धावित्वा निर्गम्य यानशालां प्रविशित्वा तत्र एव यानमभिरुहित्वा यत्र सो पुण्यवन्तो राजपुत्रो शयितो । जानाति इदानीं मुहूर्तं पि विबुद्धिष्यति । ततो मया सार्धं रमिष्यति ॥ कुमारो पि खादितपीतो सुखं शयितो । सापि राजधीता कामवितर्केहि विद्यमाना इदानिं विबुद्धिष्यति मुहूर्तं पि विबुद्धिष्यति इति बहुकेन रात्रीविभवाकान्ता ओसुप्ता ॥ सा दानि सूर्ये उद्गते ततो यानातो ओतरित्वा राजकुलं प्रविष्टा अमात्येहि च दृष्टा ॥ तेषामेतदभूषि ॥ इयं राजधीता यानशालातो ओतरित्वा विनिद्रा राजकुलं प्रविष्टा मा अत्र याने केनचित्पुरुषेण सार्धं आसितं भवेया ॥ ते च तथा विचिनन्ति पुण्यवन्तो च कुमारो ततः यानातो ओक्रन्तो ॥ तेषाममात्यानां एवं भवति । कुतो अयं [२७१a] पुरुषो ति राज्ञो ब्रह्मदत्तस्य धीतरेण सार्धं अत्र यानशालायामासितो ॥ सो तेहि अमात्येहि गृहीतो गृह्णिय राज्ञो ब्रह्मदत्तस्य उपनामितो । अयं महाराज पुरुषो राजधीताये सार्धं यानशालायां शयितो ॥ सो पृच्छियति ॥ कथमिदं ति ॥ सो आह ॥ महाराज अमुकेन अमात्यपुत्रेण गृहे निमन्त्रितो हं खादित-

1[1]. B °kule sa° C °kulam̃ samipem âsanti ca ‖ . — 1[2]. C °dṛishṭyo sa° B °shṭo sa°. — 3. B sâ te° C °svayam̃ gṛiham̃ nîtaḥ vyâ ° veçaçayito. — 4[1]. C °fiptaḥ bha°. — 4[2]. C °sârddha tam̃ di ° jârarheṇa a°. — 5. BC °jakyâ yânaçâ(B °sâ)lam abhi° C °çayito | .

6. B ° dṛishṭo ta° C ° dṛishṭaḥ ta°. — 7[1]. B °ti e°. — 7[2]. C °gato | B °taḥ sâ°. — 7[3]. B °çâlâ praviçitvâ | ta° C °tra evam̃ yânam̃ a° B °yatra sâ puṇya° BC °yito jâ°. — 9. BC °nâti ‖ i° C °dânim̃ muhurttam api bu° B °pi buddhyishya°. — 10[2]. BC °ditopi°.

11. BC °râjâdhitâ kâmaki(C °kâmevi)tarke° B °rkehi | vidya° C °idâni vibuddhishyato ottaritvâ vinidrâ° B °nim̃ vibuddhishyati | muhurtam̃ pi vibuddhishyati iti | bahukena râtrim̃ vibhâvakâmata supto | . — 12. B so dâni sûryo udgate tato jânâto o ° vishṭo amâtyehi ca dṛishṭvâ te°. — 14. B ° pravishṭo mâ° C °pravishṭaḥ mâ°. — 15. BC °vicinteti pu° C °ro tato yâ°.

16[1]. B teshâm̃m a° C teshâm̃ amâ° BC °ti ku°. — 16[2]. C kuto yam̃ pu ° sya dhitare sâ ° lâyâm̃ çayito | so pṛi°. — 18[1]. B °hito gṛihniya râ°. — 18[2]. B °yito so pṛi°. — 19[1]. C °pṛicchiya° BC °ti ka°. — 19[2]. BC kathedam̃ ti ‖ . — 20[1]. C °râja muke° BC °dito pi° B °pito avikâle nikkâle nikkâçitvâ° C ° pito avikâle nishkâle nishkâçitvâ ° sthitaḥ so° B °sthito so°.

पीतो विकाले निष्क्रामित्वा ओहारं प्रक्षिप्तो । सो तेन विकालदोषेण अत्र यानशालायामभिरुहित्वा शयायितो खादितपीतो नाप्येव तत्र अन्यो को चि द्वितीयो विदितो ॥ राज्ञापि धीता पृच्छिता । कथमेतन्ति ॥ ताये पि तु ब्रह्मदत्तस्य यथाभूतं आचिक्षितं । यथैव जल्पति पुरुषो तथा एव नान्यथा जल्पति ॥ राजा ब्रह्मदत्तो पुण्यवन्तस्य राजकुमारस्य प्रीतो संवृत्तो पश्यति च तं कुमारं प्रासादिकं दर्शनीयं बुद्धिमन्तं च सुस्थितं च । तस्य एतदभूषि । न एतेन प्राकृतपुरुषेण भवितव्यं महाकुलीनेन एतेन कुमारेण भवितव्यं ॥ सो दानि तं कुमारं पृच्छति ॥ कुमार कुतः त्वन्ति ॥ कुमारो आह ॥ वाराणसीतो अंजनस्य काशिराज्ञो पुत्रो ॥ तस्यापि कांपिल्लस्य राज्ञो ब्रह्मदत्तस्य सह दर्शनेन पुण्यवन्तस्य कुमारस्य पुत्रप्रेमं निपतितं तस्य च राज्ञो पुत्रो नास्ति । तेन सा धीता सुवर्णसहस्रमण्डिता कृत्वा महता राजानुभावेन महता राजर्द्धीये सर्वस्य अधिष्ठानस्य पुरतो पुण्यवन्तस्य कुमारस्य दिन्ना राज्ये च प्रतिष्ठापितो अमात्यानां च नैगमजानपदानां च राजाह ॥ एषो मे पुत्रो जातो ताव एषो भवे राजा अहं वृद्धो ॥ तेन दानि पुण्यवन्तेन राज्यप्राप्तेन ते वयस्या शब्दापिता गाथाये अध्यभाषे ॥

पुण्यं लोके प्रशंसन्ति पुण्यं लोके अनुत्तरं ।
राज्यं च राजकन्या च पुण्येहि मम आगता ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन वीर्यवन्तो नाम अमात्यपुत्रो अभूषि । नैतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एष भिक्षवो श्रोणकोटिविंशो तेन कालेन तेन समयेन वीर्यवन्तो अमात्यपुत्रो अभूषि ॥ अन्यः स तेन कालेन तेन समयेन शिल्पवन्तो अमात्यपुत्रो अभूषि ।

1. B so te vikâ° C so me vikâ° BC °kâlo doshe° B °khâdati pito ° tra anyâ kâci dvitiyo° C °khâdito pito nâpyevam̃ tatra anyo kvacid dvi°. — 3[1]. C râjño pi dhitâpi pṛi° B °pṛicchati tâ ka°. — 3[2]. BC °nti tâye°. — 3[3]. C tâye pituḥ bra°. — 4[1]. C yathaisho jalpati purushaḥ tathâ nânyam̃ yathâ ja° B °evam̃ nânya°. — 4[2]. B °çyati | na ca tam̃ ku ° dika darça° BC °ddhivanto ca susthito ca ta°.

6[1]. B °shi na e°. — 6[2]. B °pusheṇa bha° BC °kulinena e°. — 7. BC °ti kumâ°. — 8[1]. B °mâro kutaḥ° C °mâro kuto tvam̃ ti ‖. — 8[2]. BC °sito am̃(C °a)jakasya°. — 9. BC °titam̃ | ta ° sti te°. — 10. C °srapratimaṇḍi° B °ṇḍitâ kṛi° C °bhâvena mahatâ râjaṛiddhiye sa° B °dhisthâne purvato puṇya° C °shṭhâne pura ° ṇyavandasya kumârasya dinno râjye° BC °dânâm̃ ca râjâham̃ e°.

13[1]. C esho me pûtro° BC °tro jâto tâ(C °jâtâ)ca esho me râjâ(B °râjâ a)ham̃°. — 13[2]. C °bdâpitâ gâ° — 15. B °prasam̃çanti°.

16. C °jakam̃nyâm̃ ca pu°. — 17[2]. C °khalu bhikshavo yu°. — 18[1]. C °hetor aham̃ so bhi°. — 19. C °ṭivam̃ço tena kâ°. — 20. C anyas sa tena kâ°.

नैतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एष भिक्षवः राष्ट्रपालो कुलपुत्रः तेन कालेन तेन समयेन शिल्पवन्तो अमात्यपुत्रो अभूषि ॥ अन्यः स तेन कालेन तेन समयेन [271b] रूपवन्तो अमात्यपुत्रो अभूषि । नैतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एषः स भिक्षवः सुन्दरनन्दः स्थविरो तेन कालेन तेन समयेन रूपवन्तो अमात्यपुत्रो अभूषि ॥ अन्यः स तेन कालेन तेन समयेन प्रज्ञावन्तो अमात्यपुत्रो अभूषि । नैतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एष स भिक्षवो शारिपुत्रो स्थविरः तेन कालेन तेन समयेन प्रज्ञावन्तो अमात्यपुत्रो अभूषि ॥ अन्यः स तेन कालेन तेन समयेन अंजनस्य काशिराज्ञो पुण्यवन्तो नाम काशिराजपुत्रो अभूषि । नैतदेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स भिक्षवः तेन कालेन तेन समयेन अंजनस्य काशिराज्ञो पुण्यवन्तो नाम राजपुत्रो अभूषि ॥ तदापि अहं पुण्यानां वर्णवादी । एतरहिं पि अहं पुण्यानां वर्णवादी ॥

समाप्तं पुण्यवन्तजातकं ॥

अपि च भिक्षवः न एतरहिं एवाहं पुण्यानां वर्णवादी । अन्यदापि अहं पुण्यानां वर्णवादी ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवः ॥ भूतपूर्वं भिक्षवो अतीतमध्वानं मिथिलायां राजा विजितावी नाम राज्यं कारयति कृतपुण्यो महेशाख्यो सुसंगृहीतपरिजनो दानसंविभागशीलो ॥ तस्य न किंचिदपरित्यक्तं श्रमणेहि ब्राह्मणेहि कृपणेहि वनीपकेहि । यस्य हस्तिना अर्थो तस्य हस्तिं देति । यस्याश्वेनार्थो तस्याश्वं देति । यस्य रथेनार्थो तस्य रथं देति । यस्य यादृशेहि यानेहि अर्थो तस्य तादृशानि यानानि देति । यस्य नारीहि अर्थो तस्य सर्वालंकारविभूषितां नारिं देति । यस्य दासीहि अर्थो तस्य

1[2]. C esho bhikshavo rá° B °ráshṭhrapá° C °putro tena ká ° lpavanta amá°. — 2. C anyo sa tena ká ° yena rupa° BC °shi nai°. — 3[2]. C °hetor e°. — 3[3]. C esha sa bhikshavo su°. — 5[1]. C anyas sa te°.

6[1]. C °hetor esha°. — 6[2]. C °kshavaḥ ánandasthaviro tena ká° B °çáliputro stha° C °jñávanta amá°. — 7. C anyo sa tena ° náma rájapu°. — 9. C esha so bhi° BC °añjakasya° C °ṇyavanto rája ° bhúshi | naitad evam̃ drashṭavyam̃ | tat kasya hetor aham̃ so bhikshavo tena kálena tena samayena añjakasya káçirájño puṇyavanto náma rájaputro abhúshi | tadápi°. — 10[3]. C etarasi pi a°.

12. C ‖ iti çrímahávastuavadáne puṇyavanto náma játakam̃ samáptam̃ ‖. — 13[1]. C athápi ca bhikshavo naita ° ham̃ na puṇyá° B °rṇṇavádi ‖. — 14[2]. C bhikshu á°. — 14[3]. B °gaván ‖. — 14[4]. B °kshavo bhú° C °kshavo atí°. — 15. C atítamadhváne mi° BC °çilo ta°.

17[2]. C °çravaṇehi brá°. — 18[1]. C yasyá 'çvanárthe tasya açvam̃°. — 19[1]. BC yasyá yádṛiçe ° rtho tádṛiçá°.

दासीयो देति । यस्य दासेहि अर्थो तस्य दासानि देति । यस्य वस्त्रेहि अर्थो तस्य वस्त्राणि देति । यस्य यादृशेहि भाजनेहि अर्थो तस्य तादृशानि भाजनानि देति । यस्य धेनुहि अर्थो तस्य धेनुयो देति । यस्य बलिवर्देहि अर्थो तस्य बलिवर्दं देति । यस्य हिरण्येनार्थो तस्य हिरण्यं देति । यस्य सुवर्णार्थो तस्य सुवर्णं देति । यस्य रूप्येण कार्यं तस्य रूप्यं देति । यस्य यस्य येन येनार्थो तस्य तस्य तं तं देति । न च स किंचिदपरित्यज्यं न चास्य अन्यथाभावो भवति ॥ अथ खलु ददन्तो परित्यजन्तो आत्तमनो भवति न च दत्वा पश्चादनुतप्यति । अथ खलु [२७२a] प्रीतिप्रामोद्यबहुलो भवति ॥

सो दानि अतिदानं ददाति कोशानि क्षीयन्तीति । गणकेहि च महापात्रेहि च कुमारामात्येहि च नैगमजानपदेहि च महाजनकायेन च संनिपतित्वान ततो राज्यतो विप्रवासितो समानो अनुहिमवन्ते महावनषण्डे ॥ तत्र गतो तत्र वनषण्डे आश्रमं मापेत्वा तृणकुटिपर्णकुटीनि कृत्वा वासं कल्पेसि ॥ तत्रापि आश्रमे प्रतिवसन्तो मूलानि च पत्राणि च पुष्पाणि च नानाप्रकाराणि च फलानि संहरित्वा प्रथमं ऋषीणि भोजेति पश्चादात्मनाहारं करोति सर्वकालं धर्मकामः ॥ अथ शक्रो देवानामिन्द्रो राज्ञो जिज्ञासनार्थं वनषण्डमुपसंक्रान्तो द्विजेन वर्णेन अन्तरीक्षे स्थिहित्वा वैदेहराजं दानातो विवेचेति ॥ महाराज न एतं दानं पण्डितेहि वर्णितं सर्वकालं दानं पण्डितेहि विगर्हितं ॥ यो दानं ददाति सो दृष्ट एव धर्मे दुःखितो भवति । मनुष्येषु चवित्वा नरकेषूपपद्यति । यथा महाराजो एतेन दानेन राज्यतो विप्रवासितो दृष्टधर्मेषु राज्यहीनो दुःखेन संयुक्तो परत्र पि एतेन दानप्रभावेन नरकेषूपपद्यिष्यति ॥ यदि मे महाराज मम न श्रद्दधासि यथा

1[1]. C °sehi tasya dási°. — 1[2]. C °arthas tasya vastrâ°. — 2. C °çehi bhâm̃janâni deti | B °tâdṛiçehi bhâjanâni deti | . — 4[1]. C yasya hiraṇyanârtho° B °tasya hiram̃ṇyam̃°. — 5[1]. BC yasya rûpeṇa°. — 5[2]. C yasya yasya yenârthena ta ° sya tam̃ deti | B °nârthe ta ° sya tam̃ tan deti | .

6[2]. B °tyajyanto â° C ° ântamanâ bhavanti na ca° BC ° datvâ paçcâ°. — 9[1]. BC ° koçâni kshiyatiti | . — 9[2]. BC °kumârâmâtrehi ca nai° C °kâyehi ca sam̃ ° tvâna tato râjâto vi ° sito | so dâni râjyâto vipravâsito sa° BC °ntena mahâvanasha(C °kha)ṇḍe tatra°.

11. C ° gataḥ tatra vanakhaṇḍe âçrama mape° B °çrama mâpetvâ triṇakuṭivarṇṇa° C °tṛiṇakuṭṭiparṇṇakuṭṭini kṛi°. — 12. C °me praviçato mâ ° mam̃ ṛishini bhojayati | pa°B° âtmaâhâ°. — 14. C °ndro râjñâ ji ° rtham̃ vanakhaṇḍa ° to vicareti | .

16. C °ja naitam̃ dâ° B °etam̃ dânam̃ paṇḍatehi va° BC °vigahitam̃ | . — 17. C ° dadâmi so° BC ° dṛishṭa evam̃ dha° C °ḥkhitâ bha°. — 18[1]. C °shu cyavi ° dyanti | . — 18[2]. BC °vâsito | dṛishṭa° C °kto paratreṇa etena pra° B ° dânena prabhâ° C °bhâve narake° B °shûpapadyam̃tishyati | . — 20. B yadi me mahârâja mama çraddadhâsi | yathâ°.

इह दानं दत्त्वा परलोके नरकेषूपपद्यिष्यसि तमहं महाराजस्य प्रत्यक्षं उपदर्शयिष्यं यत्र दायकदानपतियो उपपद्यन्ति ॥ शक्रेण आदीप्तो संप्रज्वलितो सज्योतीभूतो महानरको निर्मितो । तत्र बहूनि प्राणसहस्राणि संपच्यमाना संदर्शिता भीष्मस्वरं क्रन्दमानाः ॥ सो दानि राज्ञो आह ॥ महाराज गच्छ एतान्नरके सत्वानुपपन्नां क्रन्दन्तां पृच्छाहि केन कर्मेण अत्र नरके उपपन्ना ति ॥ राजा तानि नैरयिकानि पृच्छति ॥ किं युष्माभिर्मनुष्यभूतेहि पापकर्म कृतं येन भीष्मस्वरं क्रन्दमाना एदृशानि नरके दुःखानि अनुभवथ ॥ ते दानि निर्मिता आहन्सुः ॥ महाराज वयं मनुष्यलोके दायकदानपतियो आसी अस्माभिः श्रमणब्राह्मणेषु कृपणवनीपकेषु च उदाराणि दानानि दिन्नानि विपुलानि विस्तीर्णानि । ते वयं तस्य प्रभावेन मनुष्येषु च्यवित्वा इह नरकेषूपपन्ना ॥ राजा आह ॥ न मार्ष एवं एतं यथा यूयं जल्पथ । न हेतु न प्रत्ययो यं दायकदानपतिर्दानं दत्त्वा नरकेषूपपद्येय ॥ अथ खलु दायकदानपति दानं दत्त्वा दानप्रभावेन कायस्य भेदात्स्वर्गेषूपपद्यन्ति । ते तत्र [272[b]] नानाप्रकाराणि दिव्यानि सुखानि अनुभवन्ति । ते देवेषु सुखानि दिव्यानि अनुभवित्वा आयुक्षया देवेषु च्यवित्वा मनुष्येषु आढ्येषु कुलेषूपपद्यन्ति ॥ अपि च कौशिक यदा ते च याचनका मम सकाशातो लब्धलाभा परिपूर्णसंकल्पा प्रतिगच्छन्ति तेन मम उदारो प्रीतिप्रामोद्यो भवति ते च प्रीता भवन्ति । अहं यदि नरकेषूपपद्यामि ततः उत्सहामि दानं दातुं ॥ एवं शक्रो देवानामिन्द्रो तं वैदेहराजं जिज्ञासित्वा संराधितो ॥ शोभना महाराज उदारा ते चेतना जिज्ञा-

BC °datvâ paralo° C °lokeshûpapaditi ‖ tam ahaṁ° B °dyati ‖ tam ahaṁ° C °tyaksham upada° BC °shyaṁ | yatra° B °napatiyo°.

2. C °dipta saṁ°. — 3. BC °bahuni prâ°ṇi saṁyacca° B °rçitâ ahṛisvarâ kra° C °rçitâ °ahiçvarâ kaṁdarpyamâno ‖. — 4[1]. C °ni tasya tasya râ°. — 4[2]. BC ° kamena atra naraka upapannâ(C °nno) ti |. — 5. BC râjâni nai°.

6. C kim asmâbhi ° hi pâpaṁ karma kṛitaṁ ahṛisvaraṁ kra° B °yena ahṛisvaraṁ kra°. — 7[2]. BC °nushyâlo ° napatiyo âsî(C °sit |) asmâ° C °çravaṇabrâhmaṇeshû kṛipaṇavanipake° B °nîyake° BC °ṇṇâni te va°. — 9. C °shu cyavi ° shûpapannâḥ |. — 10[2]. B na esha evaṁ° C naisha evaṁ°.

11[1]. C °hetu pra ° kadânapatiḥ dânaṁ ° BC °datvâ narake ° dyeyaṁ ‖. — 11[2]. C °kadânapatir dânaṁ° BC °datvâ dânapra° C °dyati |. — 13. C °kshayâya deveshu cyavi°. — 15. C °çika padâ yâcanakâ mama ṇakâsâto labdha ° pûrṇṇaṁ kalpâṁ pratigacchanti | te deveshu° (13, *suit une répétition correcte jusqu'à* 15:) °kâ mama çakâçakâsâto labdhalâbhâ paripûrṇṇakalpaṁ pratigacchanti | tena ma° B °cchanti | tena ma ° modyo bhavishyati te° C °modya bhavishyanti te° BC °tena prito bha°.

16. C °dyâmi taḥ u°. — 17. B °çakreṇa de° BC °indreṇa taṁ° B °jaṁ vijñâ° C °tvâ samrâ° BC °dhito ço°. — 18. BC çodhanaṁ(B °naṁ |) mahârâja(C °jo) u° B °cetanâ vijñâ°.

सनार्थं महाराजस्य इहागतो ॥ एवमुक्त्वा शक्रो देवानामिन्द्रो ततः वनषण्डातो न्तर्हितो त्रयस्त्रिंशभवने प्रत्यस्थासि ॥

तस्य दानिं तहिं राज्ये मिथिलायां यदुपादाय राजा विप्रवासितो तदुपादाय देवो न वर्षति दुर्भिक्षं संवृत्तं चौरेहि च प्रतिराजानेहि च उपद्रुतं ॥ तेहि दानि कुमारामात्येहि गणकमहामात्रेहि च नैगमजानपदेहि च तं वनषण्डं गत्वा तं वैदेहराजं अनुक्षमापेत्वा महता राजर्द्धीये महता राजानुभावेन पुनः मिथिलायां प्रतिष्ठापितो तदा सुभिक्षमासि ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन मिथिलायां विजितावी नाम वैदेहराजा अभूषि । न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स भिक्षवः तेन कालेन तेन समयेन मिथिलायां विजितावी नाम वैदेहराजा अभूषि ॥ तदापि अहं पुण्यानां वर्णवादी एतरहिं पि अहं पुण्यानां वर्णवादी ॥

अभूषि राजा विजितावी वैदेहो मिथिलाधिपः ।
दिशासु विश्रुतो दाने मुक्तत्यागो अमत्सरी ॥
हस्त्यश्वरथयानं नारीयो च अलंकृता ।
जातरूपं हिरण्यं च न किंचिन्न परित्यजेत् ॥
प्रीतिप्रामोद्यबहुलो जनेय सौमनस्यतां ।
दत्वा आत्तमनो भोति दत्वा च नानुतप्यति ॥
श्रमणं ब्राह्मणं दृष्ट्वा कृपणमथ वनीपकं ।
तर्पितो अन्नपानेन वस्त्रशय्यासनेन च ॥
गणका महामात्रा च कुमारामात्या च नैगमा ।
जनकायो समागत्वा राज्यातो विप्रवासयेत् ॥

1. B evam uktvá (ou °ptká) ça° C °m ukte ça ° ndro tato vanakhaṇḍâto 'ntarhito trayastriṁçadbhavane° B °rhito | traya° C ° pratyusthâsi | . — 3. C °dâni tahiṁ° B °yâṁ ya upâdâya râ ° sito upâdâya de° C °sito yadapâdâya de°. — 4. BC °kumâromâtye° C °tyehi gaṇakamahâmâtyehi ca naigamajanapa° C °vanakhaṇḍaṁ° B °nukshemâpe° C °punar mithi°.

8². C khât khalu bhikshavaḥ yu ° m evaṁm asyâ°. — 10¹. C ° hetor ahaṁ°. — 10². C °kshavo tena kâ ° bhûshi na khalvetad evaṁ drashṭavyaṁ tadâ°.

11. C tadâpyahaṁ puṇyânâṁ varṇṇavâdî || abhû°. — 13. C °thilâyâ adhipatiḥ di° B °paḥ di°. — 15. B °thayâna ca nâ° C °naṁ ca nâ ° kṛitâḥ | B °kṛito | .

16. C °rûpo hi° B °hiraṁṇyaṁ° BC °kiṁcid apari°. — 17. B °neyama sau°. — 18. B danto â° C °ttamanâ bhonti datvâ ca° B °datvâ ca°. — 19. C çravaṇaṁ brâ°. — 20. C tapito a°.

21. C gaṇyakâ ° râmâtya ca naigamâḥ | .

सो च विप्रवासितो सन्तो वनषण्डमुपागमे ।
आश्रमं [273ᵃ] मापयित्वान तत्र वासं प्रकल्पये ॥
तस्मिं च वनषण्डस्मिं संहरित्वा फलाफलं ।
सन्तर्पयित्वा ऋषयो पश्चाद्भुंजति आत्मना ॥
शक्रो दिव्येन वर्णेन राजानमुपसंक्रमे ।
अन्तरीक्षे स्थिहित्वान इदं वचनमब्रवीत् ॥
न पण्डिता प्रशंसन्ति दानं विगर्हितं सदा ।
एतेन अतिदानेन राज्यातो सि प्रवासितो ॥
दृष्टधर्मे सि दुःखितो राज्यहीनो सि क्षत्रिय ।
परलोकं गतो सन्तो नरकं गम्सि पार्थिव ॥
सचे मम न श्रद्दधासि यत्र गच्छति दायको ।
संदर्शयिष्यं तान्तुभ्यं दायकानान्तु या गतिः ॥
सज्योतीभूतं ज्वलितं निरयं शक्रो च निर्मिणि ।
बहुप्राणसहस्राणि पच्यमानानि दर्शये ॥
स्वयं पृच्छ महाराज दह्यमानां इमां प्रजां ।
केन ते व्यसनं प्राप्ता दुःखां वेदथ वेदनां ॥
भीष्मस्वरा क्रन्दमाना दुःखां वेदथ वेदनां ।
एतमर्थं हि पृच्छाहि किं पापं अकरे पुरा ॥

ते कथयन्ति ॥

वयं दानपती आसि मनुष्येषु जनाधिप ।
बहु दानं ददित्वान अनुभोम इदं दुःखं ॥

1. C so vipra° B °pravasi° C °nakhaṇḍa°. — 2. C âçrama prâpayi° B °çrama mâpayi° C °lpayet | . — 3. BC tasmiṁ vana° C °nakhaṇḍesmiṁ siṁha°. — 4. C °ça bhuñjati âtmanâḥ | B °janti â°.

7. BC °vigahitaṁ°. — 8. C °râjyato pirivâsito | B °to si nivâsito | . — 9. B °dharmo si duḥ° C °dharmo râjyato si duḥkhito si ca kshetriyo | B °triye | . — 10. BC °lokaṁ gatâ santo° C °kaṁ gaṁsi pâ° BC °rthivâṁ | .

11. B na ce mama° C na mayâ na çra° BC °echasi dâ° C °yakaḥ | . — 12. C °rçayati ca tubyaṁ dâyikâ° BC °ntu yo gatiḥ | . — 14. C °ṇi yaccu°. — 15. C °hyamânâ iyaṁ prajâṁ | .

16. BC °prâptaṁ duḥ° C °khâṁ vedeti vedanâṁ | . — 17. *Omis dans* C. B abhisvarâ krandamânâṁ duḥ°. — 18. C °rthaṁ pi pṛi ° karo purâḥ | . — 19. BC °nti va°. — 20. C va dânapatir âsi manu° BC °dhipaḥ | .

21. C ° dadatvâna anubhoma duḥkham idaṁ | .

राजा कथयति ॥

न एषो ऋस्ति प्रत्ययो न एतं स्थानं विद्यति ।
यत्र दानपति सन्तो च्युतो गच्छेय दुर्गतिं ॥
मनुष्येषु च्यविलान स्वर्गं गच्छन्ति दायका ।
तत्र ऋमानुषां ऋत्विं ऋनुभोन्ति स्वयंकृतां ॥
कामं पि दुःखं नरकेषु . .
ऋनल्परूपमीदृशं . . . ।
. . . . . . . नरेन्द्र
दृष्ट्वा न तं याचनकं प्रभोमि ॥
कथं गिरां वियाहरन्तो दास्यं
संपूर्णसंकल्पमनोरथो स ।
मां प्राप्य प्रीतो कथं प्रतिक्रमे ति
सा मे रतिर्भवतु सहस्रनेत्र ॥
न तं भवे यं न ददेह दानं
ऋहरहं व पूरये तर्पये हं ।
परायणं ऋहं स कल्पवृक्षो
. . . . पर्णफलोपपेतो ॥
न मे मनो कुप्यति याचितस्य
दत्त्वा न सोचामि नानुतप्यामि ।
न तं उपश्रुतं यन्न प्रयच्छे
यं च श्रुतं चिप्रमुपानयामि ॥
. . . . . . . . . . . . .

1. BC °ti naisho°. — 2. BC naisho sti paryáyo° B °yo naitam̃° C °yo sthána vi°. — 3. B °pati santo°. — 4. BC °cchati dá°. — 5. C °nushim̃ pi°.

6. BC °keshu analparúpam i(C °lpam̃ ca rúpam̃)dṛiçam̃ | sanamudre lokena(B °dre rákaraṇam̃) narendram̃ dṛishṭvá°. — 8. BC dṛishṭvá ca tam̃ yá° kam̃ prabho | . — 10. BC °rám̃ vyáharantam̃ dásyá sam̃pú° B °púrṇam̃ sam̃ka° rathám̃ sa mám̃° C °rathám̃ | sa mám̃°.

12. BG °pratikramanti sá(C °so) me ra° C °netro na tam̃°. — 14. C °bhaveyam̃ yan na dade° BC °nam̃ aharaha iva púraye | tarpaye ham̃ | pará°.

16. BC paráyaṇa aham̃ sam̃kalpavṛiddho vá tṛiṇapalla(C °llava)phalo pi vá na me°. — 18. B °pyati | yáci° BC °datvá na socámi na tapyá(B °pyo)mi | (C °mi). — 20. C tam̃ tam upa° B tan tam̃ upa° BC °paçruṇiya yan na° C °prayacchaye yam̃° BC °pram upanayá° B °yámi eva°.

एकक्षणे सर्वमनोरथा मे
पूर्णा मह्यं संजितो च स तत्त्वं ।
सप्ताहं पर्यंके सुखोपविष्टो
स्थित: मुनि शैल इवाप्रकंप्यो ॥
सप्तमे दिवसे नाथो निर्गतो व्याहरे गिरां ।
लोकधातुसहस्राणि विज्ञपेन्तो महामुनि: ॥
सुखो विपाको पुण्यानां अभिप्रायश्च ऋध्यति
क्षिप्रं च परमां शान्तिं निर्वृत्तिं चाधिगच्छति ॥

समाप्तं विजिताविस्य वैदेहराज्ञो जातकं ॥

एवं मया श्रुतमेकस्मिं समये भगवतो शिष्यो आयुष्मानानन्दो मगधेषु चारिकां [273b] चरमाणो महता भिक्षुसंघेन सार्धं पंचहि भिक्षुशतेहि येन मगधानां राजगृहं नगरं तदवसारि तदनुप्राप्तः तत्रैव विहरति वेणुवने कलन्दकनिवापे ॥ तेन खलु पुनः समयेन आयुष्मतो आनन्दस्य त्रिंश सार्धविहारिका शिष्यां प्रत्याख्याय दौर्बल्यमाविष्कृत्वा हीनायावर्तन्ति कामेहि ॥ अश्रोषी आयुष्मां महाकाश्यपो आयुष्मतो आनन्दस्य त्रिंश सार्धविहारिका शिष्यां प्रत्याख्याय दौर्बल्यमाविष्कृत्वा हीनायावर्तप्रवृत्ता कामेहि ॥ अथ खल्वायुष्मान्महाकाश्यपो येनायुष्मानानन्दस्तेनोपसंक्रमित्वा आयुष्मता आनन्देन सार्धं संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां वीतिसारयित्वा एकान्ते निषीदि । एकान्तनिषण्णो आयुष्मां महाकाश्यपो आनन्दमेतदवोचत् ॥ पृच्छेम वयमायुष्मन्तमानन्दं किंचिदेव प्रदेशं

1. B evaksha° C °púrṇṇo vayaṁ sáji° B °ṛṇṇá vayasáji° BC °sa tathá saptá°. — 3. BC °khopravishṭo° B °ni maula ivá° C °sthito muni maura icáprakaṁpyo | . — 5. B °se náthe nirga°.

6. B °dhátúsaha ° jñapyanto°. — 7. BC °pákapuṇyá ° ça rishyati | . — 9. C || iti çrímahávastuavadáne vijitávi vaideharájno játakaṁ samáptaṁ || . — 10. B °çrutaṁm eka° M °kasmin samaye° B °samaya bha° M °bhagaván rájagṛihaṁ nagaraṁ tad avasári tad anupráptaḥ || tatraiva vihaṁrati || bhagavato çishyá áyushmánando ° ṇo mahatá bhikshusatehi yena ° prápto tatra evaṁ viharati sma || tatra veṇu° B °ti | veṇuvane kalakani° M °kalaṇḍakani°.

12. B °yena áshma° M °triṁçat sárddhaṁvihárika çishyáṁ pra° BM °khyáya çikshádau° M °lyam ámishkṛi° BM °hináyaṁ va° B °rttanti | kámehi a°. — 14. B °shl | áyushmantaṁ ma° M açroshid áyushmán ma ° shmanto ánanda° B °shmantaṁ ánanda° M °triṁçat sárddhaṁvi ° khyáya daurbyalam á° BM °hiná(B °náya)varttapravṛitti kámehi || .

16. M °po áyushmán ánando nopa ° dayitvá çálápaniyáṁ katháṁ vithiçára° B °dayitvá sarápaṇiyáṁ katháṁ vitiçára° BM °shidi e°.— 18. BM °sharṇṇo á° M °yushmán mahá°. — 19. M °cid evaṁ pra° BC °sacet me áyu° B °karonti pra°.

सचेत्मो आयुष्मानानन्दो वकाशं करोति प्रश्नव्याकरणाये ॥ एवमुक्त आयुष्मानानन्दो आयुष्मन्तं महाकाश्यपं एतदवोचत् ॥ पृच्छायुष्मं काश्यप यदाकांक्षसि श्रुत्वा प्रवेदयिष्यामि ॥

एवमुक्ते आयुष्मान्महाकाश्यपः आयुष्मन्तमानन्दमेतदवोचत् ॥ सचेद्भूमन्यसि आयुष्मनानन्द कति अर्थवशां संपश्यमानेन तथागतेनार्हता सम्यक्संबुद्धेन श्रावकाणां गणभोजनं प्रतिक्षिप्तं त्रिकभोजनं च अनुज्ञातं ॥ एवमुक्ते आयुष्मानानन्दो आयुष्मन्तं महाकाश्यपमेतदवोचत् ॥ दूरतो खलु वयं आयुष्मन्महाकाश्यप आगच्छेम आयुष्मन्तो येन महाकाश्यप एतमर्थं परिपृच्छनाय ॥ साधु पुनरायुष्मतो एव महाकाश्यपस्य एषो अर्थो प्रतिभायतु ॥ एवमुक्ते आयुष्मान्महाकाश्यपो आयुष्मन्तमानन्दमेतदवोचत् ॥ द्वे आयुष्मनानन्द अर्थवशां संपश्यमानेन तथागतेनार्हता सम्यक्संबुद्धेन श्रावकाणां गणभोजनं च प्रतिक्षिप्तं त्रिकभोजनं च अनुज्ञातं ॥ कतमे द्वे । यावदेव कुलानां च रक्षाये गुप्तीये फासुविहाराये पापानां च पक्षपरिच्छेदाये मा पापा आमिषेण गणं बन्धित्वा संघे कलहभण्डनविग्रहविवादं अधिकरणं कौकृत्यं उत्पादेन्सुः ॥ इमे खल्वायुष्मनानन्द द्वे अर्थवशां संपश्यमानेन तथागतेनार्हता सम्यक्संबुद्धेन श्रावकाणां गणभोजनं च प्रतिक्षिप्तं त्रिकभोज[274a]नं च अनुज्ञातं ॥ सो त्वं आयुष्मनानन्द इमाये पर्षाये नवाये दहराये तरुणाये इन्द्रियेष्वगुप्तद्वाराये भोजने अमात्रज्ञाताये पूर्वरात्रापररात्रं जागरिकायोगमननुयुक्ताये अगौरवाये सब्रह्मचारिषु स्थविरेषु नवकेषु मध्यमेषु कुलेषु चारिकां चरसि शस्यघातं विय मन्ये करोन्तो नायं कुमारको मात्रमाज्ञासि ॥ एवमुक्ते आयुष्मानानन्दो आयुष्मन्तं महाकाश्यपमेतदवोचत् ॥ अपि हि मे आ-

1. M °kte ânandar âyushmantaṁ e° cat sace° (l. 4). — 2. B °yushmâṁ kâçya°. — 4[1]. B °paḥ âyushmantaṁṁ â°. — 4[2]. BM °ced anyasi° B °yushmân â° BM °nando kati° M °thâgatânâ° B °tâ saṁmya° M °çrâvakânâ gaṇa° BM °ptaṁ tika(M °ko)bho° M °jñâtaṁ ca |.

7. B °yaṁ âyushmân ma° M °yaṁ âyushmâ kâçyapa âyushmantaṁ yena° B °shmantaṁ yena ° çyapaṁ e° M °çyapaṁ yeta ° pṛicchatâye |. — 8. BM °shmanto evaṁ ma°. — 10. BM °âyushmân ânanda(M °odo) a° M °rthavaçâ saṁ ° B °tâ saṁmya° M °tribhojanaṁ cânu°.

12[1]. B °dve yâ°. — 12[2]. B yâcad e° M yâvad evaṁ ku° BM °lânâṁ ca lakshâye gupti(M °pti)ye cchâsu° BM °mâ pâpâ ami° M °ghe karabha° B °ṇḍalavigra° M °grahavishâdaṁ° BM °detsuḥ ‖. — 14. BM °yushmân â° M °rthavasâ saṁ ° thâgatârha° B °rhatâ saṁmya° M °kânâṁ gaṇabhojanaṁ ca pravikshi° B °trikabhojanaṁ a°.

16. BM so taṁ âyushmân â° M °rshâye(?)tâye da ° ṇâye dri(?)driyeshva° B °ndriyeshu gu° M °athamâtra° B °trajñatâ° BM °yogam anu ° M °madhyeme° B °carasi saçyaghâ° M° ghâtaṁ vi ° roto nâ°. — 20. BM °ndo âyushmantaṁ mahâ° M °si vi paritâni jâ° BM ° ni ‖ atha° M °ca punar me â° BM °yushman ma° M °çyapaḥ ku ° ritavya manyâsi |.

युष्मन्महाकाश्यप शिरसि पि पलितानि जातानि अथ च मे पुनः आयुष्मान्महाकाश्यपो कुमारवादेन समुदाचरितव्यं मन्यति ॥ द्वितीयकं तृतीयकं पि आयुष्मां महाकाश्यपो आयुष्मन्तं आनन्दमेतदवोचत् ॥ तथा त्वमायुष्मनानन्द इमाये परिषाये इन्द्रियेष्वगुप्तद्वारताये भोजने अमात्रज्ञताये पूर्वरात्रापररात्रं जागरिकायोगमननुयुक्ताये अगौरवाये सब्रह्मचारीहि स्थविरेहि नवकेहि मध्यमेहि कुलेहि चारिकां चरसि शस्यघातं विय मन्ये करोन्तो न चाहं कुमारको मात्रमाज्ञासीत् ॥ द्वितीयकं तृतीयकं पि आयुष्मानानन्दो आयुष्मन्तं महाकाश्यपमेतदवोचत् ॥ अपि हि मे आयुष्मन्महाकाश्यप शिरसि पलितानि जातानि अथ च पुनर्मे महाकाश्यपो यावत्तृतीयकं पि कुमारकवादेन समुदाचरितव्यं मन्यति ॥

तेन खलु पुनः समयेन स्थूलनन्दा भिक्षुणी आयुष्मतः आनन्दस्य अनतिदूरे स्थिता अभूषि ॥ अथ खलु स्थूलनन्दा भिक्षुणी आयुष्मन्तं महाकाश्यपमेतदवोचत् ॥ किं पुनरार्यमहाकाश्यपो अन्यतीर्थिकपूर्वो समानो आर्यमानन्दं वैदेहमुनिं भगवतो उपस्थायकं भगवतः सन्तिकावचरं भगवतो संमुखं धर्माणां प्रतिग्रहेतारं यावतृतीयकं पि कुमारवादेन समुदाचरितव्यं मन्यति ॥ एवमुक्ते आयुष्मान्महाकाश्यपो आयुष्मन्तं आनन्दमेतदवोचत् ॥ सा हि नूनायं आयुष्मनानन्द भगिनी अभरमाणरूपा भाषति । किं पुनः आर्यो महाकाश्यपो अन्यतीर्थिकपूर्वो समानो आर्यानन्दं वैदेहकमुनिं भगवतो उपस्थायकं भगवतो सन्तिकावचरं भगवतो संमुखं धर्माणां प्रतिग्रहेतारं यावतृतीयकं प्रि कुमारकवादेन समुदाचरितव्यं मन्यति ॥ एवमु[274b]क्ते आयुष्मानानन्दो आयुष्मन्तं महाकाश्यपमेतदवोचत् ॥ क्षम आयुष्मन्त महाकाश्यप बालो मातृग्रामो अव्यक्तो अकुशलो अचेतको ॥ एवं यावत्तृतीयं पि आयुष्मान्महाकाश्यपो आयुष्मन्तमानन्दमेतदुवाच ॥ सा हि नूनायमा-

2. B dvitīyakatṛi°. — 3. BM °yushmān ā° B °māye indri° M °jāgarikāyo° BM °gam anuyu° hmacārīhi(M °ribhi) sthavirāya nava(M °vame)ke° kām carati sasya° M°ghātam viya manyam karo° ham kumāro mātrajñāmāsīt | B °kumārakā mātram ajñāsīt |.

7. B dvitīyatṛi° M °pi āyushmānando ā° çyapam̃m e°. — 8. BM °yushmān ma° M °çiramsi paritāni jā° B °jātāni ‖ atha° M °ni ‖ ava punar me āyushmān mahā° BM °manyeti ‖. — 10. B °sthūlāna° BM °bhikshūṇī M °shmato ā° nabhidūte sthi°.

11. BM °bhikshūṇī°. — 12. B °punau ārya° M °çyapa anya° nim̃ bhagavato santikām̃va° rmāṇā pra° BM °hetvāram̃° M °yāvattṛitī° B °vyam̃ anyeti ‖ M °manyeti ‖. — 14. M °m ukto ā°. — 15. BM °nūnam̃ yam̃ āyushmān ā° ramāṇām̃(B °nām̃) rūpām̃ bhā°.

16. M °punar āryyama° BM °pūrve sa° M °ryānam̃ndam̃ vaidehamu° grahetvā nam̃ yā° B °hetvāram̃ yā° kam̃ pi āyakam̃ kumāreka° M °rakāvādena°. — 19[1]. M °nandar āyu°. — 19[2]. M °yushmam̃ ma° mātugrā° BM °çalo akshatrajño e°. — 20. M °yāvatṛitīyakam̃ pi° çyapaḥ ā°.

21. BM sā hi nu(M °nū)nam̃ yam āyushmān ā° ramānarū°.

युष्मनानन्द भगिनी अक्षरमाणरूपा एवमाह । किं पुनरार्यो महाकाश्यपो आर्यानन्दं वैदेहमुनिं भगवतो उपस्थायकं भगवतो सन्तिकावचरं भगवतो संमुखं धर्माणां प्रतिग्रहीतारं संमुखा येव यावत्तृतीयं पि कुमारकवादेन समुदाचरितव्यं मन्यति ॥ तृतीयकं पि आयुष्मानानन्दो आयुष्मन्तं महाकाश्यपमेतदुवाच ॥ क्षम आयुष्मन्महाकाश्यप बालो मातृग्रामो अव्यक्तो अकुशलो अक्षेत्रज्ञो ॥

एवमुक्ते आयुष्मान्महाकाश्यपो आयुष्मन्तमानन्दमेतदवोचत् ॥ न खलु पुनरहमायुष्मनानन्द अभिजानामि पूर्वं प्रव्रज्यायां प्रव्रजितो इति बहिर्धा अन्यं शास्तारं व्यपदिशितुमन्यत्रैव तेन भगवता तथागतेनार्हता सम्यक्संबुद्धेन । मह्यं खल्वायुष्मनानन्द पूर्वं प्रव्रज्यायामप्रव्रजितस्य एतदभूषि । संबाधो पुनरयं गृहावासो रजसामावासो अभ्यवकाशं प्रव्रज्या । तं न लभ्यं अगारमध्यावसन्तेन एकान्तसंलिखितमेकान्तमनवद्यं परिशुद्धं एकान्तपर्यवदातं ब्रह्मचर्यं चरितुं । यन्नूनाहं अगारस्यानगारियं प्रव्रजेयं ॥ स खल्वहमायुष्मं आनन्द अनूनं गृहावासं प्रहाय अशीतिं हिरण्यसुवर्णस्य शकटवाहानवहाय पञ्च च दासशतानि पंच च दासीशतानि पंच च पशुशतानि पंच च ग्रामक्षेत्रशतानि एकूनं च हलसहस्रं भद्रां कापिलेयां सुवर्णक्षीरकां अवहाय एकं कर्पासिकं पटपिलोतिकमादाय ये लोके अरहंतो तेषामुद्दिश्य अनुप्रव्रजेहं ॥ तेन खलु आयुष्मनानन्द समयेन न कोचिदन्यो लोके अर्हन्तो अभूषि अन्यत्रैव तेन भगवता सम्यक्संबुद्धेन ॥ स चाहमायुष्मनानन्द तथा प्रव्रजितो समानो संवत्सरपरमाये रात्रीये अद्राक्षीद्द भगवन्तमन्तराय राजगृहस्य-बहुपुत्रके चेतिये । दृष्ट्वा च पुनर्मे अद्वयसंज्ञा उदपासि सम्यक्संबुद्धं पश्येयं भगवन्तमेव पश्येयं स[275a]र्वज्ञं च पश्येयं भगवन्तमेव पश्येयं सर्वदर्शिं च पश्येयं भगवन्तमेव पश्येयं अपरिशेषज्ञानदर्शनं च पश्येयं भगवन्तमेव पश्येयं ॥

1. B °vaidoha ° khaṁ dhamāṇāṁ° M °khâye yâva° B °ritavya manyanti | . — 4[1]. M °nandar âyushmaṁtaṁ ma° B °ntaṁ kâçya°. — 4[2]. M °kâçya bâro mâtṛigrâmar avya° B °bâlâ mâtṛi ° çalo akshatrajño | M °lo akshayajño || .

6[2]. BM °yushmân âna° B °jânâni pû° M °stâra vyaṁvadiçatu° B °nyatraṁ ca tena bha° nâhatâ sa ° ddhenâ ma°. — 8. M °yushmân ânanda pûrvapravrajyem apravraji°. — 9. M saṁbodho ° B °sâmâvâse a °. — 10. M ° ntena ekântaṁ saṁ ° dyaṁ ekântapari ° BM °ddhaṁ | e°.

11. M °syânagârariyaṁ pravrajyeyaṁ | . — 12. B °yushmam âna° M °yushmân ânanda alukhaṁ gṛihavâsa pra° B °ya açitiṁ hi ° çakaṭâ vâhana vahâya pa° M °çakaṭavâhana vahâ paṁca va dâsa° B °traçatâni | ekûna ca ha° M °ni | ekona vaṁhala ° bhadraṁ kâ° -rṇṇasaṁvikâ? ava ° B °rṇṇasamikâ ava ° karshâçikam paṭa° M °rpâçikaṁ° BM °ya || ye° M °arhanto teshâm udiçya anupravṛijyehaṁ || B °vrajyehaṁ || .

16. BM °yushmân â ° B °yena koci° M °yena na kvaci° BM °shi | a°. — 17. BM °yushmân â° M °jitaḥ samâ° BM °no samvatsa° B° ntarâ ca râja° BM °ke cetiye | . — 19. B °udu-

स खल्वहमायुष्मनानन्द येन भगवांस्तेनोपसंक्रम्य भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थासि एकान्ते स्थितो हमायुष्मनानन्द भगवन्तमेतदवोचत् ॥ शास्ता मे भगवां श्रावको ऽहमस्मि सुगते ॥ एवमुक्ते आयुष्मनानन्द भगवां मम एतदुवाच ॥ एवमेव काश्यप अहं काश्यप शास्ता त्वं च मे श्रावको । यो हि कोचित्काश्यप एवं सर्वचेतोसमन्वागतं श्रावकं अभित्वासम्यक्संबुद्धो एव समानो सम्यक्संबुद्धो ति प्रतिजानेय असर्वज्ञो येव समानो सर्वज्ञो ति प्रतिजानेय असर्वदर्शावी येव समानो सर्वदर्शावीति परिशेषज्ञानदर्शनो येव समानो अपरिशेषज्ञानदर्शनो ति प्रतिजानेय सप्तधा वास्य मूर्धा भवेया ॥ अहं खलु पुनः काश्यप सम्यक्संबुद्धो इति येव समानो सम्यक्संबुद्धो ति प्रतिजानामि सर्वज्ञो येव समानो सर्वज्ञो ति प्रतिजानामि सर्वदर्शावी येव समानो सर्वदर्शावीति प्रतिजानामि अपरिशेषज्ञानदर्शनो येव समानो अपरिशेषज्ञानदर्शनो ति प्रतिजानामि ॥ अभिज्ञाय अहं काश्यप श्रावकाणां धर्मं देशयामि न अनभिज्ञाय । सनिदानं अहं काश्यप श्रावकाणां धर्मं देशयामि न अनिदानं । सप्रातिहार्यं अहं काश्यप श्रावकाणां धर्मं देशयामि न अप्रातिहार्यं ॥ तस्य मे काश्यप अभिज्ञाय श्रावकाणां धर्मं देशयतो न अनभिज्ञाय सनिदानं श्रावकाणां धर्मं देशयतो न अनिदानं सप्रातिहार्यं श्रावकाणां धर्मं देशयतो नाप्रातिहार्यं करणीयो ओवादो करणीया अनुशासनीति वदेमि ॥ तस्मादिह ते काश्यप शिक्षितव्यं ॥ किं त्वहं प्रातिमोक्ष-

pâ° BM °ddhaṁ paçyeyaṁ bhagavatam eva(M °vaṁ) paçye ° ntam eva(M °vaṁ ca) pa ° darçi ca pa ° ntam eva(M °vaṁ ca) paçye° M °riçyesha°.

1. M °ham ânanda âyushmân â° B °yushmân â° M °gavânstenopasaṁkramitva bhagavato pâ ° si ekâṁtasthitaḥ aham â° BM °yushmân â° M °nandam eta°. — 3¹. B °vakaḥ 'ham asmiṁ su° C °ko ham a ° gataḥ ‖. — 3². B °yushmân â°. — 4¹. M evaṁm evaṁ kâ° B °m evaṁ kâçyapo a° BM °ko yo°. — 4². M °hi kvaci° B °çyapam evaṁ° M °ceto si sa° B °tosamaṁnvâ° M °tvâsamyaksaṁbuddham eva° BM °buddheti prajâ° M °neya ‖ atha sarvajño yeva sarvajñeti° BM °pratijânâni ya (B °nomi yaṁ) asarvadarçivî ye ca samâ° M °rvadarçivî ti pratijânâmi | ye ca pariçeshaṁjñânadarçanâye ca samâno apariçeshajñânadarçano ti prajânâmi | a° (l. 11) B °rçâvîti apariçeshajñânadarçanâ ti pra° dhâ câsma mûrddhnâ bha°.

8. B °pa samyaksaṁbodhi iti | ye ca samâ ° mi sarvajño ye ca samânâ sarva ° darçâvî ye ca samâ ° rçano yeva samâ ° prajânâmi |. — 11. M °dharma de° B °mi | na° M °mi nâbhi° B °ya sa°. — 12. M °dharma de° B °mi | na° M °anidâninaṁ B °naṁ sa°. — 13. B °prâhâryaṁ a° M °dharma de° B °mi | na° M °hârya B °ryaṁ ta°. — 14. BM °pa abhijñâye çrâ° M °dharma de° BM °jñâya sannidâ ° kâṇâṁ dhamaṁ(M °dharma) deçayato (M °toḥ |) ani° B °naṁ saṁprâ° BM °to na prâti° B °do araṇîyo anu° M °çâsatîti°.

17. M ki ca haṁ° B °prâtimomokshasamvara° M °kshasamvavṛinto vi ° mpannaṁ anumâ° B °anumâtreshvevadye° M °treshvabandheshu° BM °kshishyan ti çikshâ° M °ddheṇa pa° B °jîvâ ‖.

9304

संवरसंवृत्तो विहरिष्यं आचारगोचरसम्पन्नो अणुमात्रेष्वावद्येषु भयदर्शावी समादाय शिक्षिष्यं ति शिक्षापदेषु कायकर्मवाचाकर्ममनोकर्मेण समन्वागतः परिशुद्धेन परिशुद्धाजीवो ॥ एवं ते काश्यप शिक्षितव्यं ॥ तस्मादिह ते काश्यप एवं शिक्षितव्यं ॥ किं त्वहं षड्सु इन्द्रियेषु गुप्तद्वारो विहरिष्यामीति आरक्षास्मृति निध्यापकस्मृतिः समव[275b]स्थाविहारी आदीनवदर्शावी निःशरणः प्राज्ञो आरक्षेन चेतसा समन्वागतः । सो चक्षुषा रूपं दृष्ट्वा न च निमित्तग्राही भविष्यन्न चानुव्यंजनग्राही । यतो अधिकरणं च मे चक्षिन्द्रियेण असंवृतस्य विहरन्तस्य अभिध्या दौर्मनस्यमनेके पापकाः अकुशला धर्माः चित्तं अनुप्रावेन्सुः तेषां संवराय प्रतिपदिष्यामि रक्षिष्यामि चक्षिन्द्रियेण संवरमापदिष्यामि इति ॥ एवन्ते काश्यप शिक्षितव्यं ॥ श्रोत्रेण शब्दां श्रुत्वा घ्राणेन गन्धां घ्रायित्वा जिह्वया रसां स्वादयित्वा कायेन प्रष्टव्यां स्पृशित्वा मनसा धर्मा विज्ञाय न च निमित्तग्राही विहरिष्यामि न चानुव्यंजनग्राही विहरिष्यामि । यतो अधिकरणं च मे भवेन्द्रियेण असंवृतस्य विहरतो अभिध्या दौर्मनस्यं अनेके पापकाः अकुशला धर्मा चित्तमनुप्रावेन्सुः तेषां संवराय प्रतिपदिष्यामीति रक्षिष्यामि मनिन्द्रियं मनिन्द्रियेण संवरमापदिष्यामीति ॥ एवन्ते काश्यप शिक्षितव्यं ॥ तस्मादिह काश्यप एवं शिक्षितव्यं ॥ किन्ति मे कायगता स्मृतिः सुखसहगता सततसमितं कायं न जहिष्यामीति ॥ एवं ते काश्यप शिक्षितव्यं ॥ तस्मादिह ने काश्यप एवं शिक्षितव्यं ॥ किन्ति अहं ये केचित्कुशला धर्मा पर्यापुणिष्यन्ति सर्वन्तं आत्मदमथशमथपरिनिर्वाणार्थं ति । एवं ते काश्यप शिक्षितव्यं ॥ तस्मादिह ते काश्यप एवं शिक्षितव्यं । किन्ति मे

3¹. B °káçya çi° M °tavyaḥ | B °vyaṁ ta°. — 3². B °ha to kā°. — 4. BM kiṁ nvahaṁ° B °dvāre vi° M °shyāmi iti å° BM °dhyāpakasmṛitiḥ° M °samavasyāvi ° dinavaṁ da° BM °ḥçaranaḥ(M °ṇa) prājño ārakshe(M °ksha)ṇa ce° nvāgataḥ(M °to) so ca°.

6. B °ttagrāhi bha° M °vishyaṁ | na cānuvyaṁjanaṁgrāhi ya° B °hi ya°. — 7. B °to abhikara° M °cakshveṁndriyena asaṁ° BM °vṛittasya vi° M °ntasya avidyā daurmanasyāneke pāpakāç cittaṁ° BM °anuprā(M °pra)vetsuḥ || teshāṁ saṁvarā° M °cakshvadriyena saṁ° B °ṇa saṁvaram āpayishyā° M °mi dati | . — 10. B çroteṇa ça° kāyenaṁ prashṭa° M °kāyena praspṛishṭa° BM °manasāṁ dharmāṁ(M °rmaṁ) vijñā° M °ttagrāhi viharishyāmi | na vānu°.

12. BM °bhavendriyāṇāṁ saṁ(M °sa)hatasya vihato abhi° M °pāpakā aku° nupravetsuḥ | te° B °vetsuḥ te° BM °shāṁ saṁvarāye pratipa(B °padyi)shyāmiti ramishyāmiti (B °shyāmi manindriyaṁ) mani(B °nī)ndriyeṇa saṁva(M °na sava)ram å°. — 15². B °vyaṁ ki°.

16¹. M kiṁti me° B kintu me° M °kāmaga°. — 17¹. M °çyapa çi°. — 17². M kiṁati° smā paryayishya° B °ryāpraṇi° M °tmadamathaparinirmāṇā° B °ti e°. — 19¹. BM °kāçya çi°. — 19². M °çyapa çi°. — 19³. M ki me caturhi parishyāhi° B °shyati || a° M °hrīyāpaprāpyaṁ° sthitāni | B °tāni e°.

चतुर्हि परिषाहि भविष्यति अधिमात्रं प्रेमं च गौरवं च ह्री चापत्राप्यं च भावना च प्रत्युपस्थिता ति ॥ एवन्ते काश्यप शिक्षितव्यं ॥ तस्मादिह ते काश्यप शिक्षितव्यं ॥ किन्त्वहं पंचसु उपादानस्कन्धेषु समुदयास्तंगमानुपश्यी विहरिष्यं । इति रूपं इति रूपसमुदयो इति रूपस्यास्तंगमो इति वेदना इति वेदनासमुदयो इति वेदनास्तंगमो इति संज्ञा इति संज्ञासमुदयो इति संज्ञास्तंगमो इति संस्कारा इति संस्कारसमुदयो इति संस्काराणामस्तंगमो इति विज्ञानं इति विज्ञानसमुदयो इति विज्ञानास्तंगमो इति ॥ एवन्ते काश्यप शिक्षितव्यं ॥ स खल्वहमायुष्मन्नानन्द भगवता इमिना अववादेन अववादितो अष्टाहमेवाभूषि शैक्षो सकर[276b]-णीयो नवमे चैवाज्ञामारागये ॥

तस्य मे आयुष्मनानन्द भगवां इमिना अववादेन अववादित्वा उत्थायासनातो प्रक्रामि ॥ स खल्वहमायुष्मनानन्द भगवन्तं गच्छन्तं पृष्ठिमेन पृष्ठिमं समनुबद्धो हं ॥ तस्य मे आयुष्मन्नानन्द भगवन्तं पृष्ठिमेन पृष्ठिमं समनुबद्धस्य एतदभूषि । अहो भगवां पुनर्मार्गादपक्रम्यान्यतरं वृक्षमूलं निश्राय तिष्ठे । प्रज्ञापयेयं अहं भगवतो कर्पासिकपटपिलोतिकसंघाटीं ॥ तस्य मे आयुष्मन्नानन्द भगवानिदमेवरूपं चेतसो परिवितर्कमाज्ञाय मार्गादपक्रम्यान्यतरं वृक्षमूलं निश्राय अधिष्ठासि ॥ प्रज्ञापयेदहमायुष्मनानन्द भगवतो कर्पासानां पटपिलोतिकसंघाटीं निषीदि भगवां प्रज्ञप्त एवासने ॥ निषद्य खल्वायुष्मन् आनन्द भगवां एतदुवाच ॥ सखिना

3[1]. BM kinvahaṁ° M °upâdanaska ° mupâdâyastaṁ° B °mudayâdastaṁ° M °shyaṁti°. — 3[2]. M iti rûpaṁ samu° B °paṁ i rûpasa ° danâ iti | vedanâsamu ° jñâ iti saṁjñâ iti saṁjñâ samudayo iti saṁstaṁga° M °râ iti saṁskârâsamudayo iti saṁskârâm astaṁgamo iti vijñânasamudayo iti vijñânâstasamudayo iti || .

7[1]. M evaṁ te kha°. — 7[2]. M °yushmân ânanda itinâ o° B °shi || çai° M °shi | çikshâ karaṇîya na ca me° B °yo na ca me° BM °ye âjñâ°. — 10. B °yushmân â° M °yushmânanda bha ° tthâyâsanâmne pra°.

11. B °lvayam â° BM °yushmân â ° ntam pṛishṭime ° bandhe(M °ndho) haṁ || . — 12. B °yushmânn â° M °yushmân âna° BM °gavato(B °nto) pṛishṭimena pṛishṭhi(B °shṭi)-maṁ° B °bandhasya° M °bandha santad a°. — 13[1]. M °punah mârgâ° B °r mâgâd a° M °laṁ viçrâyati | ti° BM °shṭhe pra°. — 13[2]. B prajñepayeyaṁ | a° BM °rpâsikaṭâpilâtikasaṁ° M °ghâṭî | B °ṭiṁ nishi° (l. 16). — 14. M °me | âyushmâñn â ° jñâya mâjñâd apa ° laṁ tiçrâya a°. — 16. M aprajñâ ° yushmân â ° rpâçânâ paṭapiloṭikasaṁghâṭi nishidet | bha° B °shida bha° BM °sane ni°.

17[1]. B °shadya | kha° M ° dya || atha kha° BM °yushmân â°. — 17[2]. BM °khud ayaṁ (M °yai) kâçyapa karpâ(B °parkâ)çânâṁ paṭâ(M °ta)piloti(M °tika)saṁ° M °ghâṭi la° (l. 4) B °ghâṭi mṛidukâdayaṁ kâçyapa karpâsânâṁ paṭâpiloṭikasaṁghâṭi masinâdayaṁ kâçyapa karpâsânâṁ paṭâpilotikasaṁghâṭi sukhamâdayaṁ kâçyapa karpâsânâṁ paṭapilotikasaṁghâṭi tanukâdayaṁ kâçyapa karpâsânâṁ paṭapilotikasaṁghâṭi° BM °lahu(M °ghu)kâdayaṁ(M °ya)

सुदरं काश्यप कर्पासानां पटपिलोतिकसंघाटी मृदुकाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी मसिनाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी सुखमाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी तनुकाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी श्लक्ष्णकाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी सुकृतिकाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी प्रह्लाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी शोभनाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी सर्वांगनाद्यं काश्यप कर्पासानां पटपिलोतिकसंघाटी ॥ स खल्वहमायुष्मन् आनन्द भगवन्तमेतदुवाच ॥ लाभा मे भगवन्सुलब्धा भवेत् यन्मे भगवान्कर्पासानां पटपिलोतिकसंघाटीं प्रतिगृह्णेय ॥ एवमुक्ते आयुष्मन् आनन्द भगवान्मम एतदुवाच ॥ इच्छसि पुनः त्वं काश्यप तथागतस्य सन्तिके शाणानां पांशुकूलानां संघाटीं धारयितुं ॥ एवमुक्ते हं आयुष्मन् आनन्द भगवन्तमेतदुवाच ॥ लाभा मे भगवन्सुलब्धा भवेत् यन्मे भगवां शाणानां पांशुकूलानां संघाटीं ददेय ॥ अदासि खलु मे आयुष्मन्नानन्द भगवां शाणानां पांशुकूलानां संघाटीं प्रतिगृह्णे अहमायुष्मन्नानन्द भगवतो शाणानां पांशुकूलानां संघाटीं ॥ यचे खल्वायुष्मन्नानन्द सम्यग्वदमाना वदेन्सुः भगवतो श्रावको शास्तु संमुखं शाणं पांशुकूलं प्रतिग्रहे एवमेव ते सम्यग्वदमाना वदेन्सुः । तत्कस्य हेतोः । अहमायुष्मन्नानन्द शास्तु संमुखं शाणपांशुकूलानां प्रतिग्रहीता[२७६b]रो श्रावको ॥ यत्तदानन्द सम्यग्वदमाना वदेन्सुः भगवतो पुत्रो

kâçyapa karpâsânâm̃(M °çânam̃) paṭa° M °karpâçânâm̃ pa° çlakshṇada° karpâçânâm̃ ço° BM °bhanâdayam̃(M °dam̃) kâçyapa karpâsâ(M °çâ)nâm̃ paṭapilotikasam̃(B °nâm̃ sam̃)ghâ°.

7. M °lvaham ânandam âyushmâm̃ bhagavam̃tam e° B °yushmân â°. — 8. M °bhagavat sulabdhâ° bhavetsuḥ yam̃ me bhagavâ° B °bhavetsuḥ | yan te bhagavan ka° M °rpâçânâm̃° BM °gṛihneya ‖. — 9¹. BM °yushmân â°. — 9². BM °çyapas tathâ° M °ntike keçaçyânâm̃ pâm̃dukûlam̃ sam̃° B °kûlam̃ sam̃° M °ghâṭi dhâ°. — 10. M °kte â° BM °yushmân â°.

11. M °vat sulabdhâ bhavetsuḥ yam̃ me bhagavan keçâṇâ° B °vensuḥ | yan me bhagavâm̃ keçâṇâ° BM °deya | (M °yâ) avâsi(M °si |) khalvaham â(B °m âyushmân â)nanda karpâsâ(M °çâ)nâm̃ paṭapiloti(M °ṭi)kasam̃ghâṭim̃ pratigṛihne(M °hne |) âyushmân ânanda bhagavâm̃ karpâsâ(M °vân kârpâçâ)nâm̃ paṭapilotikasam̃ghâṭim̃ adâ°. — 12. BM °si | kha° M °me ânanda âyushmâm̃ bhagavân kaçmaçânâm̃ pâm̃° gṛihnate | a° B °gṛihne | aham ânandam âyushmam̃ bha° M °yushmân â° vato kaçmaçânâm̃ pâm̃° B °to çânam̃ pâm̃° BM °çukulâ° ṭim̃ same | (M °samo ‖) kha°. — 14. M °yushmân â° B °gvadamâmânâ° BM °detsuḥ bha° çrâvaka çâ° M °kham̃ keçânam̃° BM °kûlânâm̃ pra° M °tigṛihne | ayam evam̃ te° B °he | ayam e° M °damâna va° BM °detsuḥ ‖.

16¹. M °hetor aha°. — 16². M °yushmân âna° kham̃ keçânâm̃ pâm̃çukulanâm̃° B °çâṇam pâm̃° M °tigṛihe° vakâm̃ |. — 17. BM °detsuḥ ‖ bha° M °tro osaro mu° jâto dharmayo dharmanirmito dharmadâyodâ na â° BM °do mama evam̃(B °va) te sa° B °detsuḥ ‖.

औरसो मुखतो जातो धर्मजो धर्मनिर्मितो धर्मदायादो न आमिषदायादो एवमेव ते सम्यग्वदमाना वदेन्सुः । तत्कस्य हेतोः । अहमायुष्मन् आनन्द भगवतो पुत्रो औरसो मुखतो जातो धर्मजो धर्मनिर्मितो धर्मदायादो न आमिषदायादो ॥ कुंजरं पि सो आयुष्मन् आनन्द षष्टिहायनं तालपत्रिकाये छादितव्यं मन्येय यो मे तिस्रो विद्यां षडभिज्ञा बलवशीभावं छादयितव्यं मन्येया । नदीयो पि सो आयुष्मन् गंगाये स्रोतं रजमुष्टिना आवरितव्यं मन्ये यो मे तिस्रो विद्यां षडभिज्ञां बलवशीभावं छादयितव्यं मन्ये । वातं पि सो आयुष्मन्नानन्द जालेन बन्धितव्यं मन्ये यो मे तिस्रो विद्यां षडभिज्ञां बलवशीभावं छादयितव्यं मन्ये । आकाशं पि सो आयुष्मन् आनन्द पञ्चांगुलं कर्तव्यं मन्ये यो मे तिस्रो विद्या षडभिज्ञा बलवशीभावं छादयितव्यं मन्ये ॥ यस्य पुनः खलु आयुष्मन्नानन्द इमेषां पंचानां भिक्षुशतानां स्यात्कथि कांक्षा विचिकित्सा वा सो प्रश्नं पृच्छतु अहं प्रश्नस्य व्याकरणेन एवमेतं सम्यक्सिंहनादं नदामि ॥ एवमुक्ते ते भिक्षू आयुष्मन्तं महाकाश्यपमेतदुवाच ॥ यस्य खलु पुनरायुष्मन्महाकाश्यप स्यात्कांक्षा वा विचिकित्सा वा सो आयुष्मन्महाकाश्यप प्रश्नं पृच्छेया संभावेम च वयमायुष्मन्महाकाश्यप एवं च अनुवृत्ता अतो च उत्तरि भूयो अतो च श्रेयो ॥ अथ खलु आयुष्मां महाकाश्यपस्तां भिक्षू धर्म्यां कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा उत्थायासनातो प्रक्रमे ॥

अचिरप्रक्रान्तो च आयुष्मान्महाकाश्यपो सर्वावन्तेन कालेन नागावलोकितेन स्थूलनन्दां भिक्षुणीं अवलोकेति अपि नाम चित्तं प्रसादेय तस्य चेदं शकटचक्र-

1[1]. M °sarve taṁ ma ° lena âpihiti | . — 1[2]. B °opayituṁ nâ ° aparidhyituṁ | M °aparadhyituṁ. — 2. B °taketi° M °takehi kathaṁ ° rishyaṁ ti. — 3[1]. M °bhûmi | B °shi ya°. — 3[2]. M yaṁ nûnâhaṁ evaṁ patthâ raksheya ye° B °haṁ | etaṁ panthâ raksheya ye° M °ktaṁ astripîyati | . — 4. BM yataḥ panthâ(M yato yathâ)to taṁ paçyati râjño allipîyati tataḥ panthâ(M °llipîyati | tato paṁthâ)to taṁ paçya° B °ntaṁ | o° M °pîyaṁtaṁ odanaṁ vyaṁjanaṁ vâ mânsaprakâçi vâ khajakaṁ ° nyaṁ vâ kaṁcid bhakshyaṁ | ta° B °nyaṁ vâ kecid bhajyaṁ vâ || ta°.

6. M °âṇantaṁ eteshâṁ sarveshâṁ pa° B °bhojananabhâ° M °bhojanabhâṁjanânâṁ vidhâ°. — 7. BM °bhojaṁ(B °janaṁ) pariveçakehi âpihitvâ°. — 9[1]. B °to saḥ kâ° M °kâkena bhûyo na ça°. — 9[2]. BM °shi ka°. — 9[3]. B °bhâryâyo bhû° M °ye bhûtâ râ°. — 10. B °ni yan râjâ° BM °sto apakrânto de° M °valâbhi pre° BM °shati | tato(M °taḥ) ce ° rati râ°.

12[2]. M ato de ° kavarehi pra° B °venlya°. — 13[1]. M °âṇantâṁ. — 13[2]. M °veçiyantâṁ api° B °veçiyantânâṁ apyidhâ ° dethaḥ || . — 14. BM °jño kâko bra° B °gurushaṁ a° M °marsha saṁ°. — 15. M °sho kâko dhûrto mu° B °sâhasriko° M °stehi purushehi na ça° B °çakyeti ra° M °tuṁ | anantaraṁ dṛi°.

16[1]. BM °ttaṁ yo°. — 16[2]. B °lîyeyan tasya° M °lîyeyaḥ tasya vipulaṁm abhicchâdanaṁ tasya dadeyaṁ° B °cchâdayaṁ tasya dadayeyaṁ sa°.

अपरा दानि चेटी राज्ञो ब्रह्मदत्तस्य अर्पयतो स्वकाये देवीये कवलं आदाय वस्त्रेहि अपिहित्वा गच्छति । सा दानि तेन काकेन दृष्टा । तस्य एतदभूषि । कथं अतो चेटीय हस्तातो भोजनं हरेयं । यन्नूनाहं अस्या चेटीये नासाये लगेयं ततः सा चेटी अस्या इमं भोजनं उज्झिष्यति ततो अहं यं तं भोजनं गृह्य गमिष्यामि ॥ सो दानि येनाभूद्द्वासी ओपतित्वा ताये चेटीये नासे लग्नो । तत्र नासे व्रणो वतो । चेटीये भीताये भोजनमुज्झित्वा सो काको उभयेहि हस्तेहि गृहीतो ॥ सा दानि चेटी काकमादाय नासाय रुधिरेण घरन्तेन राज्ञो ब्रह्मदत्तस्य उपसंक्रान्ता । अयं सो दुष्टकाकः गृहीतो ॥ सो दानि राजा ब्रह्मदत्तो तस्या चेटीये प्रीतो संवृत्तो । शोभनं ते कृतं यं त्वया एषो काको गृहीतो ॥ तेन दानि राज्ञा ब्रह्मदत्तेन ताये चेटीये विपुलो आच्छादो दिन्नो ॥ सो च काको परिभाषियति । न शोभनं यं त्वं राजकुलं पि धर्षयसि ॥ सो दानि काको राजानं ब्रह्मदत्तं गाथाये अध्यभाषे ॥

वाराणस्यां महाराज काकराजा निवासितो ।
अशीतिकाकसहस्रेहि सुपात्रो परिवारितो ॥
तस्य दोहलिनी भार्या सुपार्श्वा मांसमिच्छति ।
राज्ञो महानसे पक्वं प्रत्ययं राजभोजनं ॥
तस्याहं वचनं श्रुत्वा करन्तो अनुशासनीं ।
भर्तुरपचितिं कृत्वा नासाये अकरि व्रणं ॥

अथ खलु भिक्षवः राजा ब्रह्मदत्तो तस्य काकराजामात्यस्य प्रीतो संवृत्तो । इमस्य काकराजामात्यस्य तस्य काकराजस्य सकाशातो नैव ग्रामो न भोगो नापि

1. M apara dâ ° sya aparakâte sva° B °sya apakâte sva°. — $2^1$. BM °kâlena dṛishṭvâ ta°. — $2^2$. M tasyaita°. — $3^1$. B °reyaṁ ya°. — $3^2$. BM yannû(M yaṁ nû)nâhaṁ asya ca ye nâsâ ° gneyaṁ | tataḥ° B °ujhishya° M °ujhishyati tataḥ a° BM °haṁ yato bhojanaṁ gri°. — $5^1$. B °ni yenâbuddhasyo o° M °ni yenâbudhasya o ° nâso la° BM °gno ta°. — $5^2$. M °vraṇo kshâṇo B °kshaṇo ce°.

6. M °bhojanaṁ âjhitvâ ‖ so° B °bhojanam ojhitvâ ‖ so° BM °stehi sâ dâ°. — 7. B °ṭi kâkâṁm â° BM °nâçâya ru° B °krânto | M °krântâḥ ‖ . — $8^1$. M °so deva dusto kâko gri°. — $8^2$. BM °tasya ce° B °vṛitto ço°. — $9^1$. M sobhanaṁ° BM °to te°. — $9^2$. M °râjño bra°. — 10. M °shiyanti | B °yati na ço°.

$11^1$. M na sobhana yaṁ° B °dharshayesi | . — $11^2$. B °ko râjñaṁ bra° M °ko râjaṁbra°. — 13. BM °kâjarâjanivâsiko ‖ (M °site). — 14. B °suyâtro° M °suprâpto pa°. — 15. M °dohariṇî bhâryâ supârçve mâ°.

18. M bhartu apacituṁ kṛi° B bhartuṁ apacintiṁ kṛitvâ nâçâye akari praṇaṁ | M °nâçâyeshu kari vraṇa ‖ . — 19. M °kshavo râjâ brahmadanto tasya kâkasya râjâmâ° B °tto i°. — 20. M imaṁsya kâkarâjâ ° pi ca atya kvaci° BM °ttiḥ sva°.

च अन्या काचिद्वृत्तिः । स्वकेन तुण्डेन वृत्तिं पर्येषन्तो आत्मत्यागं तस्य काकराजस्य कार्यं करोति ॥ अथ भिक्षवो राजा ब्रह्मदत्तो अमात्यपार्षद्यां गाथाये अध्य[299b]भाषे ॥

एतादृशो अरहति राजभोगं हि भुंजितुं ।
यथायं काकराजस्य प्रह्व आमरणाद्द्विजो ॥

तस्य दानि काकस्य राज्ञा ब्रह्मदत्तेन दैवसिकं राजभोजनं अनुज्ञातं । राजभोजनस्य प्रत्ययस्य नानाप्रकारस्य पूरं भाजनं कृत्वा तस्य काकस्य अर्थाये एकान्ते क्षिप्यति अतः तं दैवसिकं स्वयं च भुंजेसि काकराजस्य च हरेसि ॥ परिवारस्य आणत्तं । न केनचिदेतस्य काकस्य राजकुलं गच्छन्तस्य वा आगतस्य वा किंचिद्व्याघातं उत्पादयितव्यं ॥

भगवानाह ॥ स्यात्खलु पुनर्भिक्षवो युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन सुपार्श्वो नाम काकराजा अभूषि । न खल्वेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स काकराजो अभूषि ॥ या काकराजस्य भार्या सुपार्श्वा नाम सा एषा यशोधरा अभूषि ॥ यश्च काकराजस्य अशीतीनां काकसहस्राणाममात्यो अभूषि एष स कालोदायी स्थविरः ॥ यो भूद्राजा ब्रह्मदत्तः स एष राजा शुद्धोदनो अभूषि ॥ तदापि एषो एतेन प्रसादितो एतरहिं पि एष एतेन प्रसादितः ॥

काकजातकं समाप्तं ॥

भिक्षू भगवन्तमाहन्सुः ॥ पश्य भगवन् कथमियं महाप्रजापती भगवतो शोकेन अन्धा संजाता भगवन्तं चागम्य अनन्धा संजाता ॥ भगवानाह ॥ न भिक्षवो एतरहिमेव एषा महाप्रजापती मम शोकेन कारुण्येन च अन्धा संजाता मम एव

1. B °vṛittiyaṁ pa° M °ttiṁ saṁparye°. — 2. M atha khalu bhi°. — 4. BM °ço aharati(B °ti |) râjabhogâṁ(M °gaṁ |) hi ° tuṁ ya°. — 5. BM °sya prâṇamâraṇâdvijo | .

$6^{1}$. M °kâkarâjño bra° B °ttena devasi° M °anusâjñâtaṁ | . — $6^{2}$. M râjabhâjanasya pratyaṁgra° BM °prakâraṁtasya pûraṁ bhojanaṁ° M °ekânte prakshipati ato taṁ dai° harati | . — 8. M °âṇantaṁ B °ttaṁ na°. — 9. M °gacchantaṁsya vâ â° B °cchantaṁ tasya vâ agantasya vâ kiñcid vyâ° M °kiṁ vidyâghrâtaṁ u°.

$11^{2}$. M °kshavaḥ yu° B °bhiśhi na kha°. — $12^{1}$. M °vaṁ taṁ devaṁ drashṭu tat ka°. — $13^{1}$. M °râjâ a°. — $13^{2}$. M so dâni kâka ° rçvâ nâma esho yaço° abhâ yo°. — 14. M yasya kâkarâ ° çîtinâṁ° BM °shi ‖ e° M °sthaviro B °raḥ yo°. — 15. M °hmadanto sa°.

16. M °hiṁ pi esha etena prasâditar iti ‖ . — 17. M iti çrîmahâvastuavadâne kâ°. — $18^{1}$. M bhikshur bhaga ° m âhaṁsuḥ ‖ . — $18^{2}$. M °saṁjâto ‖ . — $19^{1}$. BM °hiṁ evam eshâ ° ruṇye(M °ṇe)na ca saṁjâtâ(M °to) mama eva° M °jâto ‖ .

चागम्य अनन्धा संजाता । अन्यदाप्येषा महाप्रजापती मम आगम्य अनन्धा संजाता ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवः ॥

भूतपूर्वं भिक्षवः अतीतमध्वाने हिमवन्तपार्श्वे चण्डगिरिर्नाम पर्वतो तस्य दानि पार्श्वे महन्तो वनखण्डो वृक्षसहस्रेहि पुष्पफलोपेतेहि संछन्नो पद्मिनीहि च आश्रमेहि च उपेतो ऋषिगणानुचीर्णो प्रान्तो प्रविविक्तो ॥ तत्र महान्तं हस्तियूथं प्रतिवसति षड्दन्तकुलं ॥ तहिं आजनियो हस्तिपोतो जातो षड्दन्तो इन्द्रगोपकशीर्षो सप्तांगसुप्रतिष्ठितो कुमुदवर्णो । सो यदा संवर्धितो तदा मातां गुरुगौरवेण प्रेमेण च परिचरति । तस्या पूर्वं भोजनं पानीयं च दत्वा पश्चादात्मना परिभुंजति कालेन च तां कालेन उद्वर्तशरीरायां वन[300ᵃ]लतायां परिमार्जति स्नापयति ॥ एवं सो हस्तिपोतो सावहितं प्रसादेन प्रेमेण च गौरवेण च सर्वकालं जनेत्रिं परिचरति ॥ सो दानि कदाचित्तां मातुं स्नापयित्वा परिविषित्वा आसितां ज्ञात्वा गजगणेन सार्धं चरन्तो बाह्येन निर्गतो ॥ सो दानि मृगलुब्धकेहि मृगव्यं अटन्तेहि दृष्टो तेहि गत्वा काशिराज्ञो निवेदितं । देव अमुत्र वनखण्डे एदृशो गजपोतको प्रतिवसति प्रासादिको दर्शनीयो देवस्य योग्यो भवेय ॥

अथ खलु भिक्षवः काशिराजा तेषां लुब्धकानां श्रुत्वा सबलवाहनो तं वनखण्डमागमे ॥ तेन स हस्तिपोतो वनखण्डातो निगृह्य अपराहि करेणुहि परिवारितो वाराणसीं प्रवेशितो हस्तिशालायां च धावितो ॥ तस्य दानि राज्ञो

1. B °pyesho mahâ° M °pyeshâṁ mahâ°. — 2[1]. BM bhikshu â° M °haṁsuḥ ‖. — 2[2]. B °dâbhi bha° M °gavân ‖. — 3[1]. M etacahim evaṁ eshâ mahâprajâpati mama çokena kâruṇyena ca saṁjâto mama eva câgamya anaṁdhâ saṁjâta ‖ anyadâpyesha mihâprajâpatiḥ mama âgamya anandhâ saṁjâtâḥ ‖ bhikshu âhaṁsuḥ ‖ anyadâpi bhagavan‖ bhagavân âha ‖ anyadâpi bhikshavo bhû° B °kshavaḥ bhû°. — 4. M °ntapârçve caṁḍagiri nâma parvato ‖ tasya ° rçve mahaṁto vana° B °ni pârçve mahato vanakhaṇḍe vṛi° M °phalope ° çramehi ye u° B °ṛishiga° BM °kto ta°.

6. M °ti ‖ shaddaṁtaku° B °laṁ ta°. — 7. M tehi â ° poto japto sha ° saptâge su° BM °pratishṭito ° rṇṇo so°. — 8. M °to ntadâ so tâṁ gu° B °dâ mâtâ gu° M °ṇa ca pre°. — 9. BM tasya pû ° ca datvâ pa ° bhuṁjanti kâ ° rirâ yâva na (M °nna) lâbhâyâṁ pa ° rjati sthâpayati | .

11. B °stipâto sarvehito pra° M °stiposo sarvehitaṁ pra ° premanena ca gau° B °janestriṁ pa°. — 12. BM °cit taṁ mâ ° viçitvâ âsitaṁ jñâ° M °ṇena ca sâ° BM °hyeṇa ni°. — 13. B °vyaṁ aṇṭhakehi dṛishṭvâ te° M °vyaṁ akaṁṭhakehi dṛishṭâ te ° râjñâ ni°. — 14. M °amuka vana ° gajayoto pra° B °gajapâtako ° ti ‖ prâ° M °veyâ ‖ .

16. M °kshavo kâçi ° balo savâha° B °balo havâha ° khaṇḍa âgame te° M °khaṇḍa âgamantena so ha°. — 17. B °vanashaṇḍâ° M °vanakhaṁḍâto ° apare kareṇu° B °apare vareṇu° BM °veçitvâ hastiçâ ° ca dhâvito ta°.

भवति । भद्रको मे अयं यानो भविष्यतीति ॥ सो दानि सर्वसत्कारेहि सत्कियति स्वयं राजा तस्य भोजनं च पानीयं च ददाति । तस्य तं सर्वसत्कारं न प्रीणयति शोकेन तां मातरं अनुस्मरन्तस्य गम्भीरं च निश्वसति अश्रूणि च पातयति शुष्यति च मिलायति च ॥ सो दानि राजा प्रेमानुगतो अंजलिं प्रगृह्णित्वा तं गजपोतं पृच्छति ॥ सर्वसत्कारेहि ते गजोत्तम सत्करोमि अथ च पुनस्त्वं शुष्यसि च मिलायसि च परिहायसि च वर्णरूपतो न च ते पश्यामि उद्यमात्तमनं प्रहृष्टमुखवर्णं । देहि मे वाचं आख्याहि केन ते उपकरणेन वैकल्यं उपस्थापयिष्यामि प्रियो च मे त्वं गजोत्तम मनापो च आख्याहि मे केन त्वं परिहायसि भोजनं च पानीयं च न प्रतीच्छसि ॥ सो दानि गजपोतो राज्ञा पृच्छीयमानो मानुषिकाये वाचाये आह ॥ देव न मे केनचिद्वैकल्यं उपकरणेन नैवमाहारेण मम कृत्यं मम माता तहिं वनखण्डे प्रतिवसति जीर्णा वृद्धा गतवया चक्षुर्विहीना दुर्बलकाया यदा विज्ञप्राप्तो स्मि नाभिजानामि मातुपूर्वं अदत्त्वा भोजनं वा पानं वा स्वयं परिभुंजितुं । एष मे समादानो मम मरणं इहैव भविष्यति । न पुनरहं अदत्त्वा मातये स्वयं परिभुंजेयं भोजनं वा पानीयं वा ॥ सो दानि काशिराजा धार्मिको च सकृपो च परानुग्रहप्रवृत्तो च । तस्य एतदभूषि । आश्चर्यमिदं इमस्य हस्तिपोतस्य याव मातृज्ञो च धार्मिको च आजानेयो च यस्य अद्य एत्तकानि दिव-[300$^b$]सानि भोजनं अप्रतीच्छन्तस्य पानीयमपिबन्तस्य मातृशोकेन । एकत्येषु मनुष्येषु नैते गुणा सुलभरूपा ये इमस्य गजपोतस्य । नैतमस्माकं साधु न प्रतिरूपं यं वयं इमानेवरूपा कल्याणसत्वा विहेठाम ॥ सो दानि महामात्राणामाह ॥ मुंचथ एतं हस्तिपोतं गच्छतु वनखण्डं यतो स्माभि आनीतो मातृवर्तको मातरं

$1^2$. M °hi satkriya°. — 2. B °ṇayati | çokena taṁ mâ° M °ṇayati keçena taṁ mâ° BM °çvasati açruṇi(M °ṇiya) ca pâ°. — 4. M °gṛihitvâ°. — 5. M °roti || atha° B °romi | atha° M °çushyati ca milâyati ca pari° B °shyasi ca pilâ° M °ṇṇarupâto° BM °çyâmi | u ° rṇṇaṁ de°.

7. M °caṁ âkhâhi kena te upaka ° me kenâ tvaṁ° B °me kena tva pa ° yasi || bho ° pâṇîyaṁ ca pra° M °yaṁ ca pra°. — 9. M °pṛicchimâno°. — 10. B °hiṁ vanashaṇḍe° M °hiṁ vanakhaṁḍe pra ° ti || jîrṇṇo vṛi° B °jîrṇṇo vṛi° M °vayâ cakshuḥvihîno du° B °pto smiṁ nâbhi° M °mi || mâtu pûrvaṁ° BM °adatvâ bho°.

$13^1$. M evaṁ me samâdânaṁ mama mara ° haivaṁ bha°. — $13^2$. BM adatvâ mâ° M °pânaṁ vâ || . — 14. M °satkṛipo° B °kṛipâ ca pa° BM °tto ca ta°. — $15^1$. M °bhûshiḥ || B °shi â°. — $15^2$. M °yâvat pâtṛijño ca sârmi° BM °ko ca âyâno° M °yo ca asya adya° BM °praticcha° M °pâniyam epi pibentasya mâ° BM °kena a°.

17. M eshashyesha ma° BM °shyeshu caite°. — 18. B neta° M na eta° BM °imâm evarûpâ° M °ṇasatvâḥ vi°. — 19. BM °m âhansuḥ || . — 20. M muñcati hastipotaṁ ricchatu vanakhaṁḍa yato smâbhir ânito mâtavako mâtare sagapâcchatu mâm iha° BM °shyati | ta° B °rthako a° M °rthakam adharmeṇa samojyema || .

समागच्छतु मा इह अनाहारो मरिष्यति ततो वयं निरर्थका अधर्मेण संयुज्येम ॥ सो दानि राजाणत्तीये तस्यैव वनखण्डस्य समीपे नेत्वा मुक्तो ॥

सो दानि तं वनखण्डं गत्वा नैवाहारं करोति न पानीयं पिबति तां मातरं मार्गति ॥ तस्य दानि सा माता शोकेन रुदमाना च तं पुत्रकं अपश्यन्ती अन्धीभूता ॥ सो दानि गजपोतको तां मातरं अलभन्तो पर्वतशिखरमभिरुहित्वा कुंजररावां मुंचति । तस्य महान्तं कुंजररावं मुंचतो ताये मातरे तं स्वरं प्रत्यभिज्ञातं पुत्रस्य मे एषो स्वरो ति ताये पि महानिनादं मुक्तं ॥ ततः तेन मातुस्वरो प्रत्यभिज्ञातो ॥ सो दानि तस्या मातु मूले उपसंक्रमे ॥ तस्य सा माता उदकह्रदस्य मूले आसति अन्धा परिभ्रमन्ती पुत्रशब्दं श्रुत्वा रेणुगुण्ठितशरीरा ॥ सो दानि गजपोतको ततः ततो वनलतां सुकुमारां भंजित्वा तां मातरं परिमार्जेति रेणुं चास्या शरीरातो अपनेति । ततः च उदकह्रदातो शुण्डं उदकस्य पूरेत्वा हृष्टो तुष्टो आत्तमनो प्रीतिसौमनस्यजातो तां मातां स्नापेति ॥ सा दानि स्नाता च तानि च अक्षीणि धौतानि सर्वमलं क्षपितं अशुच्यपगतं विमला चास्या परिशुद्धा दृष्टी संवृत्ता ॥ सा दानि हस्तिनिका तं पुत्रकं पश्यित्वा प्रीतिसौमनस्यजाता पृच्छति । पुत्र कहिं सि गतो मम मेल्लित्वा अनाथाये दुर्बलचक्षुयेति ॥ सो तस्या माताये तां प्रकृतिं विस्तरेण आचिक्षति यथा गृहीतो यथा च ओसृष्टो ॥ सा तं पुत्रकं आह ॥ एवं पुत्र आनन्दतु काशिराजा सपरिवारो यथा अद्य तव दृष्ट्वा अहं नन्दामि ॥

स्यात्खलु भिक्षवः युष्माकमेवमस्यादन्यः स तेन कालेन तेन समयेन काशिराजा अभूषि । न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । एषो नन्दो मम

2. M °râjâ âṇa° B °nashaṇḍesya° M °nakhaṁḍesya samipe nitvâ°. — 3. BM °bati taṁ mâta° B °raṁ mâgati | . — 4. M °nâ caṁ taṁ pu ° paçyaṁti a°. — 5. M °ni râjapotako mâtaraṁ° B °kuṁjaravârâṁ muṁcati ta°.

6. BM °muṁcato tasya tâye mâ° M °ro ti | tâme pi° B °ninâda mu°. — 8[1]. BM °tasya mâ°. — 8[2]. M °mâtâr uda° B °bhramanti pa° M °bhramati pa°. — 9. M °ni râjapotako tato tataḥ shalanatâṁ sukumâlâṁ bhaṁ° BM °tvâ taṁ mâta° M °ṇuṁ câtra ça° B °câsya ça°.

11. M tataḥ udakabra° B °sya pure° M °âtamo pri° B °jâto tân mâtâṁ°. — 12. BM °akshi(M °kshi)ṇi dhotâni sarvam alaṁ(M °m ahâṁ) akshi | mucya ° câsya pa° M °dṛishṭi saṁvṛittâḥ. — 14. M °hasinikâ ° jâto tâṁ mâtâṁ pṛi°. — 15[1]. M °kathaṁ vihato° B °hiṁ siṁhato ti mama me° M °durbale ca°. — 15[2]. BM °tasya mâtâye taṁ pra ° ksha- ti | yathâ gṛi° M °oshûshṭo ‖ .

16. B so taṁ° M so tâṁ putrakam âhansuḥ ‖ . — 17. M °tra nanda°. — 19. M °kshavo yu ° d anyo sa tena kâle° BM °shi na°. — 20[1]. M °drashṭuṁ ta°. — 20[2]. B °ndo mama putrîyapu° M °pitṛiyatro bhâtâ°.

पिचियपुत्रो भ्राता सो काश्यिराजा अभूषि ॥ यो गजपोतको अहमेव त[301ᵃ]-दा अभूषि ॥ या गजपोतस्य माता अभूषि एषा सा महाप्रजापती गौतमी तदापि मम शोकेनान्धा संजाता मम एवागम्य चनन्धा संजाता । एतरहिं पि एषा महाप्रजापती गौतमी मम शोकेनान्धा संजाता मम येव चागम्य अनन्धा संजाता ॥

समाप्तं हस्तिनिकाजातकस्य परिकल्पं ॥

नीवरणं विजहित्वा शृणोथ एकाग्रमानसा सर्वे ।
यथ बोधिसत्वचर्या सुदुष्करा हर्षणीया च ॥
तिर्यग्योनिगतस्यापि गजस्य स्वमातरे सौहृदमासि ।
किं पुनः मनुष्यभूतो गुरुं परिचरेय तं चित्रं ॥
कामं पि बोधिसत्वा सर्वजगति वत्सला प्रकृतिस्निग्धा ।
अतिवत्सला तु गुरुषु यथा श्रुतं कीर्तयिष्यामि ॥
हिमवन्तपादपार्श्वे चण्डोर्वे चण्डपर्वते रम्ये ।
तापसकुलआश्रमेहि क्वचित्क्वचि कृताभ्यलंकारे ॥
किन्नरकुंजरवानरवराहशार्दूलव्याघ्रगणचीर्णे ।
रुरुमहिषसरभचरिते वृषभचमरिरुरुम्वराकीर्णे ॥
मोरशुकजीवजीवकचकोरकरविंकशकुनमिथुनेहि ।
समन्तं हि तं वनवरं शोभति मधुरं रवन्तेहि ॥

2. BM yo gaja° B °shi esho sá ° prajápati tadá° B °saṁjáto ma° M °ma eshága ° játáḥ | . — 3. M °pi eyá mahá° B °çoke andhá saṁjátá táṁ mama ye° M °kena aṁdhá saṁjátá mamaiva cá ° játáḥ. — 5. M iti çrimahávastuavadáne ha° BM °játasya° M °lpaṁ samáptaṁ ‖ .

6. M atha ni° B °gramanasá° BM °rve ya°. — 7. BM yathá bo ° tvacaryáṁ dushkaráṁ ha°. — 8. M nirya° B tiyagyo ° sya mátrá sau° M °sya mátá sau° BM °hṛidaṁ ási | . — 9. M °punar manu° BM °guru pa° M °care taṁ° B °care taṁ citraṁ | . — 10. M °dhisatvaḥ sarva ° tsará pra° BM °gdhá a°.

11. B °tsará tu khu | yathá guruçru° M °lá gurushu | yathá guruçru° BM °shyámi hi°. — 12. M hibhava° BM °rçve ca caṇḍore caṇḍa° B °ramyo tá°. — 13. B °kuláçra° M °kulá anehi kva° B °t kvacit kṛityalaṁkáraṁ | M °t kvacit kṛitátyalaṁkálaṁ | . — 14. BM kinnaraṁ kuṁ° M °jaraṁ vá° BM °naraṁ va° M °rdúlaṁ vyá ° cirṇṇaṁ B °ciṛṇṇa ruru°. — 15. M urumahi° BM °sarabhacaritaṁ vṛishabhacamariruruṇṇa(M °ṛṇa)kákirṇṇaṁ | (M °ṛṇṇaṁ).

16. BM °çukajivaṁjivakacakorakaraviraça° M °kunaṁ mi° BM °hi sa°. — 17. BM samantehi taṁ° M °dhuraṁ ramante dvi ço° B °ntehi ço°.

शोभन्ति च क्वचिक्क्वचित्पद्मसरा राजहंसपरिपूर्णा ।
कलहंससलिलगलिता गजयूथविलोलिताश्च परे ॥
क्वचिद्भ्रमरमधुकरिभिः घूर्णितकुसुमेहि पादपसमीपं ।
कृतसंस्तरा विचित्रा हरिणशकुनलीलिता स्थान्ति ॥
क्वचिद्वृद्धतापसेहि ध्यानरतिरतेहि निर्झरगतेहि ।
संशोभते वनवरं स्वाध्यायरतेहि च परेहि ॥
क्वचि दृष्टकुमारेहि दीर्घजटाश्वजिनवल्कलधरेहि ।
संशोभते वनवरं विचित्रफलमूलहस्तेहि ॥
तस्मिं प्रवणे भिरामे परिहरति वनेचरी नेत्रप्रहीणां ।
जीर्णा दुर्बलगात्रां गजोत्तमो सर्वभावेन ॥
सो गजगणेन सार्धं रमन्तो अपनिर्गतो महद्दूरं ।
राजा च सह बलेन गजग्रहणकारणं प्राप्तो ॥
दृष्टान तं गजवरं राज्ञः सुतो पि हर्षितो अवचि ।
गजवरो लक्षणुपपेतो गजोत्तमो पार्थिव यूथे ॥
गजगणगतं गजेन्द्रं तं दृष्ट्वा वाहनं उदारं तं ।
संगृह्णि काशिराजा वनात्पुरवरं निबन्धित्वा ॥
सो नैव पिबति पानं न च भुंजति श्वसति च सो भीक्ष्णं ।
तं अवच मधुरगिरया स हस्तिरत्नं पृथिवीपालो ॥
नागवर मा कृशो भव प्रतीच्छ भक्तं पिबाहि पानीयं ।
अभिरामयिष्यामि इध पुरोत्तमे मा खु शोचिष्ठाः ॥

1. BM °bhanti | kvacit kvacit pâdmasa(M °dmama)rarâja° M °pûrṇṇaḥ B °pûrṇṇo ka°. — 2. M karahaṁ âsalilagaritâ gaja° B °salila ° thanilolitâç câpare | M °lolitaç câpare | . — 3. B °dhukarîbhiḥ ° pâdasamîpaṁ kṛi°. — 4. B kṛitaṁ sastarâ° M kṛitaṁ mastarâ° BM °citrahari ° kuna(M °ṇa)lilitâ sthâti(M °sthâni) | . — 5. BM kvacid vṛiddhatâ-(M °ddhasta)pa ° gatehi saṁ°.

6. BM °yarate(M °rase)hi parehi kva°. — 7. BM °cid dṛishṭa ° dharehi saṁ°. — 9. BM °vaṇâbhi ° traparihiṇâṁ | . — 10. M jîrṇṇo durbalâṁ gâ ° ttamaṁ sa°.

11. M °sârddha ra° BM °nto upa° BM °raṁ râ°. — 12. M °jagaṇena kâ° B °graheṇa kâ°. — 13. BM °râjasuto harshi°. — 14. M gajavara la° BM °kshaṇopa° M °jotamaṁ pâ ° yûtho B °yûtho | . — 15. M °taṁ gajandraṁ° BM °vâhanam udâraṁ taṁ gṛi°.

16. BM grihoi kâ° B ° vanât | puravare ni° M °vanât | punarvare ni° BM °tvâ so°. — 17. M °naivaṁ pi° BM °prâṇîyaṁ na ca bhuṁjati(M °ti |) tanati hi çva°. — 18. BM tam avaca madhurasiragi(M °sivani)rayâ ° thivipâlâ(M °pâro). — 19. B nâmava ° pâṇîyaṁ a°. — 20. B °me | mâ ku socisthâ ṛa° M °çocitvâ || .

गजोत्तमो आ[301b]ह ॥

न खु शोचामि नरपते बन्धनमुपरोधनं क्षुधपिपासां ।
इतो च मे दुःखतरं नरेश्वर तेन शोचामि ॥

राजा आह ॥

किन्तव इतो गजवर दुःखतरं दुःखतरं पुनरन्यं ।
येन ते न प्रतिभाति पानीयमशनं च आख्याहि ॥

गजपोतको आह ॥

माता मम गतवया जीर्णा अतिवत्सला नयनहीना ।
सा मया विना मरिष्यति नरेश्वर तेन शोचामि ॥
तस्याहं विसमृणालं पूर्वं उपानयामि अनयनाये ।
भुंजामि पश्चात्मना साद्य अनसना ति शोचामि ॥
ग्रीष्मे परिदग्धगात्रा शीतलवनच्छादितोदकं चैवं ।
उपनामेमि स्नपेमि च साद्य अनाथा ति शोचामि ॥
संप्रति वने अनयना परिभ्रमति रेणुगुण्ठितशरीरा ।
हा पुत्रेति च वदति तदद्य दुःखतरमासाद्य ॥
श्रुत्वा गजेन्द्रवचनं मनुजेन्द्रो सुमधुरं सुकरुणं च ।
अश्रुपरिपूर्णवदनो नरवरो वारणमध्यभाषित ॥
एकत्येषु मनुष्येषु सुदुर्लभा एदृशा गुणा सम्यक् ।
येन तव इमा गजवर हृदयस्मिं जायते पीडा ॥
मुंचथ लघु गजवरं चरतु वने गुरुजनं परिचरन्तो ।

2. BM °kshudhâm̃ pipâsâm̃(M °sân) i°. — 3. BM idam̃ ca° B °tena çvacâmi ‖ M °tena carâmi ‖. — 5. M kim̃ tuvo i° B kin tuvam̃ ito ga° BM °vara duḥ ° khataro punar a(B °naḥ a)nyam̃ ye°.

6. BM °niyam̃ a(M °â)sanam̃°. — 7. M °pottako°. — 9. M so maye vi° B çâsaye tinâ mari° M °ra teñna ço°. — 10. BM °ham̃ biçamṛi ° pûrvam upetâmi ânayanâye- (M °nâya) bhum̃°.

12. BM °cchâyodakam̃ cai°. — 13. BM °memi snâpe° M °mi va sâ° B °câmi sam̃°. — 15. M °popreti vadati ca vadati° BM °d adya naravara duḥ° M °khata-râm â°.

17. BM °pûrṇṇam̃ vadano naravâraṇa adhya° M °shito ‖. — 18. BM ekeshvama° M °dṛiḍ gu° BM °ṇâ | (M °ṇâ) sam̃myak yena°. — 19. BM °ime ga ° dayasya janenti (M °netrî) pîḍâm̃ |.

भवतु जननी आश्वस्ता नंदतु सह पुत्ररत्नेन ॥
सा गजवरस्य माता दुःखार्दितशोकशल्यसंशीर्णा ।
गगणमिव कालमेघो नादयति वनं परिचरन्ती ॥
भवतु जननी सवत्सा नन्दन्तु वनमृगा च वनदेवता ।
आख्याते नन्दतु मे अनयना माता रतनकेन ॥
दृष्टं लुब्धेहि दन्तहेतोः व्याघ्रेहि रुधिरमान्सार्थं ।
नीतं व राजधानिं गजोत्तमं काशिमाविचे ॥
वनदेवता भणन्ति गजोत्तमो प्रवरलक्षणसमंगी ।
तं गृह्ये काशिराजा वनात्पुरवरं निबन्धित्वा ॥
तं खु मरणं भविष्यति मह्यं अनाथाये नष्टनयनाये ।
सो पि च गजो मरिष्यति सुवत्सलो मह्यं शोकेन ॥
यो विचरे गिरिवरेषु वनेषु प्रवरेषु फुल्लशिखरेषु ।
स खु मरिष्यति नागो मम चोपवनं च शोचन्तो ॥
अथ तव न जातु गजवर जनेची त्वयि रोषिता न परिभ्रष्टा ।
प्रेम्णेन अनुचरित्व तथ तुह्य विमोचणं भवतु ॥
अथ त्वय न जातु वीर अदत्त तव जननिये प्रथमभक्तं ।
फलमूलभोजनं वा तथ तुह्य विमोचणं भवतु ॥
अथ गजवरो त्वरितो मातरमुपगम्य आलपति स्निग्धं ।
सुकुमारल[३०२*]ताये च परिमार्जति रेणुपरिशुद्धां ॥

1. B °ni savaśá° M °ni sarvatámrandatu sa°. — 2. B °javalasya° M °rditá ço° BM °lyaçariro |. — 3. B °ti vanam̃ civamání paricaranto | M °ti vanam ivá máni paricaranto. — 4. BM °ni vatsá nandantu(M °ndam̃ bhu)vanaçakunaká vanagajá mṛi° M °devatá ca ‖ B °devatá ca á°. — 5. BM ákhyátum̃ na° B °anayená° BM °ratnakena dṛi°.

6. BM dṛishṭam̃(M °shṭam̃ |) lu° ntakáraṇahetoḥ(B °toḥ |) vyá° B °dhiramátmártha vi° M °nsártha. — 7. BM vitam̃(M °tim̃) ca rájadháni ga° mam̃(M °mam̃ ‖) káçi ávi(B °ci)-kshe va°. — 8. M °bharam̃ti ‖ ga° B °nti | gajottamam̃ pra° M °samanvagí B °gí tam̃°. — 9. BM °gṛihya káçirájá vanavare(M °nacale) ni°. — 10. M tam̃ shu mara°.

11. B °shyati | su° BM °tsalo mama çokena putraçokena(M °traçokena |) yo°. — 12. B °vicara virivareshu vaheshu pravaneshu phúllaçikhaleshu na° M °rivareshu vahaseshu pravaneshu phullaçishareshu. — 13. BM na khu° B °ti | ná° BM °go mama copa° M °nam̃ çopavanam̃ ço°. — 14. BM atha tvayi na já° B °ra gajane° M °ra janane° BM °shṭá pre°. — 15. BM °ritthe(M °rishṭaḥ) | tatha° bhavatum atha°.

16. BM °tvayá na já° adatva mama(M °mamam̃) jananiye(M °ye |) pra° B °ktam̃ pha°. — 17. M °vá tathá guhya° B °vá te tha tu°. — 18. B °ro svarato má° álashati | snigdham̃ su° M °álavati°. — 19. BM °ye ca pramárja° çuddham̃ |.

बद्धो स्मि काशिराज्ञा पुरोत्तमे दाडयेहि पाशेहि ।
तव तु कृतेन अनयना मुक्तो पुन धर्मराजेन ॥
सा गजवरस्य घोषं श्रुत्वा स्पर्शं च तस्य उपलभ्य ।
प्रीतमनसा उद्या पुनः सनयना गजं लब्ध्वा ॥

हस्तिनिका आह ॥

एवं नन्दतु नन्दन्तो काशिराजा सबान्धवो ।
यथाहं अद्य नन्दामि पुत्रेण नयनेहि च ॥
एतं पुत्रं यथा पूर्वं शैलवने मृगान्विते ।
सपुत्रा अद्य नेत्रेहि पश्यति वरकुंजरं ॥
पूर्वजातिमभिज्ञाय संबुद्धो वदतां वरो ।
जातकमिदमाख्यासि शास्ता भिक्षुणमन्तिके ॥
अहं गजवरो आसि माता सा आसि हस्तिनी ।
तेनायाप्यस्या पुत्रो हं गाढस्नेहा च गौतमी ॥
एवं दीर्घस्मिं संसारे स्नेहद्वेषेण दुःखिता ।
स्नेहद्वेषप्रहाणार्थं धर्मं चरथ निर्ममा ॥

हस्तिनीजातकं समाप्तं ॥

त्रिभिः प्रातिहार्यैर्बुद्धा भगवन्तो सत्वां विनयन्ति । तद्यथा ऋद्धिप्रातिहार्येण अनुशासनीप्रातिहार्येण धर्मदेशनाप्रातिहार्येण ॥ भगवता इमेहि त्रिहि प्रातिहार्येहि

1. BM baddho smiṁ kāçirājño(M °jā) pu° M °ttame kāçirājā dā°. — 2. BM °anayena mukto punaḥ dharma°. — 3. BM °bhya pri°. — 4. BM °tamanā u° B °labdhā ‖. — 5. M °stinikā°.

6. BM °tu nando(M °ndā)to kā° B °jā subā°. — 7. M °ndāsi pu°. — 8. BM ete putra yathā(B °tha)pū° BM °çailāva° B °mṛigagandhā su° M °mṛigondhakā ‖. — 9. B suputrādya ° hi yasyasi varaṁ kuṁ° M °hi yasyāsi va° B °jaraṁ pū°. — 10. M pūrvaṁ jā ° jñāye sambuddho varatām varaṁ ‖.

12. BM °varā āsi mā°. — 13. B °dyāpi putravagā° M °dyāpi putra evāpi gā° BM °snehe ca gautamī |. — 14. BM °sāre saṁsaranto na prāṇināṁ(B °nāṁ |) sne° B °haduḥkhena dveshena sne° M °sheṇa atiduḥ°. — 15. M °shaprāhā° BM °rmamā(B °mā ‖) nilaçaile ṛishisaṁghasevito na(M °vite ni)rvānti dhīrā vatibhūtashaṇḍe gharo(M °ṇḍe ye ca ghano)ttamaṁ cchindiya maṇḍa(M °maṁḍa)lāçayaṁ ‖.

16. M iti çrīmahāvastuavadāne hastiyā°. — 17[1]. M atha tribhir prāti° B °hārye buddhā° M °vantaṁ sa ° nayati ‖. — 17[2]. B °dharma ° ryeṇa bha°. — 18. BM °gavato i° M °mehi trihi prāti° B °hāni ca prā°.

न्यग्रोधारामे बहूनि प्राणिसहस्राणि आर्ये धर्मे विनीता ॥ अथ खलु राहुरसुरेन्द्रो वेमचित्री च असुरेन्द्रो मुचिलिन्दो च असुरेन्द्रो षष्टीहि असुरनयुतेहि सार्धं प्रभूतं गन्धमाल्यमादाय बहूनि असुरसहस्राणि च बहूनि च असुरकन्यासहस्राणि सर्वालंकारभूषितानि आमुक्तमणिकुण्डलानि महता असुरानुभावेन महता असुरर्द्धीये येन कपिलवस्तुन्यग्रोधारामस्तेनोपसंक्रमित्वा न्यग्रोधारामस्य उपरि वैहायसमन्तरीक्षे स्थित्वा भगवतो पूजासत्कारमकरेन्सुः । सर्वगन्धेहि सर्वमाल्येहि सर्वनृत्येहि सर्वगीतेहि सर्ववादितेहि सर्वतूर्यताडावचरेहि भगवन्तं सत्कृत्वा गुरुकृत्वा मानयित्वा पूजयित्वा अपचयित्वा अनुत्तरायै सम्यक्संबोधये चित्तमुत्पादेन्सुः । अहो पुनर्वयं पि भवेम अनागते अध्वाने तथागता अर्हन्तः सम्यक्संबुद्धा विद्याचरणसंपन्नाः सुगता लोकविदनुत्तरा पुरुषदम्यसारथयः शास्तारो देवमनुष्याणां यथायं भगवानेतर्हिं एवं द्वात्रिंशतीहि महा[302b]पुरुषलक्षणेहि समन्वागता भवेम अशीतिहि अनुव्यंजनेहि उपशोभितशरीरा अष्टादशहि आवेणिकेहि बुद्धधर्मेहि समन्वागता दशहि तथागतबलेहि बलवां चतुर्हि वैशारद्येहि विशारदा यथा भगवां एतरहिं एवञ्च अनुत्तरं धर्मचक्रं प्रवर्तेम यथापि भगवता एतरहि । एवं च नो देवमनुष्या श्रोतव्यं श्रद्धातव्यं मन्येन्सुः यथा च भगवतो एतरहि एवं च समग्रं श्रावकसंघं परिहरेम यथा भगवां एतरहिं । एवं तीर्णा तारयेम मुक्ता मोचेम आश्वस्ता आश्वासेम परिनिर्वृता परिनिर्वापेम । एवमेतं भवेय बहुजनहिताय बहुजनसुखाय लोकानुकम्पाय महतो जनकायस्य अर्थाय हिताय सुखाय देवानां च मनुष्याणां च ॥ अथ खलु भगवानेषामसुराणामिदमेवंरूपं चेतोप्रणिधानं

1. M °hulaçâ ° tri vâsurendraḥ mucilinda vâsureṁdro sha° BM °dâya bahûni asurâya ca(M °râṇi) bahûni ca asuraka(B °kaṁ)nyâ° B °laṁkâlabhû° BM °ddhiye na kapilavastu-(M °staṁ) nyagrodhârâmas te(M °maṁ te)no° M °hâyasavanta ° retsuḥ B °retsuḥ | .

6. M °ttaroyo sa° B °ttarâye saṁmya° BM °detsuḥ | . — 9. BM °yaṁ pi bhaveya anâgate(M °tam) a° M °dhvânaṁ tathâgatâm arhantas samyaksaṁbuddho vidyâ° BM °nnâḥ (M °nno) sugato lo° M °ttaraḥ purushadu ° çâstâ devânâṁ ca manushyâ° BM °ṇehi samanvâgatâ(M °to) bhavema | açî° M °riro ashṭâdaçehi â° BM °dyehi viçârado yathâ (M °thâyaṁ) bhagavâṁ° M °ñ ca samagraṁ anuttaradha ° rtteyaṁ || ya° B °rtteyaṁ ya° M °vato etarahiṁ.

14. BM evaṁ ca so de° BM °çrotavyaṁ (B °vyaṁ çraddhâtavyaṁ) manyatsuḥ(B °tsuḥ |) yathâ ca bhagavato etarahi e(M °tarhim e)vaṁ ca so(M °sa) devamanushyâ çrotavyaṁ çraddhâtavyaṁ manyatsu(M °nyetsuḥ |) yathâ(B °thâ ca) bhagavataḥ e(M °tor e)tarahiṁ e(M °him e)vaṁ ca samagraṁ(B °gryaṁ) çrâ ° rema | ya° M °thâ ca bhagavân etarahim evaṁ ca ti° B °gavaṁ etarahiṁ evaṁ°.

16. BM °tirṇṇo(M °rṇo) tâ ° mukto mocema âçvâsto âçvase(B °sa)ma parinirvṛitaḥ (M °to) parinirvâpeyam(M °rvâpedyaṁ) e°. — 17. BM evam etaṁ bhaveyaṁ bahujanahi° M °shyâṇâṁ || . — 19. M °vaṁrupaṁ udâraṁ ca praṇi° BM °smintaṁ prâdushka °

विदित्वा तस्यायै वेलायै स्मितं प्रादुष्करे समनन्तरं प्रादुष्कृते च भगवतो मुखद्वारातो नानावर्णा अनेकवर्णा अर्चिषो निश्चरित्वा नीलपीतमाञ्जिष्ठा रक्तश्वेतावदाता कनकवर्णा सर्वं बुद्धक्षेत्रं ओभासयित्वा यावदकनिष्ठा देवनिकाया भगवन्तं त्रिखुत्तं प्रदक्षिणीकृत्वा भगवतो पुरतो अंतरहिताः ॥

अथ खल्वायुष्मानश्वकी येन भगवांस्तेनोपसंक्रमित्वा तेनांजलिं प्रणामयित्वा भगवन्तमेतदुवाच ॥ नाहेतुकं नाप्रत्ययं तथागता अर्हन्तः सम्यक्संबुद्धाः स्मितं प्रादुष्करोन्ति । को भगवं हेतुः कः प्रत्ययो स्मितस्य प्रादुष्करणाय ॥ अथ भगवानायुष्मता अश्वकिना पृष्टो तं [असुरा यावदकनिष्ठा देवनिकाया भगवन्तं त्रिखुत्तं प्रदक्षिणीकृत्वा भगवतो पुरतः अंतरहिता] असुराणां चेतोप्रणिधानं गाथाभि व्याकर्षि ॥

तत्रमकासि स्मितं द्विपदेन्द्रो
दानवचित्त विदित्वमुदारं ।
पृच्छति अश्वकि प्रांजलि कृत्वा
दृष्ट स्मितं सुगतस्य मुखातो ॥
नेह अहेतुक लोकप्रदीपो
प्रादुकरोति स्मितं परमर्षि ।
ब्रूहि नरोत्तम हेतु स्मितस्य
यत्ते कृतं इह लोकहितैषी ॥
अथ निःसंशयं बोधिमुदारा
केनचि संजनिता परिषायां ।
यस्य तथागत आशय ज्ञा[303ᵃ]त्वा
प्रादुकरोति स्मितं रमणीयं ॥

ntara(M °re) prádurkṛito(M °shkṛitáṁ) ṣaṁ bhagavato mu° M °rci niçca° B °ñjishṭá rakta° M °ñjishṭaraktaçvetavadá ° sarvabu° BM °traṁ ábhásaṁ obhá° B °d akanishṭá de° BM °káyena bhagavantaṁ tṛittaṁ(M °ntaṁ trishkṛityaṁ) pra° M °purato antarhitá ‖ .

5. B °çvaki ye°.

6. B °ntaḥ saṁmya° BM °prádaḥkaro(M °roṁ)ti | . — 7¹. M °gavan hetuḥ° B °yo smiṁta°. — 7². BM °taṁ asurá akanishṭhá(B °shṭá) de° B °ntaṁ tṛikshu° M °trishkṛityaṁ pra ° parato aṁtarhitvá a° B °hitvá a° M °gáthám vyákárshit | .

11. BM tatram ahákási smitaṁ dvijendro(M °dvipeṁdro) dána° M °citte viditváṁ u° BM °raṁ pṛi°. — 13. BM °ti | a° B °dṛishṭasmiṁ su° M °dṛishṭe smi°. — 15. BM °prádushkaroti | smṛi(M °ti smṛi)taṁ paramaṛishi brú(B °kru)°.

17. B kruhi ° kṛitosmi valo° M °kṛitásmi sarvalokahiteshi ‖ . — 19. B °çaya bo° BM °dhim udáraṁ(M °ra) kena citta saṁjanito parisháyaṁ ‖ .

21. B °gatasya áça° BM °prádushkaro°.

संशयितो पि अयं इह अद्य
दृष्ट स्मितं सुगतस्य मुखातो ।
ब्रूहि नरोत्तम मा चिरमस्तु
छिन्दहि संशयितान विशेषं ॥
यं अकरि स्मित लोकप्रदीपो
दानवपूजं विदित्वमुदारां ।
व्याकरणं भण आसुरकायं
यं च श्रुणित्व भवेय उदग्रो ॥

भगवानाह ॥

साधु ते अश्वकि पृच्छिता प्रश्ना
यस्य कृते स्मितं लोकहितस्य ।
तस्य ते वक्ष्यं फलं निखिलेन
एकमनो भणतो मे श्रुणोहि ॥
पूजा इह मे कृता असुरेहि
बोधिमनुत्तरं प्रार्थयमाना ।
ते विजहित्व तमासुरकायं
स्वर्गगता रमिष्यन्ति चिरं पि ॥
दैवपुरायं चिरं निवसित्वा
पंचहि कामगुणेहि समंगी ।
मानुषलोकमिमं पुनरेत्वा
पूजयिष्यन्ति जिनां द्विपदेन्द्रां ॥
कल्पसहस्रशतानि बहूनि
कृत्व पुनः पुन पूज जिनेषु ।

1. B çaṁça° BM °yitāpayāmi(M °mī)ha ° dṛishṭvā smi ° khāto brū(B °kru)°. — 3. B kruhi° M °ttamaṁ aci° B °ma maccira° BM °m asti cchi°. — 5. BM °pūjā vi° M °ditvām u°.

7. BM bhaṇa vyākaraṇaṁ asu(M °suravyākaraṇaṁ asu)ragaṇā yaṁ ca çru° B °ṇitvā bha° BM °dagrā ‖. — 10. BM °te pṛcchati açvaki(M °kī) pṛi ° çnā yaṁ me kṛita smi ° hitāya(M °ya ‖ ) ya°.

12. BM yasya° M °bhagato° B °ṇehi pū°. — 14. B °ha vyākṛitā | a° M °ha vyākṛito a° B °dhim uttamaṁ prā° M °mānāḥ te°.

16. M °surakoyaṁ°. — 18. B °ṇehi samaṅgī mā° M °samanvagī mā°.

22. M °tva punar punaḥ pūjati ji° B °naḥ punar pūja ji°.

कांचनसंनिभलक्षणधारी
सर्वे जिना भविष्यन्ति जितारी ॥
श्रुत्व च व्याकरणं असुराणां
तुष्ट उदग्रो सदेवकलोको ।
प्राणसहस्रशतानि बहूनि
प्रस्थित तत्र अनुत्तरयाने ॥

अथ खलु संवरो असुरेन्द्रो ताये वेलाये इमां गाथामध्यभाषि ॥

एतादृशेहि मे मित्रेहि सदा भोतु समागमो ।
यं निशाम्य यमागम्य पूजेम द्विपदोत्तमं ॥

अथ खलु भगवांस्तानि षष्ठी असुरनयुतानि अनुत्तराये सम्यक्संबोधीये व्याकरित्वा बहूनि च प्राणिसहस्राणि आर्यधर्मेषु प्रतिष्ठापयित्वा राजानं शुद्धोदनं च सपरिवारं च उद्योजये ॥ अथ खलु राजा शुद्धोदनो सपरिवारो उत्थायासनातो भगवतः पादौ शिरसा वन्दित्वा प्रक्रमे । तथा सर्वो जनकायो ॥

अथ खलु राजा शुद्धोदनो तस्यैव रात्रिये अत्ययेन प्रभूतं खादनीयं भोजनीयं प्रतिजागरित्वा कपिलवस्तुनगरं सिक्तसंमृष्टं कृत्वा अपगतरजं अपगतपाषाणशर्करकठल्लं मुक्तपुष्पावकीर्णं गन्धघटिकाधूपितधूपनं चित्रपरिक्षिप्तं विततवितानं ओसक्तपट्टदामकलापं । यावच्च कपिलवस्तुं यावच्च न्यग्रोधारामं नटनर्तकझल्लमल्लपाणिस्वरिकां कुम्भतूणिकशोभिकां द्विस्तलवेलम्बकां देशेदेशेषु स्थापयित्वा महता राजानुभावेन महता राजर्द्धीयेन भगवतो नगरं प्रवेशितं करोति ॥ अथ खलु राजा शुद्धोदनो भगवन्तं [303b] सश्रावकसंघं पुरस्कृत्वा राजकुलं प्रवेशेति ॥

1. BM °sarva jinā° M °tāri B °tāri çru°. — 3. BM °ṇāṃ uda ° devakulaloke(B °ke |). 5. BM °sthita(M °taḥ) tatrānu° M °rajāne ‖.

7. M °lu saṃbahulo a° B °lu sambaro a ° verāye i°. — 8. M etādṛi° B °dṛiço hi me°. — 9. B °niçāya yadāgamasya pū° M °çāmya yad āga°. — 10. M °shasṭhi nayu° B °ttarāye saṃmya° M °srāṇi ca āryya° B °āryedha° M °vāraṃ udyojeya ‖ B °dyojeyaṃ ‖.

12. B °gavatoḥ pā° M °gavatā pā ° sā vaṃditvā°. — 13. BM °kāyo | atha°. — 14. M °syaiva rātriye a ° stumahānaga ° ktasaṃsṛishṭaṃ° B °siktasaṃmishṭaṃ° BM °shāṇaṃ çarkaraka(B °rkkala)ṭhallamukta° M °rṇṇaṃ gaṃdhagha° B °citraṃ parikshiptaṃ vigatavitānaṃ oçaktapaṭṭa° M °ptaṃ vitatavimānaṃ oçaktapatradā° B °lāpaṃ dhūpaṃ dhūtaṃ muktapushpāvakirṇṇaṃ | M °kalapaṃ dhūpanadhūpaṃ pushpapushpāvakīrṇaṃ |.

17. B °rttakaṃ ṛi° M °svarakāṃ kuṃbhatāṇikāṃ ço° B °kumbhatuṇḍikaço° BM °dvistavala(M °vara)velaṃcakāṃ ° praveçinaṃ ka°. — 19. BM °ntaṃ çrāva°.

अथ खलु भगवां शुद्धोदनस्य निवेशनं प्रविशित्वा प्रज्ञप्त एवासने निषीदि यथासनो च भिक्षुसंघो ॥ अथ खलु राजा शुद्धोदनो भगवन्तं स्वहस्तं प्रणीतेन प्रभूतेन खादनीयभोजनीयेन सन्तर्पयति संप्रवारेति भिक्षामात्या च भिक्षुसंघं ॥ अथ खलु भगवां भुक्तावी धौतहस्तो अपनीतपात्रो राजानं शुद्धोदनं धर्म्या कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा उत्थायासनातो प्रक्रमे ॥ अपरं दिवसं महाप्रजापती गौतमी भगवतो सश्रावकसंघस्य भक्तं करोति । अपरं दिवसं यशोधरा भक्तं करोति । अपरं दिवसं अन्तःपुरिका । अपरं दिवसं शाकियमण्डलं भगवतो सश्रावकसंघस्य भक्तं करोति ॥

यशोधराये दानि भगवतो सश्रावकसंघस्य मोदकं सज्जीकृतं सर्वं ज्ञातिवर्गं निमन्त्रितं ॥ भगवां कालज्ञो वेलज्ञो समयज्ञो पुद्गलपरापरज्ञो काल्यस्यैव निवासयित्वा पात्रचीवरमादाय भिक्षुसंघपरिवृतो भिक्षुसंघपुरस्कृतो यशोधराये निवेशनं प्रविशित्वा निषीदि प्रज्ञप्ते एवासने यथासनो च भिक्षुसंघो ॥ अथ खलु यशोधरा राहुलमाता महाप्रजापतीगौतमीये सार्धं ज्ञातिवर्गेण च भगवन्तं सश्रावकसंघं प्रणीतेन खादनीयभोजनीयेन सन्तर्पयति संप्रवारयति ॥ ताये दानि यशोधराये राहुलस्य हस्ते प्रत्यग्रो प्रणीतो मोदको वर्णगन्धरसोपेतो दिन्नः गच्छ इमं मोदकं पितुर्देहीति ॥ तेन गच्छित्वा भगवतो पात्रे प्रक्षिपित्वा भगवतो छायायां निषीदित्वा मातरमेतदुवाच ॥ सुखा खल्वम्ब श्रमणस्य इयं छाया ॥ अथ खलु यशोधरा राहुलं कुमारमेतदुवाच ॥ याच पुत्र पैतृकं धनं ॥ अथ खलु राहुलो कुमारो भगवन्तमेतदुवाच ॥ देहि मे श्रमण पैतृकं धनं ॥ भगवानाह ॥ राहुल प्रव्रजाहि ततो पैतृकं धनं दास्यामि ॥ अथ खलु राजा सान्तः-

1. M °vâm̃ râjâ çuddho° BM °thâsane ca° M °sam̃ghe ‖. — 2. B °gavam̃tam̃ sva° M °khâdaniyena bhojaniyena sam̃tarpa° B °rpayanti sam̃pracâreti ‖ mi° M °pracârayati mi ° kshusam̃gham̃ ‖. — 3. M °haste apa° B °danam̃ dhâryakatha° M °danam̃ dharmyâ katha° B °dâyayitvâ samu ° utthâsanâ°. — 5. B °diva mahâ ° gauttami°.

6. M °dharâ divasam̃ ka° B °roti a°. — $7^1$. M °rikâḥ. — $7^2$. M °kiyamam̃ḍalam̃. — 9. BM °to çrâva° B °kam̃ sarjjikṛi° M °kam̃ sarjikṛi ° nimam̃tritam̃ |. — 10. BM °velajño samayejño pum̃gala(M °gava)parâparajño kâlya(B °la)syai ° thâsane ca(M °va) bhikshusam̃gho(M °ghaḥ) ‖.

12. B °gauttami° M °gavam̃tam̃ saçrâ° B °khâdaniye bho° M °khâdaniyena bhojaniyena sam̃tarpa ° pracârayati | B °rayati tâ°. — 14. BM °hulas tasya° M °ste pratyâgre praṇi ° to diçro gaccha° B °gaccha | imam̃ mokam̃ pi°.

16. M °cchitvâ bhagavato cchâyâ° B °prakshitvâ bha°. — 17. M °çravaṇa°. — $18^1$. M °dharâ râhulamâtâ râhu°. — $18^2$. M yâvat putra°. — $19^1$. M °çravaṇa° B °çramaṇam̃ pai°. — $20^1$. M °rivâro hṛi° B °abhunsuḥ° M °bhûtsuḥ tu ° hulaputro ° dosham̃ ti ‖ B °doshonti |.

पुरो शाक्या च सपरिवारा हृष्टा अभून्सुः तुष्टा उदग्रा भगवतो राज्ञो पुत्रो विनये यशोधराये किं दोषो त्ति ॥ यशोधरा दानि सर्वालंकारेहि आत्मानमलंकृत्वा भगवन्तं परिविषति कथं पुनरा[304a]र्यपुत्रो अगारमध्यावसति न च भगवतो चित्तस्यान्यथाभावो ॥ अथ खलु भगवां भुक्तावी धौतपाणि अपनीतपात्रो राजानं शुद्धोदनं सान्तःपुरं महाप्रजापतीं गौतमीं च यशोधरां च राहुलमातरं सपरिवारां धर्म्यां कथया संदर्शयित्वा समादापयित्वा समुत्तेजयित्वा संप्रहर्षयित्वा उत्थायासनातो प्रक्रमे ॥

भिक्षू भगवन्तमाहन्सुः ॥ पश्य भगवं यशोधरा मोदकेहि लोभेति ॥ भगवानाह ॥ न भिक्षवो एतरहि एव एषा यशोधरा मम मोदकेहि लोभेति ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवो अतीतमध्वानं नगरे वाराणसी काशिजनपदे तस्य उत्तरेण अनुहिमवन्ते साहंजनी नाम आश्रमपदं शान्तं विविक्तं विगतजनपदं मनुष्यरहेयं प्रतिसंलयनसारोप्यं मूलोपेतं पत्रोपेतं पुष्पोपेतं पानीयोपेतं ॥ तहिं काश्यपो नाम ऋषिः प्रतिवसति पंचाभिज्ञो चतुर्ध्यानलाभी महर्धिको महानुभावो ॥ तेन ग्रीष्माणां पश्चिमे मासे क्षुद्रपाकानि फलानि भुक्तानि तृषितेन च बहुतरं पानीयं पीतं । तस्य अभिष्यन्ना वातातपा संवृत्ता । तेन उपलकुण्डके सशुक्रं प्रस्रावं कृतं ॥ अपराये मृगीये तृषिताये तं प्रस्रावं पानीयसंज्ञाय पीतं ॥ ऋतुमतीये ताये मृगीये अशुचिम्रक्षितेन मुखतुण्डेन सशुक्रं योनिमुखं जिह्वाय प्रलीढं । ताये संमूर्छयित्वा कुक्षिं प्रतिलब्धं ॥ सो च ऋषि मैत्रीविहारी तस्य मृगपक्षी पि न

2. B °rehi | â° M °tmâna alaṁkṛitvâ bhagavaṁtaṁ parivipati ka° B °na ca bhagavatâ ci° M °ttasyâṁnyathâbhâvaḥ ‖. — 4. M °vi dhotapâtro apanîtapâṇi râjâ° B °dhautapâtro apanîtapâṇi râjâ° M °danaṁ syântaḥ° BM °prajâpati gauta(M °tta)mi ca yaço° dharmâ katha°.

8[1]. M atha bhikshu bha° B bhikshu bha°. — 8[2]. M yaçya bhagavan yaço° B °kehi lâbhehi ‖. — 9[1]. M °rahim evam eshâṁ yaço° B °hi evam eshâ° kehi lâbheti | M °bheti | anyadâpi eshâ mama modakehi lobheti ‖. — 9[2]. BM bhikshu â°. — 10[1]. M °gavan ‖. — 10[2]. BM °kshavo bhû°.

11. M °kshavaḥ atîtam adhyânaṁ° çântaṁ praviviktaṁ° BM °heyaṁkaṁ prati° M °raghaṁ mulopetaṁ phalopetaṁ patropetaṁ pânî° B °mûlâpetaṁ patrâpetaṁ pushpâpetaṁ pânî° BM °yopetaṁ tahiṁ°. — 13. M °shiḥ vasa° B °lâbhi maha° BM °go te°.

16[1]. B °abhipannâ vâ° M °abhishaṇâ vâ° vṛittâḥ B °ttâ te°. — 16[2]. M °ke suçu° B °kraṁ pramrâvaṁ kṛi° BM °taṁ a°. — 17[1]. M °taṁ çukraprasrâ° B °taṁ pramrâvaṁ°. — 17[2]. B ṛitugatiye tâni mṛi° M °tiye tâni mṛi° khatuṁḍikena°. — 18. B °saṁmûcchrâyevâ ku° M °rechayetvâ°. — 19. M °ri tasya mṛigapakshi pi na santrasyaṁti mṛigapakshiçatâni âçramasya parisamantena caranti pravisanti va so pi mṛigi° BM °taiva(M °vaṁ) pratikramanti ‖.

सन्त्रसन्ति मृगपक्षिशतानि आश्रमस्य परिसमन्ते चरन्ति प्रतिवसन्ति च सापि मृगी तस्यैव आश्रमस्य परिसमन्तेन चरति तत्रैव परिक्रमति ॥ सा दानि कालेन समयेन दारकं प्रजायति ॥ तेन ऋषिणा दृष्ट्वा तस्यैतदभूषि । कुतो इमस्या तिरिच्छानगताये मृगीये मानुषो अपत्यो ति ॥ समन्वाहरित्वा ऋषीणां ज्ञानं प्रवर्तति । सो दानि ऋषि समन्वाहरति । अमुकं कालं मये अधिमात्रं क्षुद्रपाकानि फलानि परिभुक्तानि बहुतरकं च मे पानीयं पीतं ततो मे अभिष्यन्देहि धातूहि उपलकुण्डके सशुक्रं प्रस्रावं कृतं । एताये मृगीये तृषिताये पानीयसंज्ञाये [304b] पीतं ऋतुमतीये ततो च ताये कुक्षिं प्रतिलब्धं । ममैवैषो अंगनिस्रावो ति । तेन दानि गर्भरूपं अजिनकेन गृह्णीय तं आश्रमपदं प्रवेशितो ॥

सा दानि मृगी पृष्ठतो अन्वेति । तेन तस्य गर्भरूपस्य फलकेन नाभि छिन्ना तैलेन च अभ्यंगितो सुखोदकेन तं गर्भमलं परिधौतं ॥ सो ऋषि तं गर्भरूपं तस्या मृगीये स्तने आलीयेति सापि मृगी पायेति । ऋषिणापि तस्या मृगीये स्तनं तस्य दारकस्य मुखे प्रक्षिप्यति ॥ यं कालं सो दारको आशितो भवति ततः सा मृगी तस्य आश्रमस्य परिसमन्तेन चरित्वा पानीयं च पिबित्वा पुनः गर्भरूपं स्तनं पायेति जिह्वायेण नं परिलेहति ॥ यं कालं सो गर्भरूपो पादेहि पि अस्थितः ततो स्वयन्तस्या मृगीये स्तनं गृह्णित्वा पिबति ॥ एकचरं शृंगकं जातन्ति तेन ऋषिणा एकशृंगो ति नामं कृतं ॥ सो दानि यथा से माता मृगेहि सार्धमन्वति तथा सो पि एकशृंगको ऋषिकुमारो अन्वति मृगेहि च मृगपोतकेहि च सार्धं क्रीडमानो । यतो यतः सा माता मृगगणेहि सार्धं अन्वति ततः ततो सो पि एकशृंगो ऋषिकु-

2. BM so dâ° B °jâpati te°. — 3¹. BM °dṛishṭvâ ta°. — 3². BM kuto imasya tiri° M °sho apatye pi sa°. — 4. M °vartteti ‖. — 5¹. BM °ti a°. — 5². BM °ye adhimâtram̃° M °pitam̃ | tataḥ me° BM °bhiprasavehi dhâ° M °utparakundake° B °ṇdalake° pramrâvam̃°.

7. B °ṛitumatîtatârakâye kukshi pra° M °to ratâye ku°. — 8. M mamevai° BM °niçrâvo ti te°. — 9. M °dâni rû° ghṛihnîya tam âçra° çitaḥ. — 10¹. M so dâ° BM °anveti tena°. — 10². M °phalakenâbhicchinnât taile° B °khodakona tam̃° BM °dhautam̃ so°.

11. B so rishi tam̃° BM °tasya mṛi° B °lîyeti sâ° M °lîyanti sâpi mṛigî prâpeti ‖. — 12. BM so pi ṛishi pi tasya mṛi° M °ye stam̃nam̃° kshishyati. — 13. M yam̃ kâram̃ so° vati | tato sâ° B °vati | tataḥ° BM °yeti | jihvâyena caram̃ pari° B °hatâ yam̃°. — 15. M °hi pi am̃ṭhito tataḥ sva° BM °n tasya mṛi° M °giye svanam̃° BM °gṛihnitvâ° B °bati e°.

16. M ekam̃ caram̃° B ekam̃ varam̃ çrim̃gṛikam̃° BM °jâtan tena° B °go hi nâmam̃°. — 17. BM° yathâ me mâtâ mṛigehi sârddham̃m aṇva(M °m am̃ṭha)ti | tathâ so pi (M °thâpi so) e° M °kumâraḥ aṇva° B °ḍamo vo yato°. — 19. M mataḥ yato so tâm̃ mṛigagaṇehi yataḥ yataḥ sa mâtâ mṛgagaṇehi sârddham̃ aṇvati | tato tataḥ so° ekam̃çrim̃gako ṛi° B °rddham̃ aṇvati | tataḥ°.

मारो अन्वति । मृगपोतकेहि सार्धं क्रीडन्तो अन्विय अन्विय मृगेहि मृगपोतकेहि च सार्धं पुनस्तं ऋषिस्य आश्रमपदं आगच्छति । ततो नं ऋषि क्षुद्रक्षुद्राणि फलानि वर्णगन्धरसोपेतानि देति ॥ यदा सो ऋषिकुमारो आश्रमपदे शयितो भवति ततो बहू मृगा च मृगपोतका च तमृषिकुमारमनुपरिवारेत्वा शयन्ति ॥ यं वेलं ते मृगा च मृगपोतका च चरितुकामा भवन्ति ततः तमृषिकुमारं शयमानं मुखतुण्डकेन प्रतिबोधयन्ति ॥ एवन्ते मृगा च मृगपोतका च नानाप्रकारा च पक्षी तेन ऋषिकुमारेण सार्धं तत्र आश्रमपदे अभिरमन्ति ॥ यं कालं सो एकशृंगको ऋषिकुमारो विज्ञप्राप्तः संजातो तस्य ऋषिस्य तं आश्रमं सिंचति संमार्जति मूलानि नानाप्रकाराणि आनेति पत्राणि आनेति उदकं आनेति काष्ठानि आनेति तमृषिं परिमर्दति स्नापेति अग्निहोत्रं प्रतिजागरेति । तमृषिं परिविसति नानाप्रकारा[305a]हि मूलविकृतीहि पत्रविकृतीहि पुष्पविकृतीहि फलविकृतीहि पानीयं उपनामेति । प्रथमं तं ऋषिं परिविसित्वा तां च मृगीं मातरं पश्चात्स्वयमाहारं करोति ॥ तेन ऋषिणा तस्य ऋषिकुमारस्य ध्यानानां च अभिज्ञानां च मार्गमुपदिष्टं ॥ तेन दानि ऋषिकुमारेण पूर्वरात्रापररात्रं जागरिकायोगमनुयुक्तेन विहरन्तेन घटन्तेन व्यायमन्तेन चत्वारि ध्यानान्युत्पादितानि पंच चाभिज्ञा साक्षीकृता ॥ सो दानि ऋषिकुमारो चतुर्ध्यानलाभी पंचाभिज्ञो कौमारब्रह्मचारी महर्द्धिको महानुभावो संजातो अभिज्ञातो देवमनुष्याणां ॥

एकशृंगको ऋषिकुमारो अनुहिमवन्ते गंगाये नदीये कूले साहंजनीआश्रमपदे प्रतिवसति । वाराणसीयं च नगरे काशिराज्ञो पुत्रो न भवति ॥ तेन दानि बहू इष्टिमक्रियाख्यानानि कृतानि पुत्रार्थाय यथा मे पुत्रो भवेय न चास्य पुत्रो संभवति

1. BM mṛigipo° M °ḍante | aṇviya mṛige° B °nto aṇviya açviyo mṛige° M °kehi sâ° çramasya padaṁ°. — 2. M tataḥ taṁ ṛishiṁ kshudra° B °to maṁ ṛi° lâṇi va° M °ṛṇagaṁdhara° B °tâni | deti ya°. — 3. BM °bahu mṛigî ca mṛiga° M °parishâretvâ çayaṁti ‖. — 5. B °laṁ taṁ mṛigâ° M °gâ ca mṛigâ ca mṛiga° BM °tukâmo bha° M °vanti | tataḥ tam ṛishi° khatuṁḍake° BM °dhayanti(M °yati) mṛigapakshihi e°.

6. M eva te mṛigâ° potakâ vaca nânâpra° pakshi te°. — 7. BM °ro âvijña° B °ṛishi taṁ° M °ṛishi tam âçritaṁ siṁca° B °cati sanmârja° M °rjayati | mû° prakârâṇi mûlaprakṛitihi âneti patrâṇi âneti kâshṭâni âneti ‖ tam ṛi° B °jâgaroti |. — 10. M taṁ ṛishiṁ° B °rivivasati nânâprakârâṇi mû° M °prakârâṇi mûlaprakṛitihi pushpa° nîyam upa° B °meti pra°. — 12. M °maṁ tam ṛishiṁ° BM °riviçitvâ° mṛigî mâta° M °raṁ paçya svayaṁ âhâ°. — 14. B °viharatena gha° M °viharantena vyâ° tpâdayitâ°.

16. M °câbhijñâ kaumarabra° rî maharshiko° B °jñâtâ de° BM °shyâṇâṁ e°. — 18. BM °dîye kule sâhaṁjana(M °nî)m âçra°. — 19. B °hû yashṭhopayâ kritakâni kṛi° M °hû yashṭînpakriyâs te tâni kṛi° B °saṁbhavati | vi° M °stirṇâ antaḥ° BM °ro ca asti |.



IMPRIMERIE NATIONALE.

विस्तीर्णे अन्तःपुरे धीतरो व अस्ति ॥ तेन दानि काशिराजा श्रुतं । गंगाय कूले साहंजनी नाम आश्रमपदं तत्र काश्यपो नाम ऋषि प्रतिवसति तस्य राजऋषिस्य तत्र आश्रमपदे प्रतिवसन्तस्य मृगीये सकाशातो एकशृंगको नाम ऋषिकुमारो उत्पन्नो ति । यन्नूनाहं नलिनीधीतरां राजकुलकुमारीं एकशृंगस्य ऋषिकुमारस्य दद्देयं सो मे पुत्रो भविष्यति जामातिको च ॥ अथ खलु भिक्षवो स काशिराजा ब्राह्मणपुरोहितमाह ॥ तत्र काश्यपो नाम ऋषिः प्रतिवसति । तस्य राजर्षिस्य तत्र आश्रमपदे प्रतिवसन्तस्य मृगीये सकाशातो एकशृंगको नाम ऋषिकुमारो उत्पन्नो ति । यं नूनाहं नलिनीधीतां राजकुमारीं एकशृङ्गस्य ऋषिकुमारस्य दद्देयं सो मे पुत्रो भविष्यति जामातिको च ॥

अथ खलु भिक्षवः स काशिराजा ब्राह्मणं पुरोहितं राजाचार्यं आमन्त्रयति । गच्छथ पुरोहित इमां नलिनीं राजकन्यां एकशृंगस्य ऋषिकुमारस्य देथ । सो मे पुत्रो भविष्यति जामातिको च ॥

अथ खलु भिक्षवो ब्राह्मणपुरोहितो राजाचार्यः नलिनीं राजकुमारीं सपरिवारां अश्वरथे आरूढयित्वा प्रभूतं चान्नपानं मोदका[305$^b$]नि च नानाप्रकाराणि खादनीयभोजनीयानि आदाय साहंजनीं आश्रमपदं आगमे ॥ ते च दानि साहंजनीमाश्रमपदं गत्वा आश्रमस्य नातिदूरेणापि समीपे गता ॥ तत्र नलिनी राजकुमारी सखीहि सार्धं क्रीडति हसति तानि च क्रीडमानानि दृष्ट्वा तानि मृगपक्षिगणानि सन्त्रसन्ति दिशोदिशं परिधावन्ति ॥ अथ खलु भिक्षवः एकशृंगस्य ऋषिकुमारस्य एतदभूषि ॥ किं नु खल्विमे व मृगपक्षिगणाः सन्त्रसन्ति दिशोदिशं च परिधावन्ति ॥ अथ खलु भिक्षवः एकशृंगो ऋषिकुमारः येन नलिनी राजकन्या तेनागमि ॥ अद्राक्षीद्भिक्षव एकशृंगको ऋषिकुमारो नलिनीं राजकुमारीं सखीहि सार्धं क्रीड-

1[1]. BM °tam̃ gam̃°. — 1[2]. M °gâye kule saham̃° BM °ṛishisya | tatra° M °de praticasanta°. — 4. M yam̃ nûnâ° B °ham̃ nalînidhî ° tasya dadyeyam̃ ° shyati | jâ° M °shyati yâmâ°. — 5. B °brâhmaṇabrâhmaṇapu°.

6[2]. B °çâto | e°. — 8. M yannunâ° B °rasya dadeyam̃° M °shyati yâmâ°. — 10. M °kshavo sa kâ°.

11[1]. B gaccha ta pu ° mâm̃ nandalini râjakanyâ e°. — 13. BM °rohita râ° M °jâcâryyo nali ° tam̃ cânteyânam̃ modakâni khâ° B °dâya soham̃° M °ham̃janîm âçra ° dam̃ âm̃gamya B °game te°. — 15. M te ca | tâni sâ° B °ca tâni soham̃° M °gataḥ | B °gatâ ta°.

16. M °ṇâni sam̃trasam̃ti diço ° dhâvam̃ti | . — 18. M °rasyaitad a°. — 19. M °ṇâḥ sam̃trasam̃ti diço ° dhâvayam̃ti || B °dhâvayanti || . — 20. BM °go rishi° M °mâro ye° B °râjakam̃nyâ°.

21. M °kshavaḥ e ° lini râjakumâri sa° B °hehi ca vastrehi ca dṛi° M °strehi ca dṛi°.

न्तीं स्वलंकृतां सुभूषितां महारहेहि वस्त्रेहि । दृष्ट्वा च पुनः तस्यैतदभूषि ॥ शोभना खल्विमे ऋषिकुमारा उदाराणि तासां अजिनानि जटानि च अजिनमेखलानि च ॥ निध्यायति राजकन्यानां । सो दानि राजकन्यानां अजिनमेखलानि अतिरिव काये विभासन्तानि पश्यति ॥ सो दानि एकशृंगको नलिनीं पृच्छति ॥ शोभनानि युष्माकं अजिनानि जटानि मेखलानि च कण्ठसूत्राणि च ॥ सा दानि नलिनी राजकुमारी एकशृंगं ऋषिकुमारं हस्ते गृह्य आह ॥ एतानि एदृशानि अस्माकं अजिनानि च मेखलानि च कण्ठसूत्राणि च हस्तसूत्राणि च ॥ सा दानि तस्य ऋषिकुमारस्य मोदकानि पानं च अनुप्रदासि इदमस्माकं हस्ते मोदकं परिभुंजाहीति ॥ तेन दानि तानि मोदकानि परिभुक्तानि पानकं पि च पीतं ॥ तस्य तहिं आश्रमपदे कटुकषायेहि फलफलेहि जिह्वेन्द्रियप्रत्याहतस्य तेहि मोदकेहि परिभुंजमानस्य अतिरिव रसेषु आस्वादो नुगृहीतो ॥ तानि च पानकपिबनानि पीत्वा सो दानि आह ॥ शोभनानि युष्माकमिमानि फलाफलानि पानीयं च अजिनमेखलानि च कण्ठसूत्राणि च हस्तसूत्राणि च उदाराणि न भोजनानि अस्माकं आश्रमे एदृशानि ॥

अथ खलु भिक्षवो नलिनी राजकुमारी एकशृंगं ऋषिकुमारं एतदुवाच ॥ आगच्छ ऋ[306a]षिकुमार इदमस्माकं उटजानि संचारिमानि येन इच्छाम तेन एतानि उटजानि आदाय गच्छाम आगच्छ अस्माकं उटजं प्रविश्य आश्रमं ते च उपदर्शयिष्यामि ॥ सा दानि नलिनी तत्र यानं अभिरुहित्वा एकशृंगस्य हस्तं प्रणामि आगच्छ प्रविशाहि इदमस्माकं उटजं आश्रमं प्रवेक्ष्याम त्ति ॥ सो दानि तत्र याने अश्वानि आयुक्तानि दृष्ट्वा आह ॥ मम मृगी माता इमं च उटजं मृगा

1[1]. M °punar asyai°. — 1[2]. BM °me ṛishiḥ ku ° lâni ca ni°. — 3[1]. B °dhyâyanti râ°. — 3[2]. M °bhâ sayaṁtâni paçyaṁti ‖ B °çyanti ‖. — 4[1]. M °pîṁ paçyati ‖ so dâni ekaçṛiṁgako nalinî pṛicchati | . — 4[2]. M °yushmâṁkaṁ ajinâni ca mekhalâni ca kaṁṭhasutrâ°. — 5. B °çṛiṁgasya ṛi°.

6. M °lâni ca kaṁṭhasutrâṇi ca ha°. — 7. B °pradâni i° M °pradâni | i° B °hasto mo° BM °bhuṁjati | . — 9[1]. BM tena dâni kâçirâjâ paribhuṁjâhi(M °ti)ti | tena dâni tâ ° kaṁ pi vânaṁ ca pi° B °taṁ ta°. — 9[2]. BM °dehi kaṭu° M °lehi dvijihvendriyehi pratyâ ° sha âçvâdânugṛihîtâ ‖ B °svâdânugṛiddhatâ tâ°.

11. M jñâni ca pâ° BM °pibânâni pîtvâ ‖ so°. — 12. M °mâni phalaphalâni pâ ° khalâni ca kaṁṭhasutrâṇi ca hastasutrâṇi ca n BM °râṇi bhoja° M °smâkam âçra°. — 15. M °vâcat ‖ .

16. B °kaṁ udapâni saṁ° M °kaṁ udupâni sacâri° BM °etâni uda(M °du)pânâni âdâ° kaṁ udayaṁ pra° BM °çramaṁ te(M °me) na upadarçayishyami ‖ . — 18. B °ṇâti â° M °udayam âçra° BM °maṁ pravishyâman ti ‖ . — 20. M mama çriṁmî mâ° BM °ca udayaṁ mṛigâ° M °vahaṁti nâ°.

वहन्ति नाहं अत्र प्रविशामि ॥ सा दानि नलिनी एकशृंगस्य ऋषिकुमारस्य हस्ते लगति कण्ठे लगति आलिंगति चुम्बति प्रलोभेति च ऋषिकुमारो च ताये नलिनीये मूर्धातो उपादाय यावत्पादेषु निमित्तं पश्यति । अन्यादृशा स्वकानि जटानि अन्यादृशानि नलिनीये अन्यादृशं रूपं पश्यति अन्यादृशं नलिनीये अन्यादृशं स्वकं मुंजमेखलं अन्यादृशं नलिनीये अन्यादृशानि स्वकानि हस्तसूत्राणि पश्यति अन्यादृशानि नलिनीये ॥ सा दानि ऋषिकुमारेण सार्धं आलापसमालापं कृत्वा विश्वासं च संभावयित्वा प्रेमं च संजनयित्वा यथोक्तं भगवता ॥

पूर्वैवासनिवासेन प्रत्युत्पन्नहितेन वा ।
एवन्तं संजायते प्रेमं उत्पलं वा यथोदके ॥
यत्र मनं निवसति चित्तं वापि प्रसीदति ।
निष्ठां पण्डितो गच्छेया संतुष्टा मे पुरे सह ॥

तेषां संसारे सन्सरन्तानां दीर्घरात्रं जन्मसहस्रकोटीभिः परस्परेषां समागमो आसि भार्यापतियां तस्मात्तेषां सह दर्शनेन परस्परं प्रेमं निपतति ॥ सा दानि नलिनी एकशृंगस्य ऋषिकुमारस्य प्रलोभनाभिप्राया राजार्हाणि मोदकानि खादनीयभोजनीयानि च परिभुंजापेत्वा प्रणीतानि च पानकानि पायेत्वा आलम्बित्वा च चुंबयित्वा च कण्ठसमालपतो च कृत्वा अश्वयानं अभिरुहित्वा वाराणसीं प्रत्यागता ॥ एतां प्रकृतिं विस्तरेणारोचयति ॥ एकशृंगको ऋषिकुमारो पि आश्रमं गत्वा तां नलिनीं राजधीतां मूर्धातो समुपादाय यावत्पादेषु रंजनीयानि निमित्तानि मनसिकरोन्तो आसति नेव मूलफलानि आनेति न उदकं न काष्ठानि न आश्रमपदं संमार्जति अग्निहोत्रं पटिजागरेति ॥

1. M °ṇṭhe laguti â ° to udupâdâya° B °çyati a°. — 3. BM °jaṭâni anyâdṛiçâni naliniye anyâdṛiçâni rû° M °paṁ paçyati anyâdṛiçaṁ naliniye anyâdṛiçâni rupaṁ paçyati anyâdṛiçaṁ svakaṁ muñjamesharaṁ anyâdṛiçâni svakâni hastasutrâni paçyati ‖ anyâdṛiçâni naliniye ‖ B °sûtrâni pa°.

6. M sa dâni tena ṛishiṇâ ku° BM °âlâpaṁ samâ° B °paṁ vitvâ° BM °viçvastaṁ ca saṁbhâ°. — 8. M °tpannehi°. — 9. M °tparaṁ vâ°. — 10. M °vasaṁti ‖ ci° B °vasanti ci°.

11. M nishṭâ paṁḍito gacchemâ saṁ° B nishṭhâ paṇḍi ° tustâ me ° sahâ te°. — 12. M teshâṁ sansâre sansâraṁtânâṁ° B °rgharâtrajatmasa° BM °hasrâ koṭibhi(M °bhiḥ) paraspare° M °gamaḥ â° BM °bhâryyâ(B °ryâṁ)patishâm abhût teshâṁ° B °nipyatanti ‖ M °nipâtyaṁti ‖. — 13. B so dâ° M bho dâ ° lobhenâpi abhimâyâ râjârhâ ° bhojanimâni ca pari° BM °ṇitâni ca pânakâni ca pâyatvâ alambi(M °âlaṁbi)tvâ ca cuṁ° M °bayitvâ ca kaṁṭhe sa ° çvayânam abhiruhiya vâ ° gato e°.

17[2]. M °naivaṁ mulapha ° kaṁ na kâṁshṭhâni° B °daṁ samârjati | agni° M °traṁ pratipâkaroti | B °tipâkaroti |.

सो दानि ऋषिः [306[b]] तं कुमारं चिन्तापरं दृष्ट्वा पृच्छति ॥ न ते काष्ठानि भिन्नानि न ते उदकं आहृतं अग्निहोत्रं न जुहितं किन्तु त्वं ध्यानं ध्यायसि ॥ ऋषिकुमारो आह ॥ इह अन्यातो आश्रमातो ऋषिकुमारो संबहुलेहि ऋषिकुमारेहि सार्धं आगतो प्रासादिको दर्शनीयो शोभनेहि जटेहि अजिनेहि शोभनेहि कण्ठसूत्रेहि हस्तसूत्रेहि शोभनेहि मुंजमेखलेहि मृष्टानि च सानं फलफलानि पानीयं च न एदृशं यथास्माकं मृगयुक्ते पि उटजे अच्छन्ति ते मया आश्रमस्य अमुकस्मिं प्रदेशे दृष्टा तेन च मे ऋषिकुमारेण सार्धं प्रीति संजाता कण्ठे च सो गृह्य मम प्रकाशं वक्त्रेण वक्त्रं प्रणिधाय शब्दं करोति तं मे जनये प्रहर्षं तमहं स्मरन्तो परिदीनवक्त्रो तेन विना न रमामि आश्रमे ॥ ऋषिणो दानि ऋषिकुमारस्य श्रुत्वा तदभूषि ॥ यादृशं अयं ऋषिकुमारो तेषां वर्णसंस्थानं आचिक्षति न ते ऋषिकुमारा स्त्रीहि ताहि भवितव्यं ॥ सो दानि ऋषि तं एकशृंगकं ऋषिकुमारं आह ॥ पुत्र न ते ऋषिकुमारा स्त्रियास्तायो ऋषीणां लोभेन्ति तपातो वारयन्ति । ऋषिभिस्तायो दूरातो परिवर्जयितव्या अन्तरायकरायो ब्रह्मचारिणां । मा तेहि सार्धं समं करोहि आशीविषसमा तायो विषपत्रसमा तायो अंगारकर्षूपमा तायो ॥

सो दानि काशिराजा तं पुरोहितं आह ॥ नावासु अशोकवनिकानि रोपेत्वा पुष्पफलोपेतेहि वृक्षेहि गंगाये प्रतिश्रोतेन तं आश्रमपदं गच्छाहि नलिनीये सपरिवाराये सार्धं ततो तमृषिकुमारं नावायमारूहयित्वा आनेहि ॥ सो दानि पुरोहितो काशिराज्ञः प्रतिश्रुत्वा नलिनीं राजकन्यां पुरिमांतांगिकचेतिष्ठाहि नावाहि विततवितानाहि चित्रदुष्यपरिक्षिप्ताहि ओसक्तपट्टदामकलापाहि धूपनधूपिताहि

1[1]. M °ṛishis taṁ ku° BM °cchati na°. — 1[2]. M °hṛitaṁ ‖ agni° taṁ kiṁ tu vadhyâ vadhyâyati ‖ B °kintu . . . vyâvadhyâyati ‖. — 3. M °bahulehi sârddhaṁ °nīyo çobhanehi jâ° jinehi çobhanehi kaṇṭhasutre° stasutrehi çobhanehi muṁ° B °meshalehi mṛi° M °shṭâli ca sâtaṁ phala° B °naṁ phalephalâ° M °yaṁ ca naidṛiçâṁ yathâ° BM °kaṁ mṛigayukte(M °yûthe)hi udaye arthanti(M °rtheṁti) te mayâ° deça dṛishṭvâ tena ca me ṛi° B °saṁjâto kaṇṭhe° M °saṁjâte kaṇṭhe° çaṁ jaṭehi gṛihya ma va nânyavakhena vaktraṁ° BM °çrame ṛi°.

9. BM ṛishiṇâ dâ° M °ni kumâ° tvâ eta°. — 10. M °ayam ṛishi° B °âçishyati | na° M °tâbhi bhavi°.

11[1]. B °dâni ṛishiṁ taṁ° M °dâni vâshi tam etaçriṁgakam ṛishikumâram âha ‖. — 11[2]. M putra naṁ te° s târo ṛishiṇâlo° B °s tâvo ṛishi° M °lobheṁti tapâto câryyaṁti ‖ B °to câryenti |. — 12. BM °s tâvo dû° yakarâvo bra° ṇâṁ mâ°. — 13. BM °rohi asi(M âçi)vishasamâ tâvo vishapatra(M °panna)samâ tâvo aṁgârakarshopa(M °rahasa)mâ tâvo |. — 15[1]. BM dâni° M °hita âha ‖. — 15[2]. BM °kâni râpetvâ pu° M °lopetâni vṛi° B °lopetehi kakshe° M °çrotena tam âçra° BM °yam âru(M °ruva)hitvâ â°.

17. M °çirâjño pratiçru° purimataṁgikacetimâhi nâvâhi vi° B °purimaṁṭaṁgikaveṭimâhi nâvâhi vi° M °ciptadushya° BM °kshiptâ o° M °lâpâna dhupitâhi ma° saparivârâm âruhitvâ° çrotena tahiṁ sâhaṁjanim âçra°.

मुक्तपुष्पावकीर्णाहि सपरिवारां आरूपित्वा गंगाये प्रतिश्रोतेन तं साहंजनिं आश्रमपदं गतो ॥ तेन दानि तस्य आश्रमपदस्य समीपे नावानि स्थापेत्वा सा नलिनी राजकन्या एकशृंगस्य ऋषिकुमारस्य सकाशं विसर्जिता गच्छ त्वं ऋषिकुमारमानेहि ॥ सा दानि नलिनी राजकुमारी नावातो ओतरित्वा सपरिवारा तत्राश्रमपदे नानाप्रकाराणि वनकुसुमानि च वनकिसलयानि च प्रलावेन्ती आसति । तां पि च दृष्ट्वा ततो आश्रमातो मृगपक्षिगणा त्रस्त[307*]त्रस्तकानि शतानि मुंचमानि दिशोदिशं प्रधावन्ति ॥ ऋषिकुमारो पि तानि मृगपक्षिगणानि सन्त्रस्तानि दृष्ट्वा तं प्रदेशं गतः । ततो तां पश्यति नलिनीं राजकुमारीं सपरिवारां वनकुसुमानि च वनकिसलानि च प्रलावेन्तीं ॥ दृष्ट्वा च पुनर्येन नलिनी राजकुमारी तेनोपसंक्रान्तो ॥ नलिनीये ऋषिकुमारो भूयो अभिनन्दितो कण्ठे च लग्ना भूयो च आलिंगितो चुंबितो च मोदकानि च खज्जकप्रकाराणि च परिभुंजित्वा राजार्हाणि च पानकानि पिबित्वा नलिनीये सार्धं तान्नावां आरूढो ॥ नलिनी आह ॥ इमे अस्माकं आश्रमे उदके संचरन्ति ॥ सो ताये प्रलोभेत्वा नावायानेन वाराणसीमानीतो । पुरोहितेन ऋषिकुमारस्य नलिनी पाणिग्रहं कृत्वा दिन्ना ॥ सो ताये नलिनीये सार्धं आसति क्रीडति न पन संयोगं गच्छति । जानाति वयस्यो मे ऋषिकुमारो ति ॥

सो दानि ताये नलिनीये सार्धं तस्यां नावायां साहंजनिमाश्रमपदं गतः ताये च मातरे मृगीये एकशृंगको ऋषिकुमारो नलिनीये राजकुमारीये सार्धं आगच्छन्तो दृष्टः ॥ सा दानि पुत्रं पृच्छति । पुत्र कहिं सि गतो ति ॥ सो दानि आह ॥ इमस्य मे वयस्यस्य आश्रमं गतो ति ॥ एषो मे वयस्य अग्निं प्रदक्षिणीकृत्वा उदकेन पाणिना गृहीतो ति ॥ तस्या दानि मृगीये एतदभूषि ॥ न खलु

2. BM °pe nâvâ nishapo(M °nipato)tvâ sâ ° jakaññyâ e° M °ṛjita gacchaṁtaṁ ṛi° B °cchantaṁ ṛishikumâra ânehi sâ°. — 4. BM °to âru° M °de nânâprakârâni vanaku° BM °sumânâni ca vanakiçalakâni ca pralobhenti âsanti (M °prarobheṁti âsaṁti) |.

6. BM tâni ca dṛi ° muñcatâni diço° M °dhâvaṁti || B °nti ṛi°. — 7. B °ṇâni satrasantâ° M °ṇâni saṁtrasaṁtâni dṛi° B °gataḥ ta°. — 8. BM °to taṁ paçya ° kiçalâni(B °ni ca) pralâpenti dṛi°. — 9. M °saṁkrâṁto B °nto na°. — 10. M °ndito kaṁṭhe lagno bhûyo ca â ° kâni ca shajja ° rhâni ca pâ ° rddhaṁ tâṁ nâvâṁ âruhi âsati ||.

13[1]. M krîḍati nali°. — 13[2]. BM °âçramo u° M °caraṁti. — 13[3]. B °pralâbhe°. — 14. BM °liniye pâṇi°. — 15. B °ḍati na vana saṁ° M °ḍati na va saṁ°.

17. BM so dâni tâye naliniye sârddhaṁ tâṁ nâvâṁ sâ° M °janim âçra° B °çramaṁpadaṁ° M °daṁ gato tâye ca mṛigiye mâtare e° B °mâtaramṛi° M °dṛishṭo B °shṭaḥ sâ°. — 19[1]. B °cchati pu°. — 19[2]. M putra ko esho hiṁ si°. — 20[1]. M °vayasya âçra° B °vayasyâsya â°. — 20[2]. M °vayasyo agniṁ ° kshiṇiṁkṛi° B °gṛihitaṁ ti ta°.

21[1]. BM tasya dâ°. — 21[2]. M khalu ° ro vayasya saṁjâ° BM °tena te esha(M °sho) bhâryâ a° M °kshiṇiṁkṛi ° pânigṛi°.

पुनरयमृषिकुमारो वयस्यं जानाति भार्या वा इयं च कन्या अयं च ऋषिकुमारो पुरुषोत्तमो एतेन तु एषा भार्या अग्निं प्रदक्षिणीकृत्वा उदकेन पाणिगृहीता भार्या लब्धा ति ॥ तत्र को मे ऋषिकुमारस्य एतमर्थं संबोधये यथा न एष ऋषिकुमारो काशिराज्ञो एषा धीता नलिनी नाम तव भार्या दिन्ना ति ॥ तत्र च साहंजनिस्य आश्रमपदस्य हेष्टा गंगाकूले प्रतिव्रतानां तापसीनां आश्रमपदं प्रविशन्तो ऋषिकुमारो तापसीहि वारियति ॥ मा तुवं अत्र आश्रमपदे प्रविशाहि त्वं पुरुषो एषो च स्त्रीणां प्रतिव्रतानां ब्रह्मचारिणीनां आश्रमो ति न लभ्यं अत्र पुरुषेण प्रविशितुं ॥ सो दानि ऋषिकुमारो तां तापसीं पृच्छति ॥ को वा स्त्री पुरुषो वा ति ॥ तस्य ताये तापसीये स्त्रीधर्मा च आचिक्षिता न एष तव वयस्यो न एष ऋषि[307ᵇ]कुमारो एषा स्त्री नलिनी नाम राजकुमारी काशिराज्ञो धीता त्वं च पुरुषो मृगीतो उत्पन्नो ततो त्वं न जानासि एषा तव उदकेन भार्या दिन्ना त्वं च एतस्या पति नो लभ्या युष्माभिः अन्यमन्यं त्यजितुं ॥

सो दानि ऋषिकुमारो तासान्तापसीनां श्रुत्वा नलिनीये सार्धं साहंजनिं आश्रमपदं पितुः काश्यपस्य ऋषिस्य सकाशं गतो पितुः पादां वन्दित्वा सार्धं नलिनीये एतां प्रकृतिं सर्वां आरोचयति ॥ ऋषिस्य एतदभूषि ॥ न शक्यति ऋषिकुमारो नलिनीये विना इह आश्रमपदे प्रतिवसितुं परस्परस्य एते बद्धसंजाता स्नेहसंजाता ॥ सो दानि तं पुत्रं एकशृंगं ऋषिकुमारं आह ॥ पुत्र एषा तव नलिनी राजकुमारी अग्निदेवं साक्षीकृत्वा उदकेन पाणिगृहीता दिन्ना । एषा ते भार्या त्वं च एतस्या पतिः । न लभ्या युष्माभिः परस्परस्य त्यजितुं । गच्छ एताय सार्धं वाराणसीं नगरं ॥ ते दानि ऋषिस्य पादां वन्दित्वा प्रदक्षिणीं च कृत्वा

3. BM °tra ko me ṛi° evam arthaṁ° yathá va na esha° ro ráçirájño° B °náma tatra bhárya dinná | . — 4. M °haṁjanisya á° B °gaṁgákule° M °gaṁgákule pativra° B °daṁ gacháma | tena dániṁ tan tápasináṁ áçramapadaṁ gatá tatra ca tápasináṁ áçramapadaṁ pravi° BM °hi várayati má°.

6. M má bhuvo a° BM °tvaṁ parusho esháṁ ca° M °striṇáṁ pativra° cáriṇáṁ á° B °bhyaṁ | a° M °rushaṁṇa praviçatuṁ ‖ B °taṁ so°. — $8^1$. M °ro tán tápa°. — $8^2$. B °sho vá yáti ta° M °sho vá pi ta°. — 9. M °siyaṁ stridharmá ca ácikshati naisha tava vaya° B °çirájñá dhi° nno tato taṁ na já° M °dinnáḥ tvaṁ cásyá°.

13. M °ro tásáṁ tápa° BM °çrutvá naliniyena(M °yeta) sárddhaṁ sáhaṁjaniṁ áçra° B °pade pituḥ káçya° BM °ṛishi saká° M °niya e° B °ekáṁ pra° M °tiṁ sarvam áro° BM °ti ṛi°. — $15^2$. M °çakya ṛi° pratiriçituṁ paraspa e° B °prativaçituṁ° M °ddhasaṁjñátasnehásaṁjátá B °ddhasaṁjátasnehásaṁjátá | .

$17^1$. M °çriṁga ṛi° máram áha ‖ . — $17^2$. BM °esha ta° M °va nálani° BM °deváṁ sá° udakaṁ ca pá° M °dinnáḥ ‖ . — 18. M eteshám bháryáṁ tvaṁ° patir na la° B °patiṁ na°. — $19^1$. M °labhya yu°. — 20. M °dáṁ vaṁditvá pra° BM °ṇiṁ ca máta° M °siṁ gato gatvá káçirájñá upasaṁkráṁtá rá° B °ntá rá°.

मातरं च अभिवादेत्वा वाराणसीं गता गत्वा काशिराज्ञो उपसंक्रान्ता ॥ राज्ञा ऋषिकुमारस्य अनुरूपं गृहं दिन्नं परिवारं च उपस्तरणप्रत्यास्तरणं च सर्वाणि च उपभोगपरिभोगानि च युवराज्येनाभिषिक्तो ॥

सर्वे क्षयान्ता निचयाः पतनान्ता समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं पि जीवितं ॥

सो दानि काशिराजा कालधर्मेण संयुक्तो कालगतो एकशृंगेण वाराणस्यां राज्यं प्रतिलब्धं ॥

तेन दानि नलिनीये मूलातो यमजाता द्वात्रिंशत्पुत्रा जाता । अपराणां पि देवीनां मूलातो सातिरेकं पुत्रशतं जातं ॥ धर्मेण राज्यमनुशासयित्वा चिरं दीर्घरात्रं ज्येष्ठपुत्रं राज्ये भिषिंचित्वा पुनः ऋषिप्रव्रज्यां प्रव्रजितो ॥ तेन दानि पूर्वरात्रापररात्रं जागरिकायोगसमनुयुक्तेन युज्यन्तेन घटन्तेन व्यायमन्तेन वाहितकेन मार्गेण चत्वारि ध्यानान्युत्पादितानि पंचाभिज्ञा साक्षात्कृता ॥ सो दानि कामधातुं समतिक्रमित्वा कायस्य भेदात् ब्रह्मदेवनिकाये उत्पन्नो ॥

भगवानाह ॥ यस्तेन कालेन काश्यपो ऋषिरेष स शुद्धोदनो अभूषि । या सा मृगी एषा सा भिक्षवो महाप्रजापती अभूषि । यश्च काशिराजो भूदेष एव महानामो शाक्यो भूत् । यश्चैकशृंगको ऋषिकुमारस्तदाहं एव बभूव । या च नलिनी ना[308a]म राजकन्या एषैव यशोधरा अभूषि ॥ तदापि एषा आत्मानं अलंकृत्वा मम प्रलोभेति । एतरहिं पि एषात्मानं अलंकृत्वा मम प्रलोभेति ॥

## नलिनीये राजकुमारीये जातकं समाप्तं ॥

1. M rájño ṛi ° starasya pratyácaraṇaṁ° B °tyávara°. — 4. B °yántá vica° M °nicayá pa° BM °ochrayáḥ saṁ°. — 5. B °ṇánta hi ji° M °ṇánta hiṁ ji°.

6. B °rmeṇa saṁko ká° M °kto kásagato rákaçṛiṁ° B °çṛiṁgena vá° M °pratilaṁbdhaṁ ‖. — 8[1]. B °láto — matmághá triṁ° M °yamapárá dvá ° játáḥ |. — 8[2]. M °viṇám múláto sotire°. — 9. M °ṇa rájyaṁ anu° B °ṇa rájyaṁm anu° M °sayi ciraṁ° BM °jyeshṭapu° M °jye 'bhi ° shipravrajito ‖. — 10. M °yogam anuyuktena pújya ° vyáyamaṁtena vá° B °vyáyapantena vá° M °sákshíkṛitá |.

12. M °dhátu sama ° bhedád bráhmaṇo de° B °bráhmo de° M °tpannaṁ ‖. — 14[2]. M °lena tena samayena káçyapo náma ṛishiḥ esha° |. — 14[3]. M má sá mṛigí evá sá bhi° B °pati gau° M °gauttami°. — 15. B °rájño bhúd e° M °d eshaivaṁ ma ° çákyo 'bhút | B °çákyá bhút |.

16[1]. M °çṛiṁgo ṛi ° evaṁ ba°. — 16[2]. B °rájakaṁnyá°. — 17. M °eshá ánaṁ a°. — 19. M iti çrímahávastuavadáne nali°.

भिक्षू भगवन्तमाहन्सुः ॥ पश्य भगवन् कथमियं यशोधरा राज्ञा शुद्धोदनेन अननुयुञ्जित्वा अपर्यवगाहित्वा अनपराधी वध्या ति ओसृष्टा ॥ भगवानाह ॥ न भिक्षवः एतरहिमेव एषा यशोधरा राज्ञा शुद्धोधनेन अननुयुञ्जित्वा अनपराधी वध्या ओसृष्टा । अन्यदापि एषा यशोधरा इमिना राज्ञा शुद्धोदनेन अननुयुञ्जित्वा अपर्यवगाहित्वा अनपराधी वध्या ओसृष्टा ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवं ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

अतीतमध्वाने अनुहिमवन्ते महावनखण्डं तत्र माण्डव्यस्य ऋषिस्य आश्रमपदं चतुर्ध्यानलाभिनः पंचाभिज्ञस्य महाभागस्य मूलोपेतं फलोपेतं पुष्पोपेतं पत्रोपेतं पानीयोपेतं मृगपक्षिशतसहस्रेहि निषेवितं ॥ अथ खलु भिक्षवो माण्डव्येन ऋषिणा ग्रीष्माणां पश्चिमे मासे क्षुद्रपाकेहि फलेहि परिभुक्तेहि बहुतरेण च पानीयेन पीतेन अभिष्यन्देहि धातूहि उपलकुण्डके सशुक्रं प्रस्रावं कृतं ॥ अथ खलु भिक्षवो अन्यतरा मृगी ऋतुमती तृषायां श्रान्ता पानीयसंज्ञाय ततो उपलकुण्डकातो तस्मृषिस्य सशुक्रं प्रस्रावं पीतं । अशुचिम्रक्षितेन च मुखतुण्डकेन स्वकं योनिमुखं परिलेहसि । अचिन्त्यो सत्वानां कर्मविपाकः । ताये मृगीये तं शुक्रं रुधिरं च संमूर्छित्वा कुक्षिं प्रतिलब्धं ॥ सा दानि तस्यैव आश्रमपदस्य परिसामन्तेन चरति परिभ्रमति च ॥ सा दानि कालेन च समयेन च दारिकां दर्शनीयां अक्षुद्रावकाशां परमया शुभवर्णपुष्कलतया समन्वागतां गौरीं नवनीतपिण्डसंनिभां प्रसूता ॥ सा दानि मृगी तां दारिकां प्रसूता च तेन च ऋषिणा तं द्रव्यं दृष्टं ॥ तस्यैतदभूषि ॥ कुतो इमस्यास्तिरश्चानगताये मृगीये मानुषं अपत्यन्ति ॥ समन्वाहरित्वा ऋषिणां पंचाभिज्ञानां ज्ञानं प्रवर्तति ॥ सो दानि ऋषि माण्डव्यो

1[1]. B bhikshu bha° M bhikshor bhagavaṁtam âha° B °vanta âhansuḥ pa°. — 1[2]. M °yujitvâ aparyâvagâhetvâ ana° B °jyitvâ parya° M °osṛishṭo ‖ anyadâ° (*l.* 4). — 3. B °yujyiṁtvâ ana°. — 4. M °pi evâ ya° dharâ etinâ° B °dharâ eminâ° M °nena anuyuṁjitvâ aparyya°. — 5. BM bhikshu â°.

6[1]. M °gavan ‖. — 6[2]. M °kshavaḥ B °kshavo a°. — 7. M atîtam adhyâne° B °hâvanashaṇḍe tatra maṇḍa° M °hâvanakhaṁḍe tatra maṁḍavya° B °mûlopetaṁ | pha° M °gapakshigaṇaça°. — 9. B °vo maṇḍa° M °vo maṁḍavye° shyandehi dhâ° B °shyande dhâ° M °utparakundake° B °ṇḍakehi sa° M °çakrapramrâvaṁ°.

11. M °pânîyaṁ saṁjñâya tataḥ utparakundakâto taṁ ṛishi° B °ṇḍalakâto° B °pramrâvaṁ° M °pramrâvaṁ titaṁ. — 13. M °tuṁḍake° B °parilekhasi | M °parilekhesi. — 14[1]. B acintyaṁ sa° M acintya sa° pâko to°. — 14[2]. M toye mṛi° B °mṛigi taṁ° BM °çukrarudhi° M °saṁmûrcchitvâ° B °kukshi pra°.

16. M °lena ca dâ° drâvakâçaṁ pa° B °paramapâṇḍubha° M °shkaratayâ° BM °gauri nava° M °nîtapiṁḍasaṁ° prasutâḥ |. — 18. M °kâṁ dyasutâṁ ca te° B °sûtâṁ ca tena câ rishi° BM °dravyena dṛishṭvâ ta°. — 19[1]. M °ayâ tiriccha° patyaṁ ti B °n°ti sa°. — 20. B °shi maṇḍa°.

पंचाभिज्ञो महाभागो समन्वाहरति ॥ इह मम [308b] अत्र आश्रमपदे अन्यस्य पुरुषस्य प्रचारो नास्ति । एषा च मृगी इमहिं एव मम आश्रमपदे जाता संवृत्ता तथान्यान्यपि मृगपक्षिशतानि इह वनखण्डे संवृत्तानि नैव मम क्वचित् मृगो वा पक्षी वा अन्यवनखण्डं गच्छति न चान्यातो वनखण्डातो कोचित् मृगपक्षी इहागच्छति । इह एते वनखण्डे मृगपक्षिगणा जाता च संवृत्ता च संवृद्धा च अभिरता च अमनुष्यचरितं च वनखण्डं । अमुककाले मया ग्रीष्माणां पश्चिमे मासे पक्वसुपक्वानि च फलफलानि परिभुक्तानि सुशीतलं च बहुतरं पानीयं पीतं । ततः मे भिष्यन्देहि धातूहि उत्पलकुण्डके सशुक्रं प्रस्रावं कृतं एताये मृगीये तृषिताये तं सशुक्रं प्रस्रावं पानीयसंज्ञाये पीतं । ततो एताये मृगीये कुक्षिं प्रतिलब्धं । मम एष अंगनिस्रावो ॥ तस्य ऋषिस्य माण्डव्यस्य तत्र दारिकाये अतिप्रेमं संजातं ॥ तेन सा दारिका अजिनकेन गृह्य आश्रममानीता । साप्यस्य मृगी पृष्ठतो न्वेति ॥ तेन दानि ऋषिणा ताये दारिकाये तं नाभि फलशस्त्रकेन छिन्नं मानुषिकाये च नं केलायनाय केलायन्ती ताये वनमृगीये स्तनाचूषणं आसति । सो पि नं ऋषि क्षुद्रपाकानि फलानि मुखे पीडेति कालेन कालं तैलेनाभ्यंगेति सुखोदकेन स्नपेति ॥ संवर्धयमाना च सा दारिका ताये मृगीये तेन च ऋषिणा अतीव तं वनं शोभेति सा च नां माता जिह्वाये परिलिहति ॥ यत्र काले सा दारिका विवर्धमाना पादेहि पि चंक्रमति ततो यत्र यत्र पादा निक्षिपति तत्र तत्र ताये दारिकाये पूर्वोपचितेन शुभस्य कर्मस्य विपाकेन पद्मानि प्रादुर्भवन्ति ।

1. B iha mama putra ° pracâra nâsti | . — 2. BM °imamhi evam mama â° B °çramapadam jâ° M °jâtâḥ ‖ samvṛitâḥ ta° BM °thânyânapi mṛi° M °naivam mama kva° B °go vâ pakshi vâ anyavanashaṇḍam° M °kshi vâ anyavanakhamṇḍam gacchati ‖ tadânyanto vana° B °cânyanto vanashaṇḍâ° BM °to kvaci° M °t mṛigâpakshi i°. — 5. B °ete vanashaṇḍe° M °ete vanakhamḍe mṛi° ttâ ca abhi° BM °manu(B °nushya)carite ca vanakhaṇḍe amu°.

6. M °shmâyâm paçci° BM °lâni ca pari° M °hutalam pâ°. — 7. M tato me bhishyandamḍehi dhâ° B °shyantehi dhâ° M °utpalakundake çaçukrapraçrâvam° B °ṇḍake saçukram pramrâvam kṛi° M °tṛishitâye ° vam pîtya°. — 9[1]. B °kukshi pra°. — 9[2]. B °nimrâvo ta°. — 10. B °shisya maṇḍa° M °shisya mamḍavya°.

11[1]. B °âçramapadam â°. — 11[2]. M °pṛishṭato anneti ‖ . — 12. M te dâ° B °tam nâlaphalam çastra° M °tam nâlaphalaçasukena ° nushikâye vacanam kelâyanakelâyanti | tâ° B °nam kelâyanâya kelâyanti tâ ° stanamûcanam â° M °stanasucanam âsati | . — 13. BM so pi tam ṛishi(B °shi) kshu° B °ḍeti | kâlena kâ° M °kena snâpeti B °peti sam°. — 15. M samvaddhamânâ° B °varddhamânâ° M °gi etena ca ṛi ° tivam tam vanam çobhati ‖ sâ ca tâm mâtâ° B °çobhati so ca nam mâtâ° BM °likhati ya°.

16. M °vivaddhamânâ° B °ṇvati | tato° M °ṇvati | tataḥ yatra yatra pâ ° ti tatra tatra tasyâ dârikâyâ pûrvoparitena çu ° rbhavamti sa°.

समन्तेन च आश्रमपदे तस्य ऋषिस्य ताये दारिकाये पर्याहिण्डन्तिये पद्मपङ्क्ती उत्थापिता पद्मवनमिव शोभति तेहि च पद्मेहि सा दारिका क्रीडति हस्तेनापि गृह्य अच्छति ॥ तस्य दानि ऋषिस्य तस्या दारिकाये तंशुभकर्मविपाकतो क्रमेषु पद्मानि प्रादुर्भूतानि दृष्ट्वा विस्मयं संजातं अहो दारिकाये ऋद्धीति यत्र यत्र क्रमा निक्षिपति तत्र तत्र प्रासादिका[309ᵃ]नि दर्शनीयानि पद्मानि प्रादुर्भवन्ति कृतपुण्याये इमाये दारिकाये भवितव्यं पूर्वं दक्षिणीयेषु ओवप्तकुशलेषु कुशलमूलाये यस्या इमं एदृशं अनुभावं ॥ तेन दानि ऋषिणा ताये दारिकाये पदुमावतीति नामं कृतं ॥

सा दानि संवर्धमाना ताये मातरे सार्धं तस्याश्रमस्य परिसमन्तेन अच्छति । यतो यतो सा मृगी चरमाणा अच्छति ततो ततो सापि दारिका ताये मातरे सार्धं अच्छति मृगेहि च मृगपोतकेहि च सपरिवारा क्रीडन्ती अच्छति ॥ यदा च बुभुक्षिता भवति ततो ताये मातरे सार्धं तमाश्रमं आगच्छति अपरेहि मृगेहि मृगीहि च मृगपोतकेहि च सपरिवारिता । ततो सो ऋषि आश्रमगताये मृगीये मृष्टमृष्टानि फलानि देति मृष्टमृष्टानि च पानकानि देति ॥ सा दानि फलफलानि स्वयं पि खादति अपरेषां मृगपोतकानां देति ॥ यदा सा दारिका तत्राश्रमे शयिता भवति ततो ते मृगपोतका च मृगपोतिका च दारिकां अनुपरिचारित्वा शयन्ति यदा च चरितुकामा भवन्ति ततो तां दारिकां मुखतुण्डकेन प्रतिबोधयन्ति ॥ यतो यतो मृगा चरन्तो अच्छन्ति ततो ततो सा दारिका तेहि मृगेहि मृगपोतकेहि मृगपोतिकाहि च सार्धं क्रीडन्ती अच्छति । यतो यतो सा अच्छति

1. BM °çramapadaṁ tasya ṛi ° ryâhiṁḍantiye padmehi paktihi u° B °ntiye padmehi shakî u° M °dmehi sa dâ°. — 3. M °smaya saṁ° B °jâtaṁ | aho° BM °kâye riddhiti- (B °ti |) yatra yatra(M °tra caṁ)kramâṇi kshi° M °dikâ darça ° rbhavaṁti kritapuṇyâni imâ° B °nti | kṛitapuṇyâhi imâ° BM °vyaṁ | pûrvaṁ(M °rva) da° B °ṇîyashu° M °olupta° BM °lâye yasya i° BM °nubhavaṁ te°.

7. M °ye padmâva°. — 9. M °rddhamâni tâye° B °mânâni tâye° M °mâtaraṁ sâ° B °paribhrama°. — 10. BM °gi caramâni aṇvati | tato tato(M °taḥ) sâ pi° M °krîḍaṁti a° B °ḍanti a° BM °ṇvati ya°.

11. BM °vati | tato tâye(B °to tato ye) mâ°. — 13. M tataḥ so° B °so rishi° M °çramapadaṁ gatâ ° lâni phalâni deti° BM °ca phalapânikâ(M °nakâni) ca deti | . — 14. M °lâni ca svayaṁ° B °yaṁ vikhâ°. — 15. M °sâ dirikâ tatrâ° BM °ti | tato° B °te mṛigapotakâ ca cârikâṁ° M °çayaṁti || yadâ ca caritukâmâ bhavaṁti tataḥ tâṁ° B °tukâmo bhavanti | tato° M °dhayaṁti.

18. M yataḥ yato mṛigo caraṁtâ aṇvati tataḥ tato sâ dâ° B °nto aṇvati | tato tato sâ dâ° M °kehi ca sârddhaṁ krîḍati aṇvati B °kehi mṛigapotikehi ca sârddhaṁ krîḍanti aṇvati | . — 19. M yato yataḥ sâ aṇvati tato tataḥ sa° B °ti | tato tato sa ° kramanteshu pa° M °kramesha pa ° rbhavaṁti | .

ततो ततो समन्तेषु क्रमकेषु पद्मानि प्रादुर्भवन्ति । सापि दारिका तत एवन्तानि पद्मानि गृह्य स्वयं च आबन्धति तेषां च मृगपोतकानां पद्मानि आबन्धति ॥ एवं सा तेहि सार्धं क्रीडन्ती तहिं आश्रमपदे संवर्धति परस्परं विनापि न रमन्ति ॥ यत्र काले सा दारिका विज्ञप्राप्ता ततो तमृषिस्य आश्रमं सिंचति शोधेति नानाप्रकाराणि मूलविकृतीनि आनेति पत्रविकृतीनि नानाप्रकाराणि आनेति पुष्पविकृतीनि नानाप्रकाराणि आनेति फलविकृतीनि नानाप्रकाराणि आनेति उदकमानेति काष्ठं वा समिधानि वा आनेति । तं च ऋषिं तैलेनाभ्यंगेति स्नापेति । अग्निहोत्रं से पटिजागरेति तं च ऋषिं नानाप्रकारेहि मूलेहि च पत्रेहि च पुष्पेहि च [309b] फलेहि च परिविषति । नानाप्रकाराणि च फलपानानि आनयति । यतो यतो च तत्राश्रमपदे अण्वति यतो यतो गच्छति मूलहारिका वा पत्रहारिका वा पुष्पहारिका वा फलहारिका वा ततो तेहि मृगपक्षीहि परिवारिता आगच्छति ॥

कदाचित्सा पदुमावती तेहि मृगपक्षीहि परिवारिता उदकहारिं गता काम्पिल्लको च राजा ब्रह्मदत्तो बलाग्रेण सार्धं मृगव्यं अण्वन्तः तं प्रदेशं उज्झितो वातजवसमेन तुरंगेन मृगमनुजवन्तो । तेन मृगेन सो राजा ब्रह्मदत्तो वनखण्डमुपनीतः ॥ यथोक्तं भगवता धर्मपदेषु ॥

गतिर्मृगाणां प्लवनं आकाशं पक्षिणां गतिः ।
धर्मो गतिर्द्विजातीनां निर्वाणं महती गतीति ॥

सो मृगो तत्र वनखण्डे नष्टो ॥ तेन राज्ञा ब्रह्मदत्तेन वनखण्डे तं मृगं मार्गे-

1. M sá dáriká tadá evam̃ táni padmáni gri° B °riká tataḥ e° BM °yam̃ ca ábandha(M °badhnam̃)ti | teshám̃ mri ° bandheti | . — 2. B °kriḍanti ta° M °kriḍam̃ti tehim̃°. — 4. BM °çodheti | nánáprakáráṇi mú ° neti(B °ti |) pushpavikṛitíni áneti phalavikṛiti(M °ti)ni nánáprakáráṇi áneti(M °ti ||) udakam á(M °daká)neti(B °ti |) káshṭam vá (M °shṭháni vá) sa°.

7. BM °ṛishi tai° M °bhyam̃gi snáyeti. — 8. BM °tram̃ me paṭi(M °ti)pákaroti (M °ti ||) tam̃° B °ṛishi nánápra° M °ṛishiṇá nánáprakárehi mulehi ca phalehi ca patrehi ca pariviçati B °viçati | . — 9[1]. B °pánáni vá á° M °ni ca á°. — 9[2]. B °çramepade° M °ṇvati yato yataḥ gacchati múlahárikáá vá pushpaháriká vá phalaháriká vá patraháriká vá gacchati || tato° B °traháríkári vá pu ° phalaháriká vá gacchati tato ° mṛigapakshihi parivárito á° M °kshihi sapariváriká á°.

12. M °sá paimá° BM °tehi mṛiga(B °ge)pakshihi pari ° rim̃gatá ká(M °tá || kam̃)pilla ° vyam̃ aṇvataḥ(M °to) tam̃° B °ujhitvá vá ° tvá ° ujhivátajavesa° M °turagavegena mṛiga° B °ram̃gena mriga anu°. — 14. B °tto vanashaṇḍa° M °tto vanakham̃ḍam upaníto || . — 15. B tatho° BM °shu ga°.

16. M gatir mṛi° BM °plavaṇam̃ á°. — 17. B dharmá gatir vibháti° M °rmo gati vibháti° mahatám̃ gatiti | . — 18[1]. M °mṛige tatra vanakham̃ḍe nashṭo° B °shṭo te°. — 18[2]. M tatra

न्तेन तहिं उदककूले पदुमावती दृष्टा कृष्णाजिनेन निवस्ता उत्तरासंगिका च उदककुम्भेन गृहीतेन पद्मेन च शोभनेन हस्तगतेन प्रासादिका दर्शनीया परमया वर्णपुष्कलतया समन्वागता । यत्र यत्र च क्रमाणि निक्षिपति तत्र तत्र पद्मानि प्रादुर्भवन्ति मनोरमाणि सुदर्शनीयानि । दृष्ट्वा च पुनर्भिक्षवो राज्ञो ब्रह्मदत्तस्य पदुमावतीं ऋषिकुमारीं एतदभूषि ॥ अहो कन्यायाः रूपवन्तं ऋद्ध्यनुभावं यत्र यत्र क्रमाणि निक्षिपति तत्र तत्र पदुमानि प्रादुर्भवन्ति अतीव चक्षुरमणीयानि प्रासादिकानि दर्शनीयानि का नु खल्वियं भविष्यति देवकन्या वा नागकन्या वा किन्नरकन्या वा मानुषी वा इयं भविष्यति अमानुषी वा । यं नूनाहं उपसंक्रम्य परिपृच्छेयं ॥

अथ खलु भिक्षवो राजा ब्रह्मदत्तो येन पदुमावती ऋषिकुमारी तेनोपसंक्रमित्वा पदुमावतीं ऋषिकुमारीमेतदवोचत् ॥ भद्रे का त्वं कस्य वासि ॥ एवमुक्ते भिक्षवः पद्मावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदवोचत् ॥ अहं खलु ऋषि पद्मावती नाम ऋषिकुमारी माण्डव्यऋषिस्य धीता मूलफलभोगिकस्य वनवासिस्य ब्रह्मचारिस्य ॥ एवमुक्ते भिक्षवः राजा ब्रह्मदत्तो [310a] पद्मावतीं ऋषिकुमारीमेतदवोचत् ॥ केवरूपा ते भद्रे भोजनविधानानि उपवने निवसन्तीये येनासि एवं उपचितशरीरा कीदृशानि ते वस्त्रविधानानि येन ते चैवं सुकुमारवर्णनिभा ॥ एवमुक्ते भिक्षवो पदुमावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदवोचत् राज्ञो वस्त्राणि परामृशन्ती ॥ मूलफलानि अस्माकमाहारं अजिनानि प्रावरणानि एवं सूक्ष्माणि यादृशानि इमानि न च अजिनानि ॥ एवमुक्ते भिक्षवः

tena rá ° ttena vanakhaṁḍe taṁ ° kûle padmávati° B °dṛishṭvá kṛi° M °shṇám áji ° nivastra utta° B °nivasta utta° M °çobhaṇena hasta° B °bhanena ca hasta° M °niyá paramáye pushkalavarṇatáye samanvágatáḥ B °pushkarata°. — 3. BM °yatra caṁkra° M °rbhavaṁti ‖ manoramáni su° B °ṇi sahadarçaniyáni dṛi° M °rçanániyáni dṛi°. — 4. B dṛishṭvá ca | pu° M °puna bhi ° sya padmávatiṁ rájakumárim eta° B °tiṁ rájaku°. — 5. M °nyáyá rûpavatiṁ ṛiddhyánu° B °ntaṁ ridhyánubhá° BM °yatra yatra caṁkra° M °rbhavaṁti | ati° B °nti | ativa ca cakshu ° lviyaṁ bhavishyati | devakaṁnyá vá ná ° nnarakaṁnyá vá má° BM °iyaṁ rûpaṁ bha° B °shyati | a° M °amánushá cá.

8. M yaṁ nûnásyáhaṁ°. — 10. M °yena padmávati náma ṛi ° tvá padmávatáṁ ṛi° B °tvá padumávatî ṛi°.

11[1]. M °sya cápi e°. — 11[2]. M °kshavo padmávati ṛi ° má rájá ° tad uváca ‖. — 12. M °ṇḍavyo ṛishisya dhitá mulaphalabhogika°. — 14. M °kshavo rá° B °hmadatta padmávati ṛi°. — 15. M °bhadro bho° B °santiye na yenási° M °nti yena yena si ° rîro kî ° caiva sukumáro varṇa° B °kumárá varṇṇa°.

17. M °rî rájána bra° BM °cat ‖ rájño° M °vattráṇi parámṛiçati B °mṛiçati mû°. — 18. M mula° B °právaráṇáni evaṁ sûkshmáni yá° M °máni na a°. — 19. M °kshavo rájá bra°.

राज्ञो ब्रह्मदत्तस्य एतदभूषि ॥ अविधिज्ञा इयं ऋषिकुमारी राज्ञो राजार्हाणां वा वस्त्राणां नैव ऋषिस्य विशेषं अभिजानाति न राजानस्य नैव अजिनानां विशेषं जानाति नापि राजार्हाणां वस्त्राणां विशेषं जानाति नापि मम तुरंगस्य । एषा च ऋषिकुमारी राजकन्या ममैषा भार्या अनुरूपा भवेया न शक्या मया माण्डव्येन ऋषिणा अनभ्यनुज्ञाता पाणिनापि स्प्रष्टुं कुतो पुनरितो आश्रमातो काम्पिल्लं नगरं नयितुं । माण्डव्यो ऋषि महाभागो शापेन मे सपरिवारं भस्मीकरेय । यं नूनाहं पदुमावतीमृषिकुमारीमुपायेन प्रलोभयेयं ॥ पौराणानां च भिक्षवो राज्ञां मृगव्येन गच्छन्तानां मधुसर्पिसंयुक्तानि सक्तूनि राजार्हाणि च मोदकानि च उक्कारिकानि च यमलकं पूरेत्वा अश्वपृष्ठे पल्लाणस्य पृष्ठतो बध्यन्ति मा राजा अश्वेन एको अद्वितीयो वनेषु हतो समानो बुभुक्षाय मरेय ॥ तेन खलु पुनर्भिक्षवो समयेन राज्ञो ब्रह्मदत्तस्य मधुसर्पिसंयुक्तानि सक्तूनि मोदकानि च उक्कारिकानि च यमलकं पूरेत्वा अश्वपृष्ठे पृष्ठतो पल्लाणवध्रेण बद्धमभूषि ॥ अथ खलु भिक्षवः राजा ब्रह्मदत्तो यमलकातो मोदकं उक्कड्ढेत्वा पदुमावतीये अदासि ॥ हन्त भद्रे इमानि अस्माकं फलानि ॥ सा दानि आह ॥ जाने कतमानि शोभनतराणि फलानि युष्माकं वा अस्माकं वा ॥ सा दानि तं मोदकं परिभुंजित्वा आह ॥ भगवं शोभनानि इमानि युष्माकं फलानि मृष्टानि रसवन्तानि अस्माकं पुनः फलानि कटुकषायाणि ॥ राजा आह ॥ एदृशानि अस्माकं आश्रमे वृक्षेषु फलानि यदीच्छसि [310b] ईदृशानि परिभुंजितुं ततो तं मम आश्रमपदं गच्छाहि ॥ एवमुक्ते भिक्षवः पदुमावती ऋषिकुमारी राजानं ब्रह्मदत्तमेतदु-

1. M °rî râjñâ râjârhâṇâm̃ vastrâ° BM °shisya viçesham̃ nâbhijâ(M °jña)nâti na M °naivam̃ ajinânâm̃ viçesham̃ nâbhijânâni na râjânasya naiva ajinânâm̃ ° turagasya ‖ . — 4. BM eshâm̃ ca ṛishikumâri(M °rim̃) râjakanyâ mamesha bhâ ° veyâ ça° M °kyâ mayâ maṇḍa ° pâninâ° BM °kuto pu ito âçra° M °ram̃ napitum̃ B °yitum̃ ma°.

6. BM maṇḍa° M °ram̃ bhâsmi° BM °reyam̃ | . — 7[1]. M °kumârim̃ upâ° B° kumârim upâ° M °lobheyam̃ | . — 7[2]. BM paurâṇâm̃ ca bhi° M °vyena gacchentânâm̃ madhusarppisam̃yuktânâm̃ madhumarpisam̃yuktânam̃ madhusarpisam̃yuktâni çaktukâni râjârhâ° B °ntânâm̃ madhusarppisam̃yuktânâm̃ madhusarpiyuktâni çaktû ° rhâni ca mo° M °yamaṭakam̃ pû° BM °çvapṛishthapallâ(M °lâ)çasya° M °to bam̃dhyati ‖ mâ râ° B °ndhyati mâ râ°. — 10. B °ktâni çaktû° M °ktâni çaktumo° B °ukvaritâni yamala° M °kkârikâni yamarakam̃ rûpetvâ ° to palâçe baddhena baddha° B °llâçabaddhatena baddha°.

12. M °yamarakâto modako u° BM °kkaṭṭetvâ° B °si ha°. — 14[1]. B °imâṇi a ° lâni sâ°. — 15. BM °dâni tato mo°.

16. B bhagavâm̃ ço° M sarvaço ° punaḥ phalâ° BM °ṭukâshâ°. — 17[2]. M etâdṛiçâni asmâkam̃m âçra° BM °lâni icchasi idṛiçâ° B °tum̃ | tato° M °dam̃ âgacchâhi ‖ . — 19. M °kshavo yaimâm̃vati ° dattam̃ eta°.

वाच ॥ इच्छामि अहं एदृशानि फलानि परिभोक्तुं आगमे मुहूर्तं इदमस्माकं आश्रमं न दूरं यावदिमं उदकं हरामि तातस्य आमन्त्रेमि ततः तव आश्रमं गमिष्यामि ॥ अथ खलु भिक्षवो राजा ब्रह्मदत्तो पदुमावतीये अपराणि मोदकानि अदासि ॥ इमानि पितुरुपनामेहि एवं च वदेहि । यस्य ऋषिस्य आश्रमे एदृशानि फलानि तस्याहं भार्या भविष्यामीति । लघु त्वं च आगच्छेहि एष अहं इह नदीतीरे आसामि ॥

अथ खलु भिक्षवः पदुमावती ऋषिकुमारी येन माण्डव्यस्य आश्रमपदं तेनोपसंक्रमित्वा पानीयभाण्डं निक्षिपित्वा तानि मोदकानि पितुर्माण्डव्यस्य अनुप्रदासि । इमानि तात फलानि खादाहि यस्य ऋषिस्य आश्रमे एदृशानि फलानि तस्याहं भार्या भविष्यामि ॥ अथ खलु भिक्षवो माण्डव्यस्य ऋषिस्य एतदभूषि ॥ नूनं पंचालराजा ब्रह्मदत्तो मृगव्येन अवक्रान्तः इमस्याश्रमस्य समीपं अनुप्राप्तो तेन इमानि मोदकानि दिन्नानि परिभुक्तानि पदुमावतीये राजार्हाणि मोदकानि न एषा शक्यति भूयो इहाश्रमे कटुकषायेहि फलाफलेहि यापयितुं पदुमावती च राजकन्या । यन्नूनाहं अस्य राज्ञो ब्रह्मदत्तस्य भार्या प्रयच्छेयं ॥ अथ खलु भिक्षवो माण्डव्यो ऋषिः पदुमावतीं ऋषिकुमारीमेतदुवाच ॥ न खलु पदुमावति एवंरूपाणि फलानि भवन्ति को ते ज्वलनसमेहि कामेहि प्रलोभेति ॥ अथ खलु भिक्षवो पदुमावतीये एतदभूषि ॥ भवितव्यं कामा नाम ते वृक्षा येषां इमानि एदृशानि फलानि ॥ अथ पदुमावती एवं पितरमेतदवोचत् ॥ यदि तात कामफलानामीदृशो आस्वादो तान्यहं परिभुंजिष्यामि न मे इमानि महत्फलानि रोचन्ति ॥ अथ माण्डव्यो ऋषिः पदुमावतीमेतदुवाच ॥ को ते पदुमावति इमानि फलानि अदासि केवरूपो वा सो ऋषिकुमारो कतरस्मिं वा प्रदेशे तिष्ठति ॥

1. M °aham edṛi° B °hûrtte i° M °kaṁ âçramaṁ nânidûre yâ° B °dûre yâvad emaṁ u° M °râmi tântasya âmaṁtremi tato tavâçra°. — 3. M °tto padmâvati° BM °kâni deti adâ°. — 4[1]. M °evaṁ vademihi B °dehi ya°. — 4[2]. M °syârha bhâ° B °miti la°. — 5. M laghu ca âgacchesi esho haṁ i° B °cchesi e°.

7. M °vaḥ padmâvatî ° yena maṁḍavyasya â ° tur maṇḍa° B °tur maṇḍavyasya apradâsi | . — 9. B imâṇi tato phalâni khâ° M °tâto phalâni khâ ° shisyâçra ° tasyaṁhaṁ°. — 10[1]. BM °vo maṇḍa° M °shisyaita°. — 10[2]. M °vyena açvento imasyâ° B °aṇvataḥ imasyâ° M °prâptaḥ || te ° ktâni padmâvatîye râjâ° B °rhâni mo° M °kâni naishâ ° lâphaleyâhi paribhuṁjayituṁ padmâvatiṁ ca râjakanyâṁ || B °lâphale yâpayi ° vatiṁ ca râjakanyâ ya°.

14[1]. M ye nûnâ°. — 14[2]. M °vo maṁḍavyo ṛishi pamâvatî ṛishiku°. — 15. M °padumâvàtî evaṁrûpâni phalâni bhavaṁti ko te jvaranasamayehi kâ°.

16. M °padmâva° BM °shi bha°. — 17. M °yeshâṁ imâ°. — 18[1]. M °tî pita°. — 18[2]. B °ço âçvâdo° M °ço âkhyâto tân padvaṁ pari ° rocaṁti || . — 20[1]. M °ṛishi padmâva°. — 20[2]. M °padmâvatî i° B °vatî i° BM °si ko ca rûpo vâ(M °vo) so ṛi(B °ri)shi° M °mârî ka°

एवमुक्ते पदुमावती माण्डव्यं ऋषिमेतदुवाच ॥ सूक्ष्माजिनो तात ऋषिकुमारो दकतीरे स्नाति [311a] मृगमभिरुह्य तेन मे इमानि फलानि दिन्नानि तस्य च तात आश्रमे एदृशानि फलानि ॥ अथ माण्डव्यो ऋषिः पदुमावतीये सार्धं येन राजा ब्रह्मदत्तस्तेनोपसंक्रमित्वा राजानं ब्रह्मदत्तं प्रतिसंमोदेत्वा पदुमावतीं राज्ञो ब्रह्मदत्तस्य उदकेन अदासि ॥ एषा ते महाराज भार्या भवतु महाराजस्य च एषा अनुरूपा मा च परस्य वचनेन अननुयुञ्जित्वा विप्रियं कुर्यासि ॥

अथ राजा ब्रह्मदत्तो पदुमावतीं अश्वपृष्ठमारुहेत्वा माण्डव्यस्य ऋषिस्याभिवादनं कृत्वा तत्रैव अश्वपृष्ठे अभिरुहित्वा येन कंपिल्लं नगरं तेन प्रक्रमे ॥ अद्राक्षी-द्राज्ञो ब्रह्मदत्तस्य बलाग्रं दूरत एवागच्छन्तं दृष्ट्वा च पुनर्येन राजा ब्रह्मदत्तो तेनोपसंक्रमे ॥ अथ राजा ब्रह्मदत्तो ततो अश्वपृष्ठतो ओतरित्वा पदुमावतीये ऋषिकुमारीये सार्धं हस्तिपृष्ठमभिरुहित्वा येन कंपिल्ले नगरे स्वकमुद्यानं तेन प्रयासि ॥ अश्रोषीत्पद्मावती कंपिल्ले नगरे महतो जनकायस्य निर्घोषं नगरं च कंपिल्लमद्राक्षीत् उद्विद्धमाकारं अट्टालगोष्ठकतोरणं रमणीयं च ॥ दृष्ट्वा च पुनः राजानं ब्रह्मदत्तमामन्त्रयसि । कस्य एतं वत वनविवरे निर्घोषो श्रुयति ऋषिणां एतं वनमृगाणां च उटजानि एतानि उद्विद्धानि दृश्यन्तीति ॥ अथ राजा ब्रह्मदत्तो पद्मावतीमेतदुवाच ॥ एतमृषिणां वनमृगाणां च निर्घोषो एतानि चास्माकं उटजानि उद्विद्धानि दृश्यन्तीति ॥ अथ राजा ब्रह्मदत्तो येन स्वकमुद्यानं तेनोपसंक्रमित्वा हस्तिपृष्ठातो प्रत्योरुहित्वा पदुमावतीये उद्यानं प्रवेशे ॥ अथ खलु राजा ब्रह्मदत्तो अमात्यपारिषद्यानामन्त्रयसि ॥ हो भणे ग्रामणिका क्षिप्रं पुरोहित-

1[1]. M °padmâvati mâṁḍavyaṁ°. — 1[2]. M sukshmo jino tâtaḥ ṛi° B sukshmâ° M °mârî uda°. — 3. M °shiḥ padmâvati ° detvâ padmâvatîṁ°. — 5. B eshân te mahârâja bhâ° M °tu mahârâjasya naishâ anurûpâ mâ re parasya vanena ananuyu°.

7. M °padmâvatîṁ ° shṭham âruhetvâ maṁḍavya° B °shṭham ârûyetvâ maṇḍa° BM °sya rishi° B °pṛishṭe abhi°. — 8. BM °d râjâ bra° M °durato evâ ° punaḥ ye ° dattas teno°. — 10. M atha khalu râ ° tto tataḥ açva° B °çvapṛishṭâto o° M °ottaritvâ padmâva° B °stipṛishṭam abhi° BM °yena kaṁpillaṁ nagaraṁ sva°.

12. M °shita padmâva ° kshid udvi° BM °aṭṭalagola(M °gora)kato ° yaṁ ca dṛi°. — 13. M °puna râjâ ° ttam âmaṁtra° B °yasi ka°. — 14. M kasyetaṁ° BM °bhavanaṁ vanavi° B °shiṇâ etaṁ vanamṛi° M °ṇaṁ evaṁ canamṛi° BM °gânâṁ udayâ(B °pâ)ni etâ°. — 15. M °dmâvatîyam e°.

16. M °m ṛishiṇâṁ° B °kaṁ udapâni udvi° M °kaṁ udayâni udvṛiddhâni dṛiçyaṁtîti |. — 17. B °pṛishṭâto pratyâru° M °pratyâruhitvâ padmâvatî ° prâviçet ‖ B °praviça ‖. — 18. M °shadyânâṁ âmantra°. — 19. M ho maṇe grâmanikâ kshi° B °kshipra puro° M °netha | padmâvatî ° strâni câbharaṇâni ca yâvac ca râjakulaṁ yâvac ca udyâ° B °dyânaṁ na taṁ atrâ° M °raṁ sarva alaṁkâraṁ kâ° B °laṁkârâpetha | vitatavitâ° M °naṁ vicitra ° ocaktapaṭṭa ° paṁ bhûpitadhûpanaṁ osiktasaṁpṛishṭhaṁ mu° B °paṁ

मानेथ पदुमावतीये वस्त्राणि चाभरणानि च याव च राजकुलं याव च उद्यानं तमन्तरान्तरं सर्वं अलंकारापेथ विततवितानं चित्रपुष्पपरिचितं ओसक्तपट्टदामकलापं धूपनधूपितं सिक्तसंमृष्टं मुक्तपुष्पावकीर्णं देशेदेशेहि नटनर्तकऋल्लमल्लकपाणिस्वर्यशोभिकद्विस्त्वलकवेलम्बकनट्टधराणि उपस्थपेथ ॥

मनसा देवानां वचसा पार्थिवानां
नचिरेणाढ्यानां कर्मणा दरिद्राणामिति

वचनमात्रेण राज्ञो अमात्येहि यथा[311b]ज्ञत्तं सर्वं पटिजागृतं ॥ अथ पदुमावती राजानं ब्रह्मदत्तमेतदवोचत् ॥ कहिं ते भगवं शरणं समिधा वा उदकोदकं कमण्डलु वा समयो वा मे अग्निहोत्रं जुहनाय ॥ अथ राजा ब्रह्मदत्तो पदुमावतीमाह ॥ आगमेहि मुहूर्तं सार्धं ते सूक्ष्माणि अजिनानि आनीयन्ति ततः गंगायां स्नात्वा सहिता अग्निं जुहिष्यामः ॥ अथ राज्ञो अमात्यपारिषद्या तत्क्षणं तन्मुहूर्तं अन्तःपुरं तमुद्यानं आनयेन्सुः पदुमावतीये वस्त्राणि चाभरणानि चानयेन्सु ब्राह्मणं च पुरोहितं राजाचार्यं आनयेन्सु श्रेष्ठिप्रमुखो च निगमो पि निर्यासि सार्थवाहप्रमुखो वणिजग्रामो निर्यासि सर्वाणि चाष्टादश श्रेणी निर्यान्सुः ॥

अद्राक्षीद्राज्ञो अमात्या पारिषद्या नैगममहत्तरका च ब्राह्मणा च पुरोहितो च राजाचार्यो ब्रह्मदत्तस्य देवीं पदुमावतीं सर्वालंकारविभूषितां प्रासादिकां दर्शनीयां परमवर्णपुष्कलतया समन्वागतां । राज्ञा ब्रह्मदत्तेन सार्धं अग्निप्रदक्षिणीं करोति । यत्र यत्र च क्रमाणि निक्षिपति तत्र तत्र पद्मानि प्रादुर्भवन्ति प्रासादिकानि दर्शनीयानि । दृष्ट्वा च हृष्टा तुष्टा हर्षसंजाता राजानं ब्रह्मदत्तमामन्त्रयेन्सुः ॥ नास्माभिः महाराज कदाचित्कस्यचिदेदृशी स्त्री दृष्टा वा श्रुता वा

dhâpanam̃dhûpitam̃ osaktasam̃sṛishṭam̃° M °rṇam̃ deçedehi ca° BM °çillamallakṛipâṇisvaryâñço° B °bhirudvi° M °bhitam̃dvṛiddhastvalakakevalam̃banaṭṭadharâṇi upathapetha |.

6. M °rmaṇâm̃ dari° thânantam̃ sa° B °sarva pa° BM °ṭiyâkṛitam̃ ||. — 7². M °padmâvaṭiye râ°. — 8. M karhi te bhavâm̃ ça° B °gavâm̃ ça° BM °unmodakam̃° M °kamam̃ḍalu vâ samaya vâ me° B °samaye vâ me°. — 9. M °padmâva°. — 10. M apâme° rddham̃ te sukshmâni aji° B °kshmâni aji° nîyanti | ta° M °nîyam̃ti tato gam̃° shyâmi ||.

11. M atha râjâ amâtya° B °tyasya pâri° M °hûrtta a° B °nam̃ ânayetsuḥ padu° M °nam̃ ânayetsuḥ | padmâvati° B °ṇâni cânayetsu brâ° M °ṇâni cânayetsuḥ brâhmaṇapurohitam̃ ca râjâcâryam̃ ânayetsuḥ çreshṭhipramukhâ ca nigamehi niryâsi sâ° B °ryam̃ ânayetsu çreshṭipramukho ca nigamo bhiniryâsi sâ° BM °mukhâ vaṇi° B °câshṭhâdaça çreṇi niryâmsuḥ |. — 15. M °rohitâ câ râjâcâryye bra° devi padu° lam̃kârabhûshitam̃ prâjâdi° nîyam̃ paramaçubhavarṇâpushkaratayâ sa° B °nvâgato |.

17. M râjâ bra°. — 18. BM yatra yatra cam̃kra° B °mâni nikshi° M °rbhavam̃ti prâ°. — 19. BM °hṛishṭâ ca tu° M °dattam̃ âmam̃trayetsuḥ B °yetsuḥ nâ°. — 20. M °smâbhir

यथा इमस्या पदुमावतीये देवीये । साधु महाराज पदुमावती देवी पादेहि राजकुलं प्रवेशियतु ततो महाजनकायो देवीये इमां एवरूपां ऋद्धिं दृष्ट्वा प्रीता भवेन्सुः ॥ अथ राजा ब्रह्मदत्तो सान्तःपुरः पदुमावतीये देवीये सार्धं अमात्यपारिषद्यपुरस्कृतो महता जनकायेन सार्धं महता राजऋद्धीये महता राजानुभावेन उद्यानातो राजकुलं प्रवेशि ॥ अद्राक्षीत्सो जनकायो यावच्च उद्यानं यावच्च राजकुलं पदुमावतीये पदवीतिहाराणां उभयतो पदुमानि प्रासादिकानि दर्शनीयानि ॥ दृष्ट्वा पुनः महाजनकायो उदानं उदानेसि ॥ कृतपुण्यो महाराजा ब्रह्मदत्तो यस्य इममेवंरूपं स्त्रीरत्नं प्रादुर्भूतं ॥ अथ राजा पदुमावतीये सार्धं उपरिप्रासादवरगतो पंचहि कामगुणेहि समर्पितो समङ्गीभूतः क्रीडति रमति प्रविचारयति पदुमावतीं च देवीं म[319a]देहि अक्षेहि च गीतवाद्येहि च शेखेति तावदन्या देवीयो न समन्वाहरति पदुमावतीये प्रमत्तो । पदुमावती च राज्ञा ब्रह्मदत्तेन सार्धं संवसन्ती आपन्नसत्वा संजाता ॥

यत्र काले देवीप्रजननवेला ततः राज्ञा ब्रह्मदत्तेन या अन्तःपुरिकायो कुशलायो स्त्रीधर्माणां ता आणत्ता पदुमावतीमुन्नेथ । राजा च हिरण्यसुवर्णं अग्रतो कृत्वा नानाप्रकाराणि च वस्त्राणि निषण्णो ये मे निवेदयिष्यन्ति चेमेषु पदुमावती प्रजाता ति तेषां आच्छादं दास्यामि ॥ तासां पि देवीनामेतदभूषि ॥ यदुपादाय पदुमावती आनीता तदुपादाय अस्माकं राजा न समन्वाहरति । अथ एषा प्रजायमानी अस्माभि अनयव्यसनमापादयितव्या ॥ ता दानि तां पदुमावतीं

mahâ° B °d edṛiçâni riddhi dṛishṭvâ vâ çru° M °ṛiddhiṁ dṛishṭvâ vâ çrutvâ ya° B °imasya pa° M °imasya padmâvatîye devîme B °vîye sâ°.

1. M °hi râjakule praveçatu || tadâ ma° B °mahâṁ janakâ° M ° imâṁm evarupâ tam ṛiddhiṁ° B °pâṁ riddhiṁ dṛi° BM °vetsuḥ ||. — 3. M °ntaḥpuro padu ° shadyâpuraskṛito mahato janakâ ° pradesi ||. — 5. M °yo yâvacca râjakulaṁ yâvacca udyânaṁ padmâvatî ° vîthihârâ° BM °to padumâvatî prâsâdikâṁ darçanîyâṁ dṛi°.

7[1]. M °kâya udânaṁ°. — 7[2]. M °m evarûpaṁ°. — 8. M °jâ padmâvatîye sârddham upari ° guṇe samarpi° B °rpito samaṅgâbhû° M °kriḍito ramati pravi° B °kriḍanti ramanti pravi° BM °yati padmâ(B °dumâ)vatî ca devî ca adehi akshe ° çekhoti(M °çesheti) tâvadedya devî yena samâha° M °ti || padmâva° BM °tto pa°.

11. M padmâvatiṁ ca° B °rddhaṁ saṁvasanti â° M °vasanti â ° jâtâḥ B °jâtâ ya°. — 13. BM yatra kâlaṁ devî prajânavelâ° M °tato râjño bra° B °ttena yo a° M °ṇâṁ nânâgatâ padmâvatîm unnathâ B °tha râ°. — 14. B râjâ va hi ° suvarṇṇa agra° M °sharuṇâye me° BM °yishyati | kshe° M °ṇa padmâvatî projânâni te° B °prajânâti te°.

16[1]. B °bhûshi pu°. — 16[2]. B padupâdâya asmâ° M yad upâya padumâvati â ° râjânaṁ sa°. — 17. M °smâbhir anaya° B °yitavya | C °yitavyâ |. — 18. BM te dâ° M °rikânâṁ padmâvatiṁ pṛicchanti jâ° B °pṛicchati jâ°.

पृच्छन्ति ॥ जानासि कथं स्त्रियो प्रजायन्तीति ॥ सा दानि आह ॥ न जानामीति ॥ ता दानि अन्तःपुरिका आहंसुः ॥ स्त्रीये प्रजायमानीये अक्षीणि पट्टकेन बध्यन्ति ॥ सा दानि आह ॥ मह्यं पि प्रजायमानीये अक्षीणि पट्टकेन बन्धेथ ॥ तस्या दानि यं वेलं प्रजायिष्यतीति ततो अस्या अक्षीणि पट्टकेन बद्धानि ॥ सा दानि द्वौ दारकौ प्रजाता प्रासादिका दर्शनीया ॥ तासां दानि एतदभूषि ॥ अपुत्रा तावियं देवी राज्ञो ब्रह्मदत्तस्य इष्टा च बहुमता च आसि किं पुनः सपुत्रा अपुत्रस्मिं राजकुलस्मिं । इमाये द्वौ दारका जाता ततो अधिमात्रं राज्ञो ब्रह्मदत्तस्य प्रिया भविष्यतीति वयं च न समन्वाहरिष्यति ॥ ताहि दानि अन्तःपुरिकाहि ते दारका तपनस्मिं चैलकं उपस्तरित्वा तत्र प्रक्षिप्ताः ॥ तं तपनं स्वपिहितं सुबद्धं कृत्वा राजकीयेन तापनीयेन तापयित्वा मुद्रयित्वा नदीये गंगाये प्रक्षिप्ता । पदुमावतीये च स्वकेन गर्भमलेन मुखं म्रक्षितं ॥ सा दानि पदुमावती अन्तःपुरिकां पृच्छति किं मे जातन्ति ॥ ताहि पि अन्तःपुरिकाहि द्वे उल्लकानि गर्भमलेन प्रम्रक्षयित्वा पदुमावतीये अल्लीपितानि ॥ इमानि प्रजातासि ॥ सा दानि आह ॥ मुह्यथ एतानि किं एतेषां करिष्यामीति ॥ राजा दानि ब्रह्मदत्तो पृच्छति ॥ किं देवी प्रजाता ति ॥ ता आहंसुः ॥ महाराज द्वे दारका प्रजाता प्रासादिका दर्शनीया ते [312b] च नं जातमात्रा ताये खादिता । कुतो महाराज ब्रह्मचारिस्य ऋषिस्य अपत्यन्ति पिशाची एषा त्वया आनीता त्वं दिष्ट्या जीवन्तो मुक्तो ॥ ताये पिशाचिनीये मूलातो आगच्छ पश्याहि तां यदि अस्माकं न श्रद्दधासि ॥ सो दानि तां देवीं पश्यनाय प्रविष्टो पश्यति च पदुमावती

1[1]. B °si | ka° M °tham̃ striyo prajânam̃ti ‖ . — 2[1]. B te dâ° M °antâḥpurikâ âhansuh stri°. — 2[2]. M °kshiṇi pa° dhyati. — 3[2]. M °akshiṇi pa° B °kena bam̃dhetha | . — 4. B tasya dâni iyam̃ ve° M tasya dâni yam̃° B °titi | tato asya akshiṇi pa° M tato 'sya akshiṇi pa°. — 5[1]. M °jâtâḥ prâ° BM °nîyâ tâ°. — 5[2]. B tâsâm̃ dârikâni e° shi a°.

6. M aputro tâva yam̃° sya dṛishṭâ° BM °bahûmatâ° saputro apatresmim̃ râja° BM °kulesmim̃ i°. — 7. B °dârikâ jâtâ | tato adhimâ° M °dârakau jâtâs tano adhimâ° priyo bha° B °titi | va°. — 8. B °dârakâ tapaneshu cai° M °dâraka tapeshu cailakam̃m upatvaritâ te dârakâ tatra° B °upatvaritvâ te dârakâ tatra°. — 9. M °kyena tâpasiyena dâpayitvâ mu° B °dipe gam̃° M °kshiptâḥ tam̃°.

11[1]. M padmâva° rbhamale mu° BM °kham̃ prakshitam̃ | . — 11[2]. M °padmâva° jânam̃ ti | . — 12. M °kâhi iva uddhânakâ ga° B °uddhârinakâ ga° M °lena praçrakshapitvâ padmâva° B °allipitâni | . — 14[1]. BM muhyatha° M °ni kim ete° B °ete ka°. — 14[2]. B °echati kim̃°. — 15[1]. M devi° B °jâtâni ‖ . — 15[2]. M °âhansuḥ | . — 15[3]. M °jave dâ° prajâtâḥ prâ° BM °yâ tena tam̃ jâta° B °mâtroye khâdito ku° M °mâtram̃ ye khâ°.

17. M °apatyam̃ ti pi° esho tva° B °shâ | tva° M °nîtâḥ tâm̃ dṛishṭvâsi° B °nîtâ tâ dṛishṭvâsi° BM °kto tâ°. — 18. B °çâcini° hi tam̃ ya° M °hi ‖ tam̃ ya°. — 19. M °vâm̃ praçya° vati en° B °dhirapraksshi°.

रुधिरम्रक्षितेन यादृशी राक्षसी ॥ सो दानि तान्दृष्ट्वा भीतो संजातो ॥ अमात्यानामाह ॥ गच्छथ तां घातापेथ मानुषिका ति कृत्वा एषा मयानीता यदि एषा पिशाचिनी वा राक्षसी वा न मे ताये कार्यं ॥ सा दानि ततो राजकुलातो निष्कासिता ॥

सा दानि तेषाममात्यानां पृच्छति ॥ कहिं मे नयिष्यथ ॥ ते आहन्सुः ॥ राज्ञासि ब्रह्मदत्तेन वध्या ओसृष्टा ॥ सा दानि तेषां अमात्यानां पृच्छति ॥ किं मये राज्ञो ब्रह्मदत्तस्य अपराद्धं येनाहं वध्या ओसृष्टा ॥ ते अमात्या आहन्सुः ॥ त्वया दुवे दारका जनित्वा खादिता ततो राज्ञा पिशाचिनीति कृत्वा वध्या ओसृष्टा ॥ सा आह ॥ न मे दारका जाता पृच्छामि अन्तःपुरिकां ता आहन्सुः दुवे ते उल्वका जाता ते पि तत्रैव मेल्लिता नैव दारकानि पश्यामि नैव खादामि ॥ ते दानि अमात्याः पण्डिता स्त्रीमायानां शाठ्यानां चाभिज्ञाः ॥ तेषामेतदभूषि ॥ इयं पदुमावती राज्ञो ब्रह्मदत्तस्य इष्टा च बहुमता च स्थानं विद्यति यं एताहि अन्तःपुरिकाहि एषा पदुमावती अजानमानी खलीकृता भवेय विप्रलब्धा वा ॥ ते दानि अमात्या तां पदुमावतीं पृच्छन्ति ॥ कथं सि प्रजाता ति ॥ सा दानि तेषां अमात्यानां तां प्रकृतिं विस्तरेण आचिक्षति ॥ ताहि मे अन्तःपुरिकाहि प्रजायमानीये अक्षीणि पट्टकेन बद्धानि नैव दारकान्पश्यामि नैव खादामि । यं कालं च प्रजाता ततो पृच्छामि तानि अन्तःपुरिकानि किं मे जातं ति ताहि दानि मम दुवे उल्वका अल्लीपिता ते जाता ति ॥ तेषां दानि अमात्यानामेतदभूषि ॥ इयं देवी अन्तःपुरिकाहि ईर्ष्याप्रकृतेन विप्रलब्धा इयं च देवी ब्रह्मदत्तस्य इष्टा च बहुमता च मा पश्चाद्राजा ब्रह्मदत्तो

1[1]. M °ni tām̃ dṛishṭvā°. — 1[2]. B amātyenā° M °tyā āha ‖. — 2. B gacchatha tam̃ ghātāyetha mā° M gacchatha tam̃ ghāṭāyetha mā° BM °nushikāni kṛi° M °tvā ekā mayā nītā | yadi yeshā pi ° me tāya kāryyam̃ ‖. — 3. M °shkāsinā ‖ B °shkāçitā sā°. — 5[1]. M °teshām̃ amā° B °shām asmākam̃ amā° BM °ti ka°. — 5[2]. M °him̃ te me na°. — 5[3]. M °āham̃suḥ ‖.

6[1]. BM °na vadhvā o° M °sṛishṭāḥ |. — 6[2]. B °amātyaamātyā ° ti kim̃°. — 7[1]. B °aparaddham̃ | ye° M °aparādham̃ ye° BM °vadhvā o°. — 8. M tvayā ive dā°. — 9[1]. B °ha na°. — 9[2]. M °cchāmi ‖ am̃taḥpurikā te ā° B °kām̃ | te ā° M °nsuḥ ‖ dave te uddharikā jā° B °dudve te udvanikā jā° BM °mellitvā naiva dā° M °naivam̃ khā° B °khādāmi te°.

11. M °amātyā pam̃ḍitā stri ° çākyānām̃ cā° B °çāthyānām̃ cā° M °jñās teshā°. — 12[1] B °shi iyam̃°. — 12[2]. B °sthāna vidya° M °dyati ‖ yam etāni antaḥ° B °etāni antaḥ°. — 14. M °tyā nām̃ padmāva° BM °cchati ka°. — 15[2]. BM °nām̃ tān prakṛi°.

16. M °akshiṇi pa ° naivam̃ dārakām̃ paçyāmi naiva ravādāmi | B °dārikān pa°. — 17. M °mi tāni am̃taḥpu ° ve uddhānakā ullayitā te jānāti te° B °ve udvānakā ullapitā | te jānāti te°. — 19[2]. B °hi irshyā° M °sya dṛishṭā° BM °çokena ca glaināyam̃°.

देवीये पद्मावतीये अत्ययेन विप्रतिसारी भवेय शोकेन च वैमनस्यं पतेय ॥ तेहि [313a] दानि अमात्येहि सा देवी पदुमावती स्वके गृहे गोपिता राज्ञो ब्रह्मदत्तस्य निवेदितं घातिता देवीति ॥ ता दानि देवीयो घातिता पदुमावतीति श्रुत्वा तस्य राज्ञो ब्रह्मदत्तस्य चटुल्लायन्ति घृतं च परिक्षिपन्ति सर्षपाणि च अग्नौ प्रक्षिपन्ति चतुर्दिशं च बलिं निष्कासयन्ति शान्तिं च करोन्ति दिष्ट्यासि महाराज जीवन्तो मुक्तो राक्षसीहस्तातो ॥ तं मुहूर्तं राजा स्नातो विलिप्तो निष्पुरुषेण नाटकेन प्रक्रीडितो । तावदन्तःपुरिकायो काचिद्वीणां प्रवादिता काचित्सुघोषकं काचिन्मृदंगं काचिद्वेणुं काचित्प्रनृत्यन्ति काचिद्गायन्ति ॥

अथ खलु भिक्षवो अन्यतरा देवता माण्डव्यस्य ऋषिस्य अभिप्रसन्ना वैहायसमन्तरीक्षे स्थिहित्वा राजानं ब्रह्मदत्तमेतदुवाच ॥ दुःश्रुतन्ते महाराज अपरिज्ञातं ते महाराज अविज्ञातन्ते महाराज यो त्वमननुयुंजित्वा अपर्यवगाहित्वा अनपराधीं पदुमावतीं वध्यामवसिरसि तादृशस्य महाभागस्य ऋषिस्य वचनं न समनुस्मरसि ॥ अथ राज्ञो ब्रह्मदत्तस्यान्तःपुरिका देवताये अन्तरीक्षगताये तं घोषं श्रुत्वा सुष्ठुतरं गायन्ति वादेन्ति च यथा राजा ब्रह्मदत्तो एताये देवताये जल्पन्तीये न शृणेयाति ॥ अथ राजा ब्रह्मदत्तो अन्तःपुरिकां निष्कासेपेति आगमेथ तावद्यावज्जानाम किमेषा देवता अन्तरीक्षगता जल्पतीति ॥ ता दानि अन्तःपुरिका राज्ञो वचनेन तूष्णीभूता संजाता देवता राज्ञो ब्रह्मदत्तस्याह ॥ दुःश्रुतन्ते महाराज यो त्वमननुयुंजित्वा अपर्यवगाहित्वा अनपराधीं पदुमावतीं देवीं वध्यां ओसिरेसि तादृशस्य महाभागस्य ऋषिस्य संदेशं न समनुस्मरसि ॥ राजा दानि

1. B °taṁ yohitā deviti | M °taṁ yohitām̐ deviti | . — 3. M °ghātitā padmāva° sya catilāpeti ghṛi° B °sya catillāpeti ghṛi° M °parikshipaṁ sarshapāni ca agnau prakshipeṁti catu° shkāsayaṁti ‖ dṛishṭvāsi mahā° B °çānti ca karoti dṛishṭvāsi mahā° BM °kshasito ha° B °stāto taṁ°.

6. M muhūrta rā° B °vilupto° BM °niḥpurusheṇa° dito tā°. — 7. B °kaṁ | kācit mṛi° M °gaṁ kāci durdaraṁ kācid ve° B °ṇuṁ kācin pra° kācit gāyanti ‖ M °tyaṁti kācit gāyanti ‖ . — 9. BM °tā maṇḍa° M °sthitvā rā°. — 10. B duçruta° M duçrutaṁ me mahārāja aparijñātan te mahārāja avijñātaṁ te mahārāja yo tvaṁ ananu° B °taṁ te mahārāja abhijñātan te mahārāja yo tvaṁm ananu° BM °hetvā anaparādhiṁ padumā(M °dmā)vatiṁ vadhyā° B °smarati | .

13. M °ttasyāṁtaḥpurikāye de° B °purikā de° M °rikshe ga° B °sushṭutaraṁ° M °gāyaṁti vādyenti ca yathā° tto ye tāye de°. — 15. M °purikā nistha° kim eshya de° B °kshagato ja° M °lpantiti ‖ .

16. B °nena tushṇi° M °jātāḥ de° syāhuḥ ‖ . — 17. B duçruta° M duçrutaṁ te mahā° yo svaṁ amanu° B °yo tvaṁ amanu° M °hitvā anaparādhiṁ padmāvatiṁ deviṁ vadhyā josiresi ‖ tā°. — 19. M °kāye pṛi°.

ब्रह्मदत्तो ताये देवताये श्रुत्वा अन्तःपुरिकायो पृच्छति ॥ सत्यं जल्पथ किन्ते दानि दारका ये पद्मावतीये जाताः ॥ ता दानि अन्तःपुरिकायो राज्ञा ब्रह्मदत्तेन पृच्छियमानीयो वा पश्यन्ति ॥ पद्मावती राजाणत्तीये घातिता प्रभवति राजा अस्माकं पि परित्यजितुं आचिचाम नं सत्यं यथाभूतं ति ॥ ता दानि अन्तःपुरिका आहन्सुः ॥ महाराज पद्[3, 3b]मावतीये दुवे दारका जाता ते चास्माभिः तपनाये प्रक्षिपित्वा राजक्याये मुद्राये मुद्रेत्वा सतपना नदीये गंगाये प्रवाहिता नापि तयापि दृष्टा नापि खायिता पि ॥ तस्य दानि राज्ञो ब्रह्मदत्तस्य दौर्मनस्यं उत्पन्नं ॥ अनपराधी तादृशी स्त्रीरत्नं मया घातापितं तादृशस्य च महाभागस्य ऋषिस्य मया संदेशं न कृतं पुत्रा लभ्यन्ता च परिभ्रष्टा ति ॥

सापि दानि मंजूषा नदीये गंगाये वुह्यन्ती कैवर्तकेहि मत्स्यान्बन्धन्तेहि उत्क्षिप्ता ॥ ते दानि केवट्टा तां मंजूषां पश्यन्ति राजक्याये मुद्राये मुद्रितां ॥ तेषां केवट्टानामेतदभूषि ॥ मा हैव चोरेहि राजकुले अपराद्धं ततो इमा मंजूषा प्रष्टा भविष्यति सर्वेष गुह्यं प्रकाशीभवति गच्छाम इमां मंजूषां राज्ञो ब्रह्मदत्तस्य उपनामेम मा वयं चौरा ति कृत्वा ज्येष्ठेन दण्डेन शासीयेम ॥ ते दानि तां मंजूषामादाय राज्ञो ब्रह्मदत्तस्य उपसंक्रान्ता महाराज अस्माभिर्नद्यां गंगायां मत्स्यान्बन्धन्तेहि इयं मंजूषा उदकेन वुह्यन्ती उत्क्षिप्ता राजमुद्राये मुद्रिता तां देवो प्रत्यवेक्षतु ॥ अथ खलु भिक्षवो राजा ब्रह्मदत्तो अमात्यपारिषद्यानामन्त्रयति ॥ हो भणे

1. M °tha kiṁ te dārakā ye padmāva° BM °jātāḥ tā°. — 2. M °kāyo rājā bra° BM °ttena pṛicchati pṛicchi ° nīyo vo paçyaṁti B °nīyo vo paçyanti | . — 3. M paranāvatī rājā āṇantīye ghātitā pra° B °jāṇantīye ghā° BM °vati | rājā a° M °kshāma taṁ na sa ° bhūtan ti ‖ B °taṁ ti tā°. — 5. M °jātāḥ te smābhi tapanāye pra° BM °kyā(B °kye)ye mudrā(B °dre)ye mudre(M °dri)tvā sā tapanā nadī ° hitā nāpi tenāpi dṛishṭvā nāpi khā°.

7. M tasyā dā ° daumanasyam utpa°. — 8. M °ghāṭāyitaṁ ‖ tādṛi° BM °deçaṁ kṛitaṁ | putra labhyanto ca paribhrashṭo ti | . — 10. M °maṁjushā ° hyanti ‖ kaivartte dvimatsyā° BM °matsyā bandhanehi nadīye gaṁgāye vuhyantī prakshipto | .

11[1]. M °ni kaivartakā taṁ maṁjushaṁ paçyaṁti rā° B °kevaṭṭa taṁ maṁjūshaṁ pa° M °drāca mudritaṁ | B °dritaṁ | . — 11[2]. M °shāṁ kaivarttānāṁ e° B °kevaṭṭānāṁ ° shi mā°. — 12. M mā haivaṁ co° B °haiva cāre ° le aparārddhaṁ ta° M °le aparaddhaṁ ‖ ta° BM °to imaṁ maṁjushā(B °sho) prashṭā(M °shṭhā) bhavi° M °shyati ‖ sarve ca gu ° cchāma ‖ imaṁ maṁjushaṁ rājño° B °cchāma imaṁ maṁjūshaṁ rājño° M °mema ‖ sā vayaṁ caure ti kṛi° B °jyeshṭena da° M °shṭhena daṁḍena çā°. — 14. BM °ni taṁ maṁjū(M °ju)sham ā° B °saṁkrāmantā° M °saṁkrāṁtā mahā ° yāṁ matsyabandha° B °yāṁ matsyā bandhantehi | i° M °yaṁ maṁjushā° B °kena muhya° M °vuhyaṁtī utkshi° BM °drāyāṁ mudritā taṁ de° B °vekshitu ‖ .

17[1]. M °dartto amātyā pārshadyā ° yasi ‖ . — 17[2]. BM °tha | ki° M °maṁjushāyan ti ‖ B °yaṁ ti sā°.

जानथ किमत्र मंजूषायं ति ॥ सा दानि मंजूषा अमात्येहि मुक्ता पश्यन्ति च तानि पदुमावतीये दुवे दारका प्रासादिका दर्शनीया ॥ ते आहंसु: ॥ महाराज इमहिं मंजूषायां दुवे दारका प्रासादिका दर्शनीया पदुमावतीये पुत्राणि महाराजस्य सदृशानि । अनपराधी महाराज पदुमावती देवी देवेन अननुयुंजित्वा अपर्यवगाहित्वा वध्या ओसृष्टा ॥ अथ राजा ब्रह्मदत्तो तानि दारकानि दृष्ट्वा पदुमावतीये च बहूनि गुणगणानि समनुस्मरन्तो मूर्छित्वा भूम्यां पतितो हं स्त्रीरत्नातो भ्रष्टो ॥ अथ तेषाममात्यानामेतदभूषि ॥ मा हैव राज्ञो देवीये उत्कण्ठन्तस्य किंचिदेव शरीरस्याबाधं भवेय ॥ ते दानि आहन्सु: ॥ महाराज मा पदुमावतीये कारणेन उत्कण्ठेहि अस्माभिरेवं देवार्थं उपलभित्वा साहसं न कृतं देवी स्थापिता न घातिता अनागतं अर्थपदं ज्ञात्वा ॥ सो दानि राजा ब्रह्मदत्तो एतम[314a]मात्यानां वचनं श्रुत्वा प्रह्लादितो संजात: ॥ अमात्यानाह ॥ कहिं पदुमावतीति ॥ अमात्या आहंसु: ॥ अमुत्र गेहे ति ॥ राजा दानि तत्र देवीये पदुमावतीये सकाशं गतो ॥ गत्वा राजा पदुमावतीं देवीं बहुप्रकारं संज्ञापेति दिष्ट्यासि देवि तादृशातो व्यसनातो च मुक्ता दिष्ट्यासि मया च पुत्रेहि च समंगीभूता । सपत्नीहि सि च नं घातापिता किन्ति अभिप्रायं किन्तेषां तव अभिप्रायां दापयामि कीदृशं वा व्यसनं निगच्छन्तु श्रेयं भवे यदि राजाणत्या सर्वावन्ता निगडबद्धा शाणशाटकनिवस्ता चटनं परिचरन्तु ॥ अथ खलु भिक्षवो पदुमावती देवी रुदमाना राजानं ब्रह्मदत्तमेतदुवाच ॥ मा महाराज तासां देवीनां किंचिद्विप्रियं करोहि ॥ एता ज्येष्ठायो अहं कनीयसा या च एतेयां

1. M °mañjushá a° B °júsho a° M °mukto paçyam̃ti ca° B °nti | ca° M °ni padmávatîye ive° B °rçaná te°. — 2[3]. BM °imam̃hi mañjú(M °ju)sháyám̃(M °yam̃) du° M °yá padmáva ° sya edṛi°. — 4. B anuparádhím̃ ma° M °ja padmáva ° nurujyitvá aparyye° B °vaddhyá o°. — 5. M °shṭvá padmáva° BM °gaṇáni ca sa° B °nto | mú ° bhrashṭá ‖.

7[1]. M °tesháṁ amá° B °teshám̃m amá°. — 7[2]. M °utkam̃ṭhasya kim̃° BM °cid devasya çari° M °bádhaṁ bha° BM °veyam̃ ‖. — 8[1]. B tá dá°. — 8[2]. M °ja padmáva° B °ja mo padu° M °labhisvá sá° B °pitá na dyátitá aná° M °ghátitá ‖ aná°. — 10. B sá dá° ditá sam̃° M °játo ‖.

11. M °tyánám á° B °tyá áha ‖. — 12[1]. M °padmáva°. — 12[2]. M °áhansuḥ ‖. — 12[3]. BM °he ti rá°. — 12[4]. BM rájá(B °jáḥ) dáni(M °ni) ta° M °padmáva° B °to ga°. — 13. M °padmáva° B °jñáyeti dṛishṭyá° M °peti dṛishṭvási ‖ devi ° ktá dṛishṭvá ca mayá° B °ktá dṛishṭyá° M °samanvagibhútáḥ sa° B °bhútá sa°. — 15. BM °tnihi seca(B °va)-nam̃° B °ghátáyitá kin te abhi° M °miyáṇám̃° B °nam̃ nirgacchatu çre° M °cchatu çreyam̃° BM °bhave(B °va) yáda rajánam̃ tá sarvá vo kim̃ nigaḍabaddhásana(M °saṇe) çáṭakanivastrátana paricarantaḥ(M °nto) ‖.

17. M °kshavaḥ padmáva ° damánî tá kim̃ te rájá°. — 19. BM etám̃ jyeshṭá(M °shṭho)-

कल्पिता वृत्ती तां मानं अभिवर्धेहि मा परिहापेहि सर्वाणि च अनुवर्ताहि ॥ यथाकृतानां कर्मणां सत्वा विपाकमनुभवन्ति काले कालमासाद्य यथा द्रुमाणां पुष्पफला ॥ मया एवं महाराज तानि कर्माणि कृतानि यदहं त्वया सत्कृता च मानिता च मया एवन्तानि कर्माणि कृतानि यदहं त्वया वध्या ओसृष्टा ॥ अथ राजा ब्रह्मदत्तो पदुमावतीं देवीमेतदुवाच ॥ मा देवि अश्रूणि प्रपातेहि सर्वन्ते राष्ट्रं निःसृजामि पुत्रेहि समंगीभूता अभिरमाहि क्षमाहि च मे एतं अपराधं ॥ अथ पद्मावती देवी राजानं ब्रह्मदत्तमेतदुवाच ॥ किं मे महाराज विजानन्तीये राज्येन पुत्रेण वा धनेन वा गंसामि अहं प्रव्रजित्वा पुनः तातस्य सकाशं ॥ उक्ताहं तातेन को ते पदुमावति ज्वलनसमेहि कामेहि प्रलोभेति ते मे तातस्य वचना इदानीं परिदहन्ति यथाहं तातेन आश्रमपदे उक्ता यं तव महाराज मृगीव आश्रमातो पितुः सकाशातो अनपराधी वध्या ॥

अथ पदुमावती देवी पुनस्तापसी प्रव्रजित्वा धातुरक्तानि वस्त्राणि प्रावरित्वा माण्डव्यस्य ऋषिस्य आश्रमं आगमे ॥ माण्डव्यो च ऋषी कालगतो अभूषि । तृणकुटीपर्णकुटीनि विशीर्णानि अभूंसुः ॥ अथ पदुमावतीये देवीये एतदभूषि ॥ तादृशेन मे निर्बन्धेन विनाशवितो राजा ब्रह्मदत्तो प्रत्याख्यातः पितातो मे [3 a 4b] कालगतातो अयं परिभ्रष्टा ॥ यं नूनाहं भिक्षाचारं चरामि जनपदानि च राजधानीयो च अन्वन्ती ॥ अथ पदुमावती देवी ग्रामनिगमराजधानीषु अन्वन्ती वाराणसीं राज्ञो कृकिस्य नगरं गता ॥ अद्राक्षीद्वाराणसीयको काशिराजा

yo ahaṁ° M °karaṇiya° BM °sâ yaṁ ca ete° M °vṛitti taṁ mânaṁ° B °tti taṁ mânaṁ° BM °hâyehi sa° °rtâhi ya°.

2. M °bhavaṁti ‖ kâlaṁ kâ°. — 3. M °mânitâni ca ‖ mayâ evaṁ tâni ka°. — 4. M °padmâva°. — 5. M °devi açruṇi° B °açruṇi° M °râjyaṁ niḥ° BM °mâhi na me ekaṁ apa°.

7². BM °vijânitâye râ° M °ṇa bâṁdhavena mârgaṁsâ° punas tâtasya sakâçam uktâ° B °naḥ tâstasya sakâçaṁ u°. — 8. BM °ko tena padumâti(M °mâvati) jva° M °samayehi kâ° BM °bheti | te° B °me tâṁtasya° BM °hanti ‖ yathâ ceyaṁ yathâhaṁ° B °ktâ yaṁ me mahâ° M °ktâ yan tena mahâ° parâdhiṁ vadhyâ ‖ B °parâdhiṁ vadhyâṁ ‖.

12. M atha padmâvatiṁ deviṁ pu° B °vatiṁ devi° s tâpasiṁ pra° M °s tâpasiṁ pra° BM °ritvâ maṇḍa° M °shisyâçra° B °âgamaṁ |. — 13. BM maṇḍa° M °ṛishi kâ°. — 14¹. M triṇakuṭṭiparṇakuṭṭinî vi° B °ṇṇakuṭi vi° M °abhûnsuḥ ‖. — 14². M °padmâvatî deviṁ eta° B °shi tâ°. — 15. M °me nibândhana nivasâvetau° B °ndhena nivasâvetau° M °khyâto pi° BM °lagato vayaṁ°.

16. BM °raṁ caranti ja° râshṭradhânishu ca aṇvayanti(M °yati) ‖. — 17. M °padmâva° B °marâshṭradhâ° M °marâshṭrarâjadhâ° kṛitisya°. — 18. M °sîko kâçirâjâ padmâvatiṁ deviṁ purâdanta° B °purâdanta° M °padmâva° BM °yaṁ taruṇyâye jâtirû° M °pushpâni phalâni prâ° B °tâni phalâni prasâdikâni prasâdâni° M °kâni prasâditâni mano° B °ehi anukânantaraṁtare abhi° M °mukânantaraṁ abhi° BM °shyâmi ‖.

पदुमावतीं देवीं पुरान्तरे दृष्टा च पुनः काशिराजा पदुमावतीं देवीं बहुप्रकारं प्रलोभेति किं तव भद्रे प्रव्रज्याये तरुणाये जातरूपाये अभिरूपाये इमानि पादपानि पुष्पितानि फुल्लानि प्रासादिकानि प्रसादनीयानि मनोरमकराणि एहि अमुककाननान्तरे अभिरमिष्याम ॥ एवमुक्ते पदुमावती तापसी काशिराजानमेतदुवाच ॥ अपि महाराज इच्छसि प्रवेष्टुं यं प्रव्रजिताये सार्धं इच्छसि रमितुं धर्मस्थिताय नाहं महाराज कामेषु अर्थिका ति ॥ काशिराजा आह ॥ यदि भद्रे न इच्छसि ततो बलसा ते ग्रहिष्यामि ॥ पदुमावती आह ॥ यदि बलसा मे गृह्णसि ततो ते तपसा अग्नीव शुष्कतृणं दहिष्यामि ॥ सो दानि राजा तं श्रुत्वा भीतो प्रत्यागतो च सा च इह राष्ट्रे यथासुखं यथाफासु ॥ अहं ते निमन्त्रेमि सर्वहितोपस्थानेन ॥

अथ ब्रह्मदत्तो राजा ब्राह्मणवेषेण काशिराज्ञो गृहं प्रविशित्वा अहं पि महाराज अचेहि कुशलो ति । सो पि राज्ञो देवीहि सार्धं क्रीडन्तस्य क्रीडते पदुमावतीं च सम्भाषति । केन क्रोधेन इहागता ॥ पदुमावती आह ॥ तव एव महाराज अपराधेन इहागता ॥ ततो काशिराजा संशयितो राजानं ब्रह्मदत्तं पृच्छति ॥ न मे कदाचिदष्टापदस्य एतादृशी नीति श्रुतपूर्वा कस्त्वं का ते एषा ति ॥ राजा ब्रह्मदत्तो आह ॥ अहं ब्रह्मदत्तो पंचालराजा एषा मे पदुमावती भार्या इहागता ॥ एवमुक्ते काशिराजा ब्रह्मदत्तं राजानमेतदुवाच ॥ स्वागतन्ते महाराज अनुरागतन्ते महाराज नेहि देवीं अहं बलाग्रेण संविभज्य नेमि ॥ अथ राजा ब्रह्मदत्तो पंचालराजा पदुमावतीं देवीं वाराणसीतो चतुरंगेन बलकायेन सार्धं हस्तिपृष्ठे आरूपयित्वा महता राजानुभावेन महता राजऋद्धिये पुनः कंपिल्लं नगरं आनेसि ॥ पदुमावतीये च देवीये राज्ञा ब्रह्मदत्तेन ओमृटवध्याये व

4. M °padmâva°. — 5. B °shṭuṁ | yaṁ° M °sârddham iccha ° sthitâ | ye nâ° BM °rthikâ ni ‖ .

6[2]. M °te grihishyâmi ‖ . — 7[1]. M padmâva° B padumâti°. — 7[2]. BM °grihnasi (M °si ‖ ) tato ° ṇaṁ dehi°. — 8. B °pratyâyagato° BM °phâsu a°. — 9. B °haṁ | te°.

17. B mahâjino ârâḍa° M mahâtino ârâḍa° BM °tryaha kâla° B °âlâḍo kâlâ° BM °mo ka°. — 18. M °punaḥ anye pi ° lparaskajâ° B °maṁ dharma deçi ° ṭhaye yaṁm i ° çramaṇâya ‖ . — 19. B °shi paṁ°. — 20. M °dravargiyâ çu° BM °ddhâ alparajâ alparaska(B °jâ alparajaka)jâti ° halo pratha° B °tuṁ na [f° 366°] na ca ° yetsuḥ yam i° M °yetsuḥ ‖ yem i° B °çramaṇâya ‖ .

मे प्रतिबला प्रथमं धर्मं देशितं आजानितुं [366a] न च मे विहेठयेन्सुः यमिदं धर्मश्रवणाय । पूर्वमेव दुष्करं चरन्तस्य अनुबंधेन्सुः । ते च वाराणस्यां विहरन्ति ऋषिपतने मृगदावे ॥ यं नूनाहं वाराणसीं गत्वा वाराणस्यां ऋषिपतने मृगदावे पंचानां भद्रवर्गीयानां प्रथमं धर्मं देशयेयं ॥

अथ खलु संबहुला महेशाख्या शुद्धावासकायिका देवा येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्ते अस्थान्सुः । एकान्तस्थितास्ते भगवन्तमेतदुवाच ॥ यं भगवतो अन्तेवासिनां अभिज्ञातं परिज्ञातं प्रतिबलाश्च पुनर्वयं भगवतो विविधानि विचित्राणि ऋद्धिप्रातिहार्याणि कर्तुं । येन भगवामार्गेण बोधितो वाराणस्यां गमिष्यति ऋषिपतनं मृगदावं अनुत्तरं धर्मचक्रं प्रवर्तयितुं ततो वयं भगवतो यावच्च बोधि यावच्च वाराणसी मार्गं प्रतिजागरिष्यामः समं असमविषमं पाणितलजातं विततवितानं चित्रदूष्यपरिक्षिप्तं ओसक्तपट्टदामकलापं सिक्तसम्मृष्टं धूपितधूपनं मुक्तपुष्पावकीर्णं सुवर्णवालिकासंस्तृतं दिव्यमुक्ताचूर्णसंस्तृतं दिव्यस्फटिकचूर्णसंस्तृतं दिव्यमुसारगल्वचूर्णसंस्तृतं दिव्यलोहितिकाचूर्णसंस्तृतं । तत्र च वयं भगवं मार्गे यावच्च बोधिर्यावच्च वाराणसी दिव्या तालपंक्तियो अभिनिर्मिनिष्यामः अच्छा समा सैकता सुखोपनीता चित्राणि दर्शनीयानि सप्तानां वर्णानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसारगल्वस्य लोहितिकाया । तत्र च वयं भगवं मार्गे वामदक्षिणतो दिव्यायो नदीयो

1[1]. BM °baṁdhetsuḥ | (M °tsuḥ). — 2[2]. B °nti | ṛi° M °shipattane° BM °ve yaṁ°. — 3. M °shipattate mṛi° B °dharma de°. — 5. M °hulo maheçākhyo çu ° sakāyi devā yena bhagavān teno ° gavato pā ° sthāsuḥ e° B °sthātsuḥ e°.

6. M °sthitā te bha°. — 7. BM yaṁ bhagavatā(M °to)ntevāsino abhijñāta parijñātuṁ pra° B °ṛirddhiprā ° ryāni kartuṁ ye°. — 8. BM °syāṁ(M °siṁ) gamishyati | ṛishipata-(M °tta)naṁ ° tuṁ | tato(M °tataḥ) va° M °vato yāvacca vārāṇasiṁ mārgaṁ ° BM ° maḥ | samaṁ asamaṁ vishamaṁ pāṇitala(M °laṁ)jātaṁ ° tradushya ° osapta(M °oçakta)paṭṭa ° siktasanmṛi(M °saṁsṛi)shṭaṁ dhūpita(B °taṁ)dhū° M °ṇṇavārikāsaṁstṛitaṁ divyamuktāvakirṇṇaṁ saṁstṛitaṁ divyasphaṭikacūrṇṇaṁ saṁstṛitaṁ divyamusāgalva° B °likāsaṁskṛitaṁ divyamuktācūrṇṇaṁsaṁskṛitaṁ °ṭikacūrṇṇasaṁskṛitaṁ °musāracūrṇṇasaṁskṛitaṁ° M °loditikacū° B °hitakacūrṇṇaskṛitaṁ | .

14. M °bodhi yāvacca vārāṇasiyo divyatālapaṁktiyo abhi° B °ṇasi yā divyā ° ktiyā abhinikāsaṁskṛitaṁ divyamuktācūrṇṇaṁ saṁskṛitaṁ divyasphaṭikacūrṇṇasaṁskṛitaṁ divyamusāracūrṇṇasaṁskṛitaṁ divyalohitikacūrṇṇasaṁskṛitaṁ tatra ca vayaṁ bhagavaṁ abhi° M °rmiṇishyāmaḥ ci° B °maḥ ‖ acchā ° vaiduryya° M °tikāyāḥ | .

17. M °yaṁ mārge° B °vaṁ yaṁ mārge° M °kshiṇāto di° B °vyāyā nadī° M °rmiṇishyāmaḥ | acchāṁ samā° B °maḥ | acchā sasā saika sukho° BM °nītā suvarṇṇa(B °rṇṇaṁ) vālu° B °saṁskṛitā° M °tparapadma° BM °kucapata(B °pana)sanālikelapāle(M °pāre)vatakābha° B °vyadātrimavṛi° M °ḍimanṛiddhikāpracchannāḥ.

अभिनिर्मिनिष्यामः अच्छा समा सैकता सुखोपनीता सुवर्णवालुकासंस्तृता उत्पलपद्मकुमुदपुण्डरीकनलिनीसौगन्धिकआम्रजम्बुकलकुचपनसनारिकेलपालेवतकभव्यदाडिमवृक्षिकप्रच्छन्ना । तत्र च वयं भगवन्मार्गे याव च बोधियाव च वाराणसी दिव्यानि छत्राणि अभिनिर्मिनि[366b]त्वा दिव्यानि ध्वजानि अभिनिर्मिनिष्यामः । दिव्यानि कूटागाराणि अभिनिर्मिनिष्यामः चित्राणि दर्शनीयानि सप्तानां रत्नानां सुवर्णस्य रूप्यस्य मुक्ताया वैडूर्यस्य स्फटिकस्य मुसागल्वस्य लोहितिकाया ॥ भगवतो गच्छन्तस्य गमिष्यन्ति तिष्ठन्तस्य तिष्ठन्ति पुरतो च वर्षवलाहका देवपुत्रा दिव्यानि पुष्पाणि प्राकिरिष्यन्ति मन्दं मन्दं च देवा प्रसारयिष्यन्ति ॥

भगवति बोधितो वाराणसीमृषिपतनं मृगदावं प्रस्थिते अनुत्तरं धर्मचक्रं प्रवर्तयितुं शुद्धावासेहि देवेहि मार्गो प्रतिजागृतो । महतीं चतुरंगिनीसेनामभिनिर्मिणित्वा महान्तं हस्तिकायं महान्तमश्वकायं रथकायं पत्तिकायं भगवन्तं वाराणसीं गच्छन्तं पुरस्करेन्सुः ॥ यावत्सुवर्णानामधिपतयो सुवर्णराजानो अण्डजा वा जरायुजा वा औपपादुका वा संस्वेदजा वा ते महान्तं चतुरंगिनीसेनां ऋद्धीये अभिनिर्मिणित्वा भगवन्तं गच्छन्तं पुरस्करेन्सुः । याव नागानां नागाधिपतयो नागराजानो अण्डजा वा जरायुजा वा संस्वेदजा वा औपपादुका वा ते महतीं चतुरंगिनीसेनामृद्धीये अभिनिर्मिणित्वा भगवन्तं वाराणसीं गच्छन्तं पुरस्करेन्सुः । चतुर्महाराजिका देवा त्रयस्त्रिंशा यामातुषिता निर्माणरति परनिर्मितवशवर्ति ब्रह्मकायिका देवा महान्तं चतुरंगिनीसेनामृद्धीये अभिनिर्मिणित्वा भगवन्तं काशिं गच्छन्तं पुरस्करेन्सुः ॥ अथ खलु भगवां महतीये परिषाये अनेकशताये अनेकसहस्राये अनेकशतसहस्राये पुरस्कृतो परिवारितो उरुविल्वातो गयां गच्छति गयातो अपरगयां गच्छति ॥ अपरगयायां सुदर्शनो नाम नागराजा । तेन भगवां

3. M °rge yâvacca bodhi yâvacca vârâṇasiṁ di° B °râṇasiṁ di° M °vyâṇi cchatrâṇi abhinirmiṇitvâ divyâṇi dhva ° rmiṇishyâmaḥ di°. — 5. B °kûtâgâ° M °rmiṇishyâmo ci° B °maḥ | ci° M °tikâyâḥ B °tikâyâ bha°.

7. M °rshavarâha ° kilishyanti ‖ mandaṁ ma° B °sâpayishyanti | . — 9. B bhagavatâṁ bo° M bhagavâṁ bo °ṇasiṁ ṛishipattane mṛi° B °patane mṛi° BM °dâve prasthito anu ° tuṁ | çu° B °mârgo pavijâgato | M °mârge pra°. — 10. B °raṁgini se° M °senâṁ abhi° B °stikâyaṁ mahonta ° ttikâyaṁ ‖ bha° M °retsuḥ | B °retsuḥ yâ°.

12. M °senâm ṛivarṇṇâṁ adhi° B °dukâ vâ te ma° M °mahatiṁ ca ° ddhîye ṛiddhîye a ° vantaṁ kâsiṁ ga° B °skaretsuḥ | . — 14. M *passe les phrases 14 et 17*. B yâ ca nâgânâṁ° B °retsuḥ | .

17. B °hârâjakâ devâ tra ° senâ ṛiddhi ° retsuḥ ‖ . — 19. BM °hatiniye parishâ(M °ripâ)ye anekaçatâ ° skṛito(M °skṛitâye) parivâritâ uruvilvâto gayâṁ gacchanti gayâto a° M °cchanti | B °cchati apa°.

21¹. BM râjâ te°. — 21². B °ntrito ta° M °ntrileto | .

अपरगयायां वासेन भक्तेन च निमन्त्रितो ॥ तहिं भगवां सुदर्शनस्य नागराज्ञो भवने वसित्वा कृताहारो वणालां गच्छति ॥ वणालायां नदी नाम ब्राह्मणः हुहुंकजातिको वुच्चति । सो भगवन्तं गच्छन्तं अपसव्यीकरोति च हुहुंन्ति च करोति ॥ भगवां एतस्मिं वस्तुस्मिं एतस्मिं निदाने एतस्मिं प्रकरणे ताये वेला[367ª]ये इमं उदानमुदानये ॥

यो ब्राह्मणो वाहितपापधर्मो
निहुहुंको निष्कषायो यतात्मा ।
क्षीणास्रवो अन्तिमदेहधारी
धर्मेण सो ब्राह्मणो ब्रह्मवादं वदेय ॥

वणालायामन्यतमो गृहपतिः भगवन्तं वासेन च भक्तेन च निमन्त्रेति । तहिं भगवां वुस्तो कृतभक्तकृत्यो वणालातो चुन्दद्वीलं नाम अधिष्ठानं गच्छति ॥

अद्राक्षीत् उपको आजीवको भगवन्तं दूरतो येवागच्छन्तं दृष्ट्वा च पुनर्येन भगवांस्तेनोपसंक्रमित्वा भगवता सार्धं संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां व्यतिसारयित्वा एकान्ते स्थादेकान्तस्थितः उपको आजीवको भगवन्तमेतदुवाचत् ॥ परिशुद्धो भगवतो गौतमस्य छविवर्णो परिशुद्धो पर्यवदातो विप्रसन्नं च मुखवर्णं । सय्यथापि नाम तालस्य पक्वस्य संप्रति वृन्ताच्युतस्य बन्धनाश्रयो परिशुद्धो भवति पर्यवदातो सपीतनिर्भासो च एवमेव भगवतो गौतमस्य छविवर्णो परिशुद्धो पर्यवदातो विप्रसन्नो च मुखवर्णो अद्य भगवता गौतमेनामृतं

1. M °gavân suda ° ro vaṇâlâm̃° BM °cchati va°. — 2. M vanâlâm̃yâm̃° BM °hmaṇaḥ (M °ṇo) kuhako ti vu°. — 3. B °savyokaroti bahuhunti ca° M °vyîkaroti | bahvanti va karoti | . — 4. M °gavân etasmim̃ vastrasmim̃ etasmin nidâne°.

6. B °bâhitaprâyadharmo nihuhuho nishkâshâyo | yadâtmâ kshî° M °dharmaḥ nihuhuhâ nishkâpâyo | yato âtmâ kshî°. — 8. M °dhâri dha° B °brâhmaṇa bra° M °brahmâvâdam̃°. — 10[1]. M vanâlâ° B °nyate mo gṛi° M °patir bhaga° B °gavanta vâse° M °nimantrito B °nimantrite ta°. — 10[2]. BM °gavâm̃ vu(M °vân vu)stâ kṛitabhakte(M °kto)kṛityo° M °vanâlâto cundavîram̃ nâ° BM °nâmam adhi ° ti a°.

12. M °kshîd upako âjîvako bhagavanta dûrato evâ | gaccha ° r yena bhagavân teno° gavato sârddham̃° B °daniyâm̃ gâthâm̃ sam̃° BM °yitvâ sârâpaniyâm̃ kathâm̃ vya° M °sthito upako jî° B °jîvanto bha° M °m etad avocat | . — 15. M °gauttamasya cchavivarṇṇo parya° B °cchavivarṇṇo°.

16. BM °pratibandhano cyutasya vṛikshâ(M °vṛittâ)çayo° B °ti | parya° BM °evam evam̃ (B evam̃ eva) bhagavato gauta(M °tta)masya cchavivarṇṇo(M °rṇṇom̃) pari° B °prasannâ ca° M °prasam̃no va mu° BM °khavarṇṇâ(M °rṇṇo) ca addhâ bha° M °gauttamenâmitam̃ adhi° BM °gatam̃ amṛitavâdi(B °vâgî) vâ mârgo || .

अधिगतं अमृतगामी च मार्गो ॥ एवमुक्ते भगवानुपकं आजीवकं एतदुवाच ॥ अमृतं मे उपक अधिगतं अमृतगामी च मार्गो ॥ एवमुक्ते उपको भगवन्तमेतदुवाच ॥ कहिं वो भो गौतम ब्रह्मचर्यमुष्यते ॥ एवमुक्ते भगवानुपकं आजीवकं गाथाये अध्यभाषे ॥

सर्वाभिभू सर्वविदो हमस्मि
सर्वेहि धर्मेहि अनोपलिप्तो ।
सर्वज्ञो हं तृष्णाक्षये विमुक्तो
अहं अभिज्ञाय किमुद्दिशेयं ॥

एवमुक्त उपको आजीवको भगवन्तमेतदुवाच ॥ अनाचार्यो भगवां गौतमो प्रजानासि ॥ अथ खलु भगवानुपकं आजीवकं गाथाये अध्यभाषे ॥

न मे आचार्यो अस्ति कश्चित्सदृशो मे न विद्यते ।
एको स्मि लोके संबुद्धो प्राप्तो संबोधिमुत्तमां ॥

एवमुक्ते उपको आजीवको भगवन्तमेतदुवाच ॥ अर्हन्निति भगवां गौतमो प्रजानासि ॥ अथ खलु भगवानुपकं आजीवकं गाथाये अध्यभाषे ॥

अहं हि अरहा लोके अहं लोके अनुत्तरः ।
सदेवकस्मिं लोकस्मिं सदृशो मे न विद्यते ॥

एवमुक्ते उपको आजीवको भगवन्तमेतदुवाच ॥ जिनो ति भगवां गौतमो [367b] प्रजानासि ॥ अथ खलु भगवानुपकं आजीवकं गाथाये ध्यभाषे ॥

जिना हि मादृशा भोन्ति ये प्राप्ता आस्रवक्षयं ।
जिता मे पापका धर्मा तस्मादहं उपक जिनो ॥
पौण्डरीकं यथा वर्षं अनोपे न प्रलिप्यते ।

1. M evaṁm u° B °kaṁ gâ°. — 3[1]. M °gauttamo brahmacaryya ushyate | . — 3[2]. M atha khalu bha°. — 5. M °rvatido° BM °ham asmiṁ sa ° pto sa°.

7. BM °kto haṁ a° B °ddiçyeyya || M °çeya || . — 9[1]. M °upako ji°. — 9[2]. B °cârya bhavâṁ° M °gauttamo°. — 10. M °gavâṁ upa° B °pakaṁ aji°.

11. B na te â° BM °sti manava(M °vi)dyate e°. — 12. B ekosmiṁ eva lo° M ekosmiṁ ekaloka saṁbuddho loke prâptâ sambo° B °ddho lokaprâptâ saṁbodhir uttamâ | M °ttamâ. — 13[2]. M arhan iti bhagavâṅ gauttamo°. — 14. M °thâyo 'dhya°. — 15. B ahaṁ aho loke ahaṁ loke anu° M ahaṁ araho loke arhaṁ loke anuttaro | .

16. M °lokesmiṁ°. — 17[2]. M °gauttamo°. — 18. M °upakam âji ° thâya 'dhya°. — 19. B jino hi tâdṛi° M jino hi sâdṛiçâ bho°. — 20. M °d aham upa° B °ka jine | .

21. M puṇḍa ° aropa parilishyate | B °nopaç ca paripyate | .

एवं लोके न लिप्यामि तस्मादहं उपक जिनः ॥
अभिज्ञेयं अभिज्ञातं सद्भाव्यं च भावयति ।
प्रहातव्यं प्रहीनं मे तस्मादहं उपक जिनो ॥

एवमुक्ते उपको आजीवको भगवन्तमेतदुवाच ॥ कहिं भगवां गौतमो गमिष्यसि ॥ अथ खलु भगवां उपकं आजीवकं गाथाये ध्यभाषये ॥

वाराणसीं गमिष्यामि आहनिष्यं अमृतदुन्दुभिं ।
धर्मचक्रं प्रवर्तयिष्यं लोके अप्रतिवर्तियं ॥
यो मे धर्म अधिगतो विरागोपशमो शिवो ।
तमहं प्रवर्तयिष्यामि हिताय सर्वप्राणिनां ॥
ये चाभ्यतीता संबुद्धा ये च बुद्धा अनागता ।
ये चैतरहिं संबुद्धा बहूनां शोकनाशका ।
धर्मं देशेन्ति सत्वानां बुद्धानां एषा धर्मता ॥

देवता अन्तरीक्षे गाथां भाषन्ति ॥

यो एवरूपं नरदम्यसारथिं
दृष्ट्वा महर्षिं परिवर्जयेय ।
हस्तेहि पादेहि च सो महागिरिं
प्रणामये एष अतीवमात्रं ॥

चुन्दद्वीलायां चुन्दो नाम यक्षो ॥ तेन भगवां स्वके भवने वासेन च भक्तेन च निमन्त्रितो ॥ भगवां चुन्दस्य यक्षस्य भवने एकरात्रोषितो कृतभक्तकृत्यो सारथिपुरे लोहितवस्तुकं गच्छति ॥ लोहितवस्तुके कमण्डलुको नाम नागराजो । तेन

1. BM °lishyâmi° M °jino ‖. — 2. BM abhijñoya abhijñâtaṁ sarve tavyaṁ ca bhâshati ‖. — 4². M °bhagavân gauttamo°. — 5. M °gavân upakam âji ° ye adhya°.
6. M °ndubhiḥ B °ndubhiḥ ‖. — 9. M tad ahaṁ°. — 10. M °gatâḥ ‖.
11. B ye ca tahiṁ ca saṁ° M °caitarhi ca saṁbuddho ba° B °nâyako ‖ M °nâçakaḥ ‖. — 12. BM °deçeti ba° M °ddhânâṁ buddhânâṁ esha dharmadâ ‖ B °nâṁ evam eshaṁ ca dha°. — 13. M °gâthâm adhyabhâshati ‖ B °shanti devatâ ‖. — 14. BM ye evarûpena naradeva(M °radamya)sârathi dṛi ° harshi pari ° yeyaṁ ‖.
16. B hastehi ca pâ° M °dehi ca mahâ° BM °esham ativamâtrâṁ(B °mâtra) ‖. — 18¹. M cûruṇavirdyâṁ vundo° B cunnadvîloyâṁ° BM °kshe te°. — 18². M °gavân svake° BM °ntrito bhaga°. — 19. M °tro toshi° B °tyo çârathipure bhagavâṁ anyatareṇa lo° M °pure bhagavân anyapuro bhagavân anyatareṇa lohitavastrakaṁ gacchati B °gacchanti lo°. — 20¹. M °râjño te° B °jo te°. — 20². M °gavân svake ° B ° sena bhakte°.

भगवां स्वके भवने वासेन च भक्तेन च निमन्त्रितो ॥ तत्रापि भगवां एकरात्रोषितो कृतभक्तकृत्यो लोहितकातो गन्धपुरं गच्छति ॥ गन्धपुरे गन्धो नाम यक्षो प्रतिवसति । तेन भगवां स्वके च भवने वासेन च भक्तेन च निमन्त्रितो ॥ तत्रापि भगवानेकरात्रोषितो कृतभक्तकृत्यो सारथिपुरं गच्छति ॥ सारथिपुरे भगवां अन्यतरेण गृहपतिना वासेन च भक्तेन च निमन्त्रितो ॥ तत्रापि भगवां एकरात्रोषितो कृतभक्तकृत्यो सारथिपुरातो गंगातीरमनुप्राप्तो ॥ नाविको दानि आह ॥ देहि तरपण्यं ॥ भगवानाह ॥ कुतो मम समलेष्टुकांचनस्य अपगतजातरूपरजतस्य तरपण्यं ॥ नाविको आह ॥ यदि [368ᵃ] मे देसि तरपण्यन्तारीहसि अथ न ददासि न तारीहसीति ॥ भगवानाह ॥

यो हंसो नर्मदातीरे नाविकं परिपृच्छति ।
स्वकेन वाजवीर्येण हंसो तरति नर्मदां ॥
इति वदित्वान संबुद्धो हंसराजेव प्रक्रमे ।
गंगाया तीरे अस्थासि ओघतीर्णो महामुनि ॥

भगवा दानि गंगामुत्तीर्णो वाराणसीमनुप्राप्तः । संखमेधीयं अस्थासि भगवां कालं आगमेति वाराणस्यां पिण्डाय चरितुं ।

न हि विकाले विहरन्ति बुद्धा
काले तु पिण्डाय चरन्ति ग्रामे ।
विकालचारीहि वसन्ति संगा
तस्माद्विकाले न चरन्ति बुद्धा ॥

ऋषिपतने पंचका भद्रवर्गीया विहरन्ति आज्ञातकौण्डिन्यो अश्वकी भद्रको

1. M °tro toshito | tatrâpi bhagavâm̃ kṛitabhaktakṛityo rohi ° ndhapûram̃ gacchanti | . — 2. M gandhapûre° B °ti te°. — 3¹. M °gavân svake ° sena va bhakta°. — 3². B °gavân aikarâ° M °ekarâtratoshito kṛitabhaktakṛityo sârathipurâto° (*l.* 6). — 4. B °ktena ca mantrito | . — 5. B °shito kṛitabhakto kṛityo°.

6¹. BM °vikâ dâ°. — 7². M koto mama sadeshṭu° B °shṭukâcanasya vya°. — 8¹. B °vikâ â° M °vika â°. — 8². BM yadi vâ de° B °hasi | athâ na da° M °tha vâ na da°. — 10. M nâham̃°.

11. M °ryena rhaso°. — 12. B °tvâna sa buddho ham̃sam̃râje°. — 13. M °gâye ti° munim̃ || . — 14¹. M °gavân dâni ° tîrṇṇam̃ḥ vâ°. — 14². M çam̃kha ° bhagavân kâlam âgameti || vâ° BM °tum̃ nâ°.

16. BM nâpi vikâlehi viharanti(M °ram̃ti) | buddhâ(B °ddho) kâle pi° B °caranti | grâme vi°. — 18. M °cârehi vasanti sañjñâ tasyâd vikâreṇa ca° B °lena ca cara° M °buddhâḥ | . — 20. M °shipattane° BM °âjâtakauṇḍinyâ a° B °açvaki bha ° mahârâto bhaga°.

वाष्पो महानामो ॥ भगवां वाराणसीतो पिण्डाय चरित्वा कृतभक्तकृत्यो ऋषिपतनं गच्छति ॥ पंचकेहि भद्रवर्गीयेहि भगवान्दृष्टो । दूरतो एवागच्छन्तं दृष्ट्वा भगवन्तं क्रियाकारं करोन्ति ॥ अयं श्रमणो गौतमो आगच्छति शैथिलिको बाहुलिको प्रहाणविक्रान्तो न केनचित्प्रत्युत्थातव्यं ॥ भगवां चागच्छति ते च स्वकेषु स्थानेषु न रमन्ति । सय्यथापि नाम शकुन्ता नीडगता वा वृक्षशाखागता वा हेष्टतो अग्निना संतापियमाना उत्पतेन्सुः एवमेव पंचका भद्रवर्गीया दूरतो एवागच्छन्तस्य स्वकस्वकेष्वासनेषु रतिं अविन्दन्ता भगवन्तं प्रत्युत्थायेन्सुः प्रत्युद्गमेन्सुः । एहि आयुष्मं गौतम स्वागतं आयुष्मतो गौतमस्यानुरागतं आयुष्मतो गौतमस्य ॥ भगवानाह ॥ भष्टा वो भिक्षवः भद्रवर्गीया प्रतिज्ञा मा भिक्षवो भद्रवर्गीया तथागतं आयुष्मंवादेन समाचरथ ॥ तेषां दानि भगवता शिक्षावादेनाभाष्टानां यत्किंचित्तीर्थिकलिंगं तीर्थिकगुप्ति तीर्थिककल्पं सर्वं समन्तरहितं त्रिचीवरा च प्रादुर्भवेन्सुः सुश्वका च पात्रा प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथो च मानं संस्थिहे सय्यथापि नाम वर्षशतोपसम्पन्नानां भिक्षूणां । एष आयुष्मन्तानां पंचानां भद्रवर्गीयानां प्रव्रज्योपसंपदा भिक्षुभावो ॥ ते दानि पश्चाद्भक्तेन भगवन्तं निमन्त्रयेन्सुः ॥

बुद्धविचीर्णा नाम पुष्करिणी तहिं भगवां स्नातो जानन्ता च बुद्धा भगवन्तो ॥ अथ ख[368b]लु भगवतः एतदभूषि ॥ कतमस्मिं पृथिवीप्रदेशे पुरिमकाः सम्यक्संबुद्धा धर्मचक्रं प्रवर्तयेन्सुः ॥ सह चित्तोत्पादेन भगवतो तं पृथिवीप्रदेशं ओन-

1. M °shipattane gacchati | B °ti pam̃°. — 2[1]. M °vân dṛishṭo bhaga° B °shṭo dû°. — 2[2]. M bha° BM °kâlam̃ ka°. — 3. M °çravaṇo gauttamo ° ti ‖ çaithilyiko bâ° B °thilike bâ° BM °krânto(B °ntâ) na kenacin pratyutthâtavyo bha°. — 4. B bhagâm̃ câ° M °svakasthâ° B °ke sthânam̃ punaḥ ramanti sa°. — 5. BM °kunto nî° B °çâkhagatâ vâ he ° gnivâ sam̃ °M °gnivâ santâpi ° tpadyetsuḥ | e° B °tpatetsuḥ | e° M °dravârgiyâ dû° B °sya svakasvakâshvâ° BM °ntam̃ pratyutsthâ(M °tthâ)yetsuḥ pra ° metsuḥ | .

8. BM ehi âyushmâm̃ gauttama(M °ttami) svâgatam̃ âyushmatâ gauttamasyânurâgata (M °taḥ) âyushmato(M °tâ) gauttamasya ‖ . — 9[1]. M °bhikshavo bhadravargiyâ pra ° kshavaḥ bha° B °dravargiyâ° M °thânatam̃°. — 10. M °dena âbhâ° BM °shṭânâm̃ yatki(M °yaki)ñcit tî ° guptim̃ tî° B °rvam̃ samanantarahitam̃ | tricîvare ca prâ° M °trivivare ca prâ° BM °rbhavetsuḥ su° B °mbhakâra prâtrâ° M °trâṇi prakṛitisvabhâvâsam̃sthitâ° BM °çâ iryâ(M °ryyâ)pathâ ca sâ ° sthihe | sayya° M °bhikshuṇâm̃ esha°.

13. B °shmatânâm̃ pam̃° BM °jyopasampadânâm̃ bhikshu(B °kshû)bhâ°. — 14. B °gavanta ni° BM °yetsuḥ bu°.

16. M °vistirṇṇâ ° pushkariṇim̃ tahim̃ bhagavân snâ°. — 17[1]. M °gavân eta°. — 17[2]. M °purimakâ sam̃mya° B °buddho dha° BM °rmacakra pravarttayetsuḥ sa°. — 18. M °ttopâde ° vato ṛishipa° (*p. suiv.*, *l.* 3).

मति च ॥ अथ खलु भगवत एतदभूषि ॥ किं नु खलु पुरिमकाः सम्यक्संबुद्धाः गच्छन्तका धर्मचक्रं प्रवर्तेन्ति तिष्ठन्तो वा निषण्णा वा शयन्तका वा ॥ सह चित्तोत्पादेन भगवतो ऋषिवदने पंच आसना प्रादुर्भूतानि ॥ पंच भद्रवर्गीया भगवन्तं पृच्छन्ति ॥ किस्य इमानि भगवन् आसनानि ॥ . . . . . . . . . . . . . भगवानाह ॥ पुष्पिको नामायं भिक्षवो भद्रकल्पो भद्रकल्पे च बुद्धसहस्रेण उत्पद्यितव्यं ॥ त्रीणि प्रतीतानि अहं चतुर्थो ॥ क्रकुत्सन्दो नवयोजनप्रभो कोनाकमुनिर्द्वियोजनप्रभो काश्यपो चतुर्योजनप्रभो । अहं सर्वसिद्धार्थो व्यामप्रभो अजितो द्वादशयोजनप्रभो सिद्धार्थो विंशयोजनप्रभो मैत्रेयो द्वादशयोजनप्रभो मैत्रीयशो अष्टादशयोजनप्रभो सर्वप्रभो दशयोजनप्रभो पृथिवीपालो द्वादशयोजनप्रभो पृथिवीविजयो चतुर्योजनप्रभो पृथिवीपश्यी त्रियोजनप्रभो जयमित्रो चतुर्योजनप्रभो सुग्रीवो द्वादशयोजनप्रभो सुदर्शनो दशयोजनप्रभो सुपश्यी दशयोजनप्रभो सर्वंजयो अष्टयोजनप्रभो सर्वाभिभू क्रोशयोजनप्रभो सर्वाभिभू अष्टयोजनप्रभो सर्वमित्रो द्वियोजनप्रभो अभिन्नाभो द्वादशयोजनप्रभो अतिसूर्यो चतुर्योजनप्रभो अभिभूयशो योजनप्रभो सुदयो योजनप्रभो सुदर्शनो योजनप्रभो सर्वाभिभूः षष्टियोजनप्रभो वैरोचनो सप्तयोजनप्रभो सर्वपश्यी . . . . . वैरोचनप्रभो नाम दशयोजनप्रभो ॥

एवं मया श्रुतं एकस्मिं समये भगवां वाराणस्यां विहरति ऋषिवदने मृगदावे ।

1[1]. B °shi kiṁ°. — 1[2]. B kiṁ tu kha ° pravarttanti ° shaṇṇáṁ vá ça ° ká vá sa°. — 2. M °shipattane° BM °sana prá°. — 3. M °vargiyá°. — 4. M isya bha° B °gavan ása° BM °náni ‖ ‖ bha°. — 5[1]. BM °vo bhadravargiyá ca bhadrakalpo(M °lpe) bu° BM °ddhasahasahasre° M °utpádita°.

6[2]. M °ndo navayojanaprabhoḥ ko ° muniḥ dviyojanaprabhoḥ ká ° catuḥyojanaprabhoḥ. — 7. BM aham asmiṁ siddhártho vyomaprabho ajito dvádaçayojanaprabho(M °bhoḥ) siddhárthó(B °rthá) viṁçadyo(M °tyo)jananaprabhoḥ(B °bho maitreyo dvádaçayojanaprabho maitreyaço ashṭádaçayojanaprabho | sarvapriyo daçayojanaprabho prithivipálo dvádaçayojanaprabho prithivivijayo caturyojanaprabho prithivipaçyi triyojanaprabho) jayamitro ca(M °traç ca)turyojanaprabho(M °bhoḥ) sugrivo dvádaçayojanaprabho(M °bhoḥ) sudarçano daçayojanaprabho(M °bhoḥ) supaçyi(M °çei) daçayojanaprabho(M °bhoḥ) sarvaṁjayo ashṭayojanaprabho(M °bhoḥ) sarvábhibhú(M °bhúḥ) kroçayojanaprabho | (M °bhoḥ) sa sarvábhibhú no ashṭayojanaprabho | (M °bhoḥ) sarvamitro dviyojanaprabho | (M °bhoḥ) abhinnástu dvá(M °bhinábhan dvá)daçayojanaprabho | (M °bhoḥ) abhisúryo(M °bhibhúyo) caturyojanaprabho | (M °bhoḥ) abhibhúya yaçoyojanaprabhoḥ(B °bho | sudayá yojanaprabho | ) sudarçano(B °ná) yojanaprabho | (M °bhoḥ sudayaḥ yojanaprabhoḥ) sarvábhibhúḥ shashṭhiyojanaprabho | (M °bhoḥ) vairocano(B °na) saptayojanaprabho | (M °bhoḥ janaprabho) sarvapaçyi(M °çei) marocanaprabho náma da(M °maḥ de)çayo° M °bhoḥ ‖ -

17. BM °çrutam eka° M °gaván vàrá° BM °ti ‖ ṛi° M °shipattane° BM °ve ta°.

तत्र भगवां आयुष्मन्तां पंचकां भद्रवर्गीयां आमन्त्रेसि भिक्षव इति भगवन् इति भिक्षू भगवन्तं प्रत्यश्रोषीत् ॥ भगवां सानमेतदुवाच ॥ द्वाविमौ भिक्षवः प्रव्रजितस्य अन्तौ । कतमौ द्वौ । यश्चायं कामेषु कामसुखल्लिकायोगो ग्राम्यो प्राथुज्जनिको नालमार्यो नार्थसंहितो नायत्यां ब्र[369a]ह्मचर्याये न निर्विदाये न विरागाये न निरोधाये न श्रामण्याये न संबोधाये न निर्वाणाये संवर्तति यश्चायं आत्मक्लमथानुयोगो दुःखो अनार्यो अनर्थसंहितो ॥ इमौ भिक्षवः द्वौ प्रव्रजितस्य अन्तौ एते च भिक्षवो उभौ अन्तावनुपगम्य तथागतस्यार्यस्मिं धर्मविनये मध्यमा प्रतिपदा अनुसंबुद्धा चक्षुकरणीया उपसमाये संवर्तनिका निर्विदाये विरागाये निरोधाये श्रामण्याये संबोधाये निर्वाणाये संवर्तति ॥ कतमा सा भिक्षवः तथागतेनार्यस्मिं धर्मविनये मध्यमा प्रतिपदा अभिसंबुद्धा चक्षुकरणीया ज्ञानकरणीया उपसमसंवर्तनिका निर्विदाये विरागाये निरोधाये श्रामण्याये संबोधाये निर्वाणाये संवर्तति ॥ यमिदमार्याष्टांगिका सय्यथीदं सम्यग्दृष्टिः सम्यक्संकल्पः सम्यग्व्यायामः सम्यक्कर्मान्तो सम्यगाजीवः सम्यग्वाक् सम्यक्स्मृतिः सम्यक्समाधिरियं सा भिक्षवः तथागतेनार्यास्मिं धर्मविनये मध्यमा प्रतिपदा अभिसंबुद्धा चक्षुकरणीया उपसमसंवर्तनिका निर्विदाये विरागाये निरोधाये श्रामण्याये संबोधाये निर्वाणाये संवर्तति ॥

चत्वारि खलु पुनरिमानि भिक्षवो आर्यसत्यानि । कतमानि चत्वारि । सय्यथीदं दुःखमार्यसत्यं दुःखसमुदयो आर्यसत्यं दुःखनिरोधो आर्यसत्यं दुःखनि-

1. M °gavân âyushmantaṁ paṁcakâ bhadravârgîyâm âmantrayasi° B° paṁcakâ bhadravargikâṁ âmantre° BM °kshava i(M °var i)ti bhagavân iti bhikshû bha(M °kshur bha)gavanta (M °vataḥ) pra°. — $2^1$. M °vân so taṁ eta°. — $2^2$. BM °ntau ka°. — $3^1$. M °tamau ya° B °dvau pa°. — $3^2$. B paçcâd yaṁ kâmeshu kâmaṁ sukhallikânuyogyo grâmye prâthu° M °ry-°llikânuyogyo grâme prâthu° BM °ryo(M °ryyo) nâthasaṁhito nâtibrahmacaryaṁsyâ(M °yasya) na nirvi° niro(B °râ)dhâye na çrâmaṇyâ(M °na sâmânyâ)ye na saṁbodhâ(B °dhyâ)ye na nirvâṇâye na saṁvarttati ‖ ya(M °yathâ)çcâyaṁ âtmakilâmathânuyogâ duḥ° hito i°.

6. B °thâgatâryasmiṁ° M °thâgatân âryyasmiṁ° dhyame pra° BM °upasamasaṁvarttatikâ nirvi° M °çrâmanyâye saṁbo° rvâṇâye saṁ°. — 9. M °kshavas ta° dhamavinaye° BM °upasamasaṁvarttati(M °ti ‖ )kâ nirvi°.

12. M °ryyâshṭâṁgikaḥ | sayyathâpi nâ saṁmyagdṛi° B °daṁ saṁmyagdṛi° BM °shṭiḥ saṁmyaksaṁkalpaḥ saṁmyagvyâyâmaḥ(M °ma) saṁmyakka(M °ka)rmânta(M °ntaḥ) saṁmyagâjîvaḥ saṁmyakvâk saṁ(M °grâkyaṁ saṁ)myaksmṛitiḥ saṁmyaksa(M °ṛsa)mâdhir i-(M °dhiḥ i)yaṁ sâ° M °ddhâç cakshu° upasamaṁ saṁvarttati ‖ kâ nirvi° B °upasamasaṁvarttatikâ nirvidâye nirâgâ° rvâṇâye samvarttati | .

$17^1$. M °kshavaḥ â° BM °tyâni ka°. — $17^2$. B °tvâri sa°. — 18. BM °daṁ ‖ duḥkham âryaṁ(M °ryya)satyaṁ duḥkhasamu° M °dayaṁ âryyasamudayo âryyasatyaṁ duḥkhanirodhagâmini pra° B °dho | âyasatyaṁ duḥkhanirodha°.

रोधगामिनी प्रतिपदार्यसत्यं ॥ तत्र भिक्षवः कतमं दुःखं आर्यसत्यं ॥ तद्यथा ॥ जातिः दुःखं जरा दुःखं व्याधि दुःखं मरणं दुःखं अप्रियसंप्रयोगं दुःखं प्रियविप्रयोगं दुःखं यं पीच्छन्तो पर्येषन्तो न लभति तं पि दुःखं रूपं दुःखं वेदना दुःखा संज्ञा दुःखा संस्कारा दुःखा विज्ञानं दुःखं संक्षिप्तेन पंचोपादानस्कंधा दुःखा । इदं भिक्षवः दुःखमार्यसत्यं ॥ तत्र कतमो दुःखसमुदयो आर्यसत्यं । यायं तृष्णा पौनर्भविका नन्दीरागसहगता तत्रतत्राभिनन्दिनी अयं भिक्षवो दुःखसमुदयो आर्यसत्यं ॥ तत्र कतमो दुःखनिरोधो आर्यसत्यो । यो एतस्यैव तृष्णाये नन्दीरागसहगताये तत्रतत्राभिनन्दिनीये अशेषक्षयो विरागो निरोधो त्यागो प्रहाणो प्रतिनिःसर्गो [369b]अयं भिक्षवो दुःखनिरोधो आर्यसत्यः ॥ तत्र कतमा दुःखनिरोधगामिनी प्रतिपदार्यसत्या । एषैव आर्याष्टाङ्गो मार्गो । तद्यथा सम्यग्दृष्टिः सम्यक्संकल्पः सम्यग्वाचा सम्यक्कर्मान्तः सम्यगाजीवः सम्यग्व्यायामः सम्यक्स्मृतिः सम्यक्समाधिः इयं भिक्षवः दुःखनिरोधगामिनी प्रतिपदार्यसत्यं ॥

इदं दुःखमिति भिक्षवः पूर्वं अननुश्रुतेहि धर्मेहि योनिसो मनसिकारा ज्ञानं उदपासि चक्षुरुदपासि विद्या उदपासि बुद्धि उदपासि भूरिरुदपासि प्रज्ञा उदपासि आलोकं प्रादुरभूषि ॥ अयं दुःखसमुदयो ति इदं भिक्षवो पूर्वं अननुश्रुतेहि धर्मेहि योनिशो मनसिकारात् ज्ञानमुदपासि चक्षुरुदपासि विद्या उदपासि बुद्धिरुदपासि भूरिरुदपासि मेधा उदपासि प्रज्ञा उदपासि आलोकं प्रादुरभूषि ॥ अयं दुःखनिरोधो ति मे भिक्षवः पूर्वं अननुश्रुतेहि धर्मेहि योनिशो मनसिकारात् ज्ञानमुदपासि चक्षुरुदपासि विद्या उदपासि बुद्धिरुदपासि भूरिरुदपासि मेधा उद-

$1^{1}$. M °kshavo ka ° duḥkha âryya°. — 2. M jâti duḥkhaṁ jarâ° BM °maraṇa duḥkhaṁ apriyasamprayogaṁ(M °go) duḥkhaṁ priya(M °yavi)prayogaṁ duḥkhaṁ yaṁ piccha(M °yaṁ prisa)nto parye(M °rya)sha° M °taṁ pi duḥkhaṁ vedanâ duḥkhaṁ saṁjñâ duḥkhaṁ duḥkhâ saṁskârâ duḥkhâ duḥkhâ vijñânaṁ° B °rûpa duḥkhaṁ ve ° skârâ duḥkhâ duḥkha vijñânaṁ duḥkha saṁkshi°. — $5^{1}$. M iyaṁ bhikshavo duḥ°. — $5^{2}$. BM °tyaṁ yo°. — $5^{3}$. BM yogaṁ trishṇâ mauna(B °naḥ)bha ° nî ‖ ayaṁ°.

$7^{1}$. M °satyaṁ B °tyo yo°. — $7^{2}$. M °etaiva tri ° niye açasha° B °çedhakshayo° M °hâṇân prati ° ryyasatyo. — 9. BM °katamo duḥ° M °rodhogâ° B °dâryaṁsatyâ ‖ . — $10^{1}$. M °mârgaḥ ‖ . — $10^{2}$. BM °thâ ‖ saṁmyagdrishṭiḥ(B °shṭiḥ) saṁmyaksaṁ° B °lpaḥ saṁmyagvâcâ saṁmyakkarmântaḥ saṁmyagâ° M °lpaḥ saṁmyaksaṁvocâḥ saṁmyakkarmantâ saṁmyagâ° BM °vaḥ saṁmyagvyâyâmaḥ saṁmyaksmṛitiḥ saṁmyaksa° M °mâdhir iyaṁ°.

13. M °kshavo pûrvaṁ anaou° B °naṁ udapâsi | cakshu° M °ddhir udapâsi âlokaṁ prâdurbbhûshi ‖ . — 15. B °samudayeti i° M °yo ti imaṁ bhikshavaḥ purva a° BM °nusmṛite° M °kârâ jñânam u° B °prajñâ udapâsi ‖ â° BM °loka prâ°.

18. M °rodheti me bhikshavo pûrve a ° kârâ jñânaṁ udapâsi cakshur udapâsi bu ° rir ûdapâsi me ° loka prâ°.

पासि प्रज्ञा उद्पासि आलोको प्रादुरभूषि ॥ इयं च दुःखनिरोधगामिनी प्रतिपदा इति मे भिक्षवो पूर्वे अननुश्रुतेहि धर्मेहि योनिशो मनसिकारात् ज्ञानं उद्पासि यावदालोको प्रादुरभूषि ॥ तं खलु पुनरिमं दुःखमार्यसत्यं परिज्ञेयं ति मे भिक्षवः पूर्वे अननुश्रुतेहि धर्मेहि योनिशो मनसिकारात् ज्ञानमुद्पासि यावदालोको प्रादुरभूषि ॥ तेन खलु पुनरयं दुःखसमुदयो आर्यसत्यो प्रहातव्यो ति मे भिक्षवः पूर्वे अननुश्रुतेहि धर्मेहि योनिशो मनसिकारात् ज्ञानमुद्पासि यावदालोकं प्रादुरभूषि ॥ अथ खलु पुनरयं दुःखनिरोधो आर्यसत्यो साक्षीकृतो भिक्षवः पूर्वे अननुश्रुतेहि धर्मेहि योनिशो मनसिकारा ज्ञानमुद्पासि यावदालोको प्रादुरभूषि ॥ सा खलु पुनरियं दुःख[370a]निरोधगामिनी प्रतिपदार्यसत्या भाविता मे भिक्षवः पूर्वे अननुश्रुतेहि धर्मेहि योनिशो मनसिकारा ज्ञानमुद्पासि यावदालोकं प्रादुरभूषि ॥ यावच्चाहं भिक्षवः इमानि चत्वार्यार्यसत्यानि एवं त्रिपरिवर्तं द्वादशाकारं यथाभूतं सम्यक्प्रज्ञया नाभ्यज्ञासिषं न तावदहं अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो प्रतिजानेहं नापि ताव मे ज्ञानं उद्पासि अकोप्या न मे चेतोमुक्तिः साक्षीकृता । यतो अहं भिक्षवः इमानि चत्वार्यार्यसत्यानि एवं त्रिपरिवर्तं द्वादशाकारं तथाभूतं सम्यक्प्रज्ञया अभ्यज्ञासिषं अथाहं अनुत्तरां सम्यक्संबोधिमभिसंबुद्धो ति प्रजानामि ज्ञानं च मे उद्पासि अकोप्या च मे चेतोविमुक्तिः प्रज्ञाविमुक्तिः साक्षीकृता ॥

इदमवोचद्भगवां वाराणस्यां विहरन्तो ऋषिवद्ने मृगदावे इमस्मिं च पुनः व्याकरणे आयुष्मतो आज्ञातकौण्डिन्यस्य विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं

1. M °rodheti me bhikshavaḥ duḥkhanirodhagâ° B °dâ ‖ ime bhi° M °dâ ime bhi ° çrute dha ° kârâjjñânaṁ ° loke prâ°. — 3. BM sa khalu punar ayaṁ duḥkhasamudayo âryasatyaḥ(M °tyo) prahâtavyo(M °vye) ti me bhikshavaḥ pû(M °pu)rvaṁ ananuçrutehi dharmehi yoniço manasikârât jñânam udapâsi yâvad âloko(M °ke) prâdur abhûshi ‖ taṁ khalu° M °duḥkhaṁ ârya° BM °parijñânaṁti(M °nanti) me° M °kshavo pûrvaṁ a ° kârâjjñâna° BM °si | yâ° M °loke prâ°. — 5. BM °prahiṇo(M °ṇe) ti me° M °kshavo pû ° loke prâdurbhûshi ‖.

7. M °kṛitâ bhi ° kârât jñânaṁ uda ° loke prâ°. — 9. M sa khalu ° rodho gâ ° ryasatyo bhâ ° pûrvaṁ a ° kârât jñânaṁ uda ° loke prâ° B °loka prâ°.

11. M yâvat câhaṁ bhikshavo i ° evaṁ hiṁpari° B °çâkâlaṁ yathâ° BM °taṁ saṁmyakpra ° ttarâṁ(B °râyâṁ) saṁmyaksaṁ° M °pi tâvat me jñâ ° pyâ ca me veto° B °pyâ va ma ce° BM °tâ ya°. — 14. B yato | ahaṁ bhi° M °to 'haṁ bhi° BM °taṁ saṁmyakprajña(M °jñâ)yâ abhyajñâsishaṁ a(M °sham a)thâ ° ttarâṁ(B °ri) saṁmya° M °ddhonâṁ pra° B °mi jñâna ca me ° si | ako°.

18. M °shipattane mṛi° B °smiṁ na pu° M °punar vyâka ° jaṁ vigatamalaṁ dharmeshu dharmacakshu viçuddhaṁ ‖ ashṭâ° B °jo vigatamalaṁ dharmeshu dharmacakshu viçuddhaṁ |.

अष्टादशानां च देवकोटीनां विरजो विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं । इयं च महापृथिवी अतिरिव षड्विकारं कंपे छिन्नमिव पत्रं वेधे संप्रवेधे पुरस्तिमश्च अन्तो उन्नमति पश्चिमो च अन्तो ओनमे पश्चिमो च अन्तो उन्नमे पुरस्तिमो च अन्तो ओनमे दक्षिणो च अन्तो उन्नमे उत्तरो चान्तो ओनमे उत्तरो चान्तो उन्नमे दक्षिणो चान्तो ओनमे मध्यो च ओनमे अन्तो उन्नमे अन्तो ओनमे मध्यो उन्नमे । अप्रमेयं च लोके ओभासमभूषि अतिक्रम्यैव देवानां देवानुभावं नागानां नागानुभावं यक्षाणां यक्षानुभावं या पि ता लोकान्तरिका अन्धकारार्पिता तमिस्रा तमिस्रार्पिता अघा असंविदिता असंविदितपूर्वा यत्रेमे चन्द्रमसूर्या एवं महर्द्धिका एवं महानुभावा आभया आभां नाभिसंभुणन्ति आलोकेन वालोकं स्फुरन्ति नापि च ते ओभासेन स्फुटा अभूषि । अन्ये पि ये तत्र सत्वा उपपन्ना ते पि तेनोभासेन अन्यमन्यं संजानेन्सुः । अन्ये पि किल भो सत्वा उपपन्ना । अन्ये पि किल भो सत्वा उपपंना । एकान्तसुखसमर्पिता च पुनस्तत्क्षणं तन्मुहूर्तं सर्वसत्वा अभून्सुः ये पि अवीचिमहानिरये उपपन्ना । भूम्या च देवा घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः । एतं मारिष भगवता वाराणस्यां [370$^b$] ऋषिवदने मृगदावे त्रिपरिवर्तं द्वादशाकारं अनुत्तरं धर्मचक्रं प्रवर्तितं अप्रवर्त्यं केनचिच्छ्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा केनचिद्वा पुनर्लोके सह धर्मेण । भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च हायिष्यन्ति आसुरा काया दिव्या काया अभिवर्धिष्यन्ति ॥

1. M °raṁ kampe echi° BM °m iva patra vedhe saṁ° M °pravedho purastime ca anto u° M °purastime ca anto onamo | da° uttare cânto oname | u° BM °madhye ca ona(M °ca unna)me anto unname(M °nto oname | ) anto ona(M °unna)me madhyo unna(M °dhye ona)me ‖.

6. B aprame ca loke ° atikraṁmyą me ca devânâṁ de° M °yâ pi tâṁ lokâṁtari° BM °ndhakârâpitatvâ nimi(M °nirmiṇi)santirisâyitatvâ(M °ntihâyitavyâ) âsaṁviditâ(B °tvâ) asaṁviditapû° M °rvâ yatra candra° B °trema candra° BM °sûryo(B °ryo | ) evaṁ maha°hânubhâvâ(B °vaṁ) âbhâya(M °ye) âbhâṁ ° nâ(B °nâbhi)saṁ° M °kaṁ spharanti | nâpi° B °kaṁ sphulanti nâ°. — 10. BM anyâ pi ye(B °ye pi) tatra° M °nnâ te pi tenâbhâ ° netsuḥ B °netsuḥ ‖.

11[2]. M °pannâḥ anye ° satvâ iha upapaṁnâ e° B °paṁnâ e°. — 12. B ekânte su° M °ṇaṁ tatmuhû° BM °pi avacanehâ(M °ho) ni° BM °upapannâ(M °nnâḥ) bhû°. — 13. B °rayetsuḥ | ça° M °rayetsuḥ ça ° yetsuḥ ‖ B °yetsuḥ e°. — 14. M êvaṁ mâ ° shipattane mṛi ° trishpari° B °triparivartitaṁ dvâ ° taṁ | aprakṛityaṁ | kenacicchra° M °pravatyaṁ kenacicchravaṇena vâ brâhmaṇena kenacid vâ puna loke° B °kenacid vo pu° B °rmeṇa bha°.

16. M °to janakasyâ° BM °ṇâṁ ca hâ(B °ho)yishyati | âsurâ kâyâ(M °yâḥ) di° B °shyanti bhû°.

भूम्यानां देवानां घोषं श्रुत्वा चतुर्महाराजिका देवा घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः । त्रयस्त्रिंशा देवा यामास्तुषिता देवा निर्माणरतयो देवा ब्रह्मकायिका देवा घोषमुदीरयेन्सुः शब्दमनुश्रावयेन्सुः ॥ एवं मारिष भगवता वाराणस्यां ऋषिवदने मृगदावे त्रिपरिवर्तं द्वादशाकारमनुत्तरं धर्मचक्रं प्रवर्तितं अप्रवर्त्यं केनचिच्छ्रमणेन वा ब्राह्मणेन वा देवेन वा मारेण वा अन्येन वा पुन लोके सह धर्मेण । तं भविष्यति बहुजनहिताय बहुजनसुखाय लोकानुकंपाय महतो जनकायस्यार्थाय हिताय सुखाय देवानां च मनुष्याणां च । हायिष्यन्ति आसुराः काया दिव्याः काया अभिवर्धिष्यन्ति ॥ आत्तमना आयुष्मन्तो पंचका भद्रवर्गीया भगवतो भाषितमभिनन्दे ॥

भगवान्सम्यक्संबुद्धो यदर्थं समुदागतो तमर्थं अभिसंभावयित्वा वाराणस्यां विहरति शास्ता देवानां च मनुष्याणां च ॥ तत्र खलु भगवां आयुष्मन्तां पंचकां भद्रवर्गीयानामन्त्रयति ॥ रूपं भिक्षवो अनात्मा वेदना अनात्मा संज्ञा अनात्मा संस्कारा अनात्मा विज्ञानं अनात्मा । इदं रूपं चे भिक्षवः आत्मा अभविष्यत् न च रूपं आबाधाय दुःखाय संवर्तेत लभ्याच्च रूपे कामकारिकता एवं मे रूपं भवतु एवं मा भवतु यस्मात्तु भिक्षवो रूपं अनात्मा तस्माद्रूपं बाधाय दुःखाय संवर्तति न चात्र लभ्यति कामकारिकता एवं मे रूपं भवतु एवं मा भवतु ॥ इयं वेदना चे भिक्षवो आत्मा अभविष्यत् न च वेदना आबाधाय दुःखाय संवर्तति लभ्या एवं वेदनाया कामकारिकता एवमे वेदना भवतु एवं मा भवतु । यस्मा-

1. M °myá de° BM °hájiká ° dírayetsuḥ ça ° yetsuḥ | . — 2. BM °sham udírayetsuḥ çabdam udírayetsuḥ° M °vayetsuḥ | . — 3. M °shipattane mṛi ° trishparivṛittam̃ dvá° B °rttitam̃ | apavartiyam̃ kenaciççrama° M °cchravaṇena vá ° punaḥ lo° BM °rmeṇa tam̃°.

6. M °nakasyá° BM °ṇám̃ ca há°. — 7. B áyi° M °yishyanti | ásurá káyáḥ divyá káyá a° B °rddhishyanti á°. — 8. M °shmantam̃ pam̃ ° dravargiká bha° B °rgiká bha°. — 10. M atha bha° B bhagaván sam̃mya°.

11. M °gaván áyu° B °shmatám̃ pam̃caká bha° M °dravargikánám áma° B °mantrayesi || M °yáti || . — 12. M rupam̃ ° nam̃ anátmá B °nam̃ anátmam̃ ce°. — 13. BM cedam̃ rúpam̃ ce bhi(M °ced bhi)ksha° B °vaḥ asmám̃ abhavishyat || na ca rúpam̃ á° M °shyan | na ca rúpam̃ ábáháya duḥkháya samvattarishyet | va rúpe kámakárikṛitá evam̃ me rúpam̃ bhavatu evam̃ má bhavatu || yasyácca° B °sam̃vartetha ṛiddhyác ca rúpe kámakárike tán evam̃ me rúpam̃ bhavatu evam̃ má bhavatu ya° M °tasmád rupam̃ ábá° B °rtati | na° M °makárimatá | evam̃ rúpam̃°.

17. B imam̃ vedaná ce° M °ced bhiksha° B °vo átmá abha° M °shyan | na° BM °rtati(B °ti | ) ṛiddhyá evam̃ vedanáyá° M °makárimatá || evam̃ me ve° B °rikátá evam me° má bhavatu ya°. — 18. M yasmád bhavatu bhikshavo vedaná anátmá° BM °tra ṛiddhyati kámakárakatá(M °makárimatá | ) evam̃ me° B °ná bhavatu má bha°.

द्भिक्षवः वेदना अनात्मा तस्माद्वेदना आबाधाय दुःखसमुदयाय संवर्तति न चात्र ऋध्यति कामकारिकता एवं मे वेदना भवतु एवं मा भवतु ॥ इयं संज्ञा चेत् भिक्षवो आत्मा अभ[371ª]विष्यन्न भवति संज्ञा आबाधाय दुःखाय ऋध्यति च कामकारिकता एवं मे संज्ञा भवतु एवं मा भवतु । यस्माद्भिक्षवः संज्ञा अनात्मा तस्मात्संज्ञा आबाधाय दुःखाय संवर्तति न चात्र ऋध्यति संज्ञाया कामकारिकता एवमेव संज्ञा भवतु ॥ संस्कारा भिक्षवः आबाधाय संस्कारा चेद्भिक्षवः आत्मा अभविष्यन्न चैते संस्कारा आबाधाय दुःखाय संवर्तन्ति ऋध्या च संस्काराणां कामकारिकता एवं मे संस्कारो भवतु एवं मे मा भवतु । यस्माद्भिक्षवः संस्कारा अनात्मा तस्मात्संस्कारा आबाधाय दुःखाय संवर्तन्ति न चात्र ऋध्यति कामकारिकता एवं मे संस्कारा भवन्तु एवं मा भवन्तु ॥ विज्ञानं चेद्भिक्षवो आत्मा अभविष्यत् नेदं विज्ञानमाबाधाय दुःखाय संवर्तति ऋध्येच्च विज्ञानस्य कामकारिकता एवं मे विज्ञानं भवतु एवं मा भवतु । यस्माद्भिक्षवो विज्ञानमनात्मा तस्माद्विज्ञानं आबाधाय दुःखाय संवर्तति न चात्र ऋध्यति कामकारिकता एवं मे विज्ञानं भवतु एवं मा भवतु ॥ तस्मादिह भिक्षवो एवं शिक्षितव्यं ॥ यत्किंचिद्रूपं अध्यात्मा वा बहिर्धा वा औदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यं दूरे अन्तिके वा अतीतानागतप्रत्युत्पन्नं वा सर्वं रूपं नैतं मम नैषो हमस्मि न एतदात्मेति एवमेतं यथाभूतं सम्यक्प्रज्ञया द्रष्टव्यं । या काचिद्वेदना या काचित्संज्ञा ये केचित्संस्कारा यं कंचिद्विज्ञानं अध्यात्मं वा बहिर्धा वा औदारिकं वा सूक्ष्मं वा

3. M °ced bhiksha° BM °shyan na(M °shyat na) bhavati saṁ(B °sa)jñá á ° kháya ridhya(M °ddhya)ti ca° M °makárimatá | evaṁ me° B °jñá bhavatu evaṁ me má bhavato ya°. — 4. M °kshavo saṁjñá aná ° t saṁ ábá° BM °tra ridhya ° makárimatá | evaṁ me saṁjñá bhavatu evaṁ má bhavato ‖ .

6. M °bhikshavo ábá ° kshavo átmá° B °shyat na cai° BM °te saṁskáro ábá° B °kháya saṁvarttenti ṛiddhyá ca° M °rttati ridhyá va saṁskáráṇáṁ kámakárigatá ‖ evaṁ me saṁskárá bhavatu evaṁ má° B °katá evam eva saṁ°. — 8. M °kshavo saṁskárá anátma ta ° rttati na° BM °tra ridhya° M °makárimatá | evaṁ me saṁská bhavatu evaṁ má bhavatu ‖ B °katá evam eva saṁ°. — 10. BM vijñánaṁ bhiksha° M °shya nedaṁ° B °saṁvarttenti ṛi° M °dhye va vijñánaṁ kámakárimatá | evaṁ me° B °cca vijñánaṁ kámakárikatá eva me°.

12. B °vo vijñánaṁm aná° M °vo vijñánaṁ aná ° kháya samvartta ° tra ridhya ° rimatá | eva me° B °me vijñánaṁ me bhavatu e° M °naṁ bhavato má evaṁ bhavatu ‖ . — 14ª. BM °vá çúkshmaṁ ° ṇítaṁ vá ye dú° B °tánagate pratyunprannaṁ° M °taṁ mama esho ham asmiṁ naitaṁ mama etaṁ átmeti | evaṁm evaṁ ya° B °smin na etad amátme°.

17. BM °skárá ya(M °ye) kecid vi ° dhyátmaṁ(B °tma) vá ° vá çúkshmaṁ ° M °rvaṁ vijñánam etaṁ ° smi naita° B °haṁ asmiṁ na°.

हीनं वा प्रणीतं वा यं दूरे अन्तिके वा अतीतानागतप्रत्युत्पन्नं वा सर्वं विज्ञानं नैतं मम नैषो हमस्मि न एतमात्मेति । एवमेतं यथाभूतं सम्यक्प्रज्ञया द्रष्टव्यं ॥ इदमवोचद्भगवां वाराणस्यां विहरन्तो ऋषिवदने मृगदावे इमस्मिं च पुनर्व्याकरणे भाष्यमाणे आयुष्मत आज्ञातकौण्डिन्यस्यानुपादायास्रवेभ्यश्चित्तं विमुक्तं चतुर्णां च भिक्षूणां विरजं विगतमलं धर्मेषु धर्मचक्षु विशुद्धं आयुष्मतो अश्वकिस्य भद्रिकस्य वाष्पस्य महानामस्य त्रिंशतीनां च देवकोटीनां विरजं विगतमलं धर्मेषु धर्मचक्षुं विशुद्धं ॥ आत्तमना आयुष्मन्तो पंचका भद्रवर्गिका भगवतो भाषितमभ्यनन्दे ॥

भगवान्सम्यक्संबुद्धो यदर्थं समुदागतो तमर्थमभिसंभावयित्वा वाराणस्यां विहर[371b]ति ऋषिवदने मृगदावे ॥ तत्र खलु भगवां आयुष्मन्तां पंचकां भद्रवर्गिकां आमन्त्रयसि ॥ सचेद्यन्यथ भिक्षवः किंमूलिका उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्यउपायासाः संभवन्ति किंजातिका किंप्रभृतिका ॥ एवमुक्ते आयुष्मन्ता पंचका भद्रवर्गीया भगवन्तमेतदुवाचत् ॥ भवमूलका खलु भगवन्धर्मा भवनेत्रिका भगवद्भवप्रभवा भगवद्भवप्रतिशरणा साधु भगवां भिक्षूणामेतमर्थं भाषे । भिक्षू भगवतो संमुखाच्छ्रुत्वा संमुखात्प्रतिगृहीत्वा तथत्वाय धारयिष्यन्ति ॥ एवमुक्ते भगवां पंचकां भद्रवर्गिकां एतदवोचत् ॥ रूपमूलका भिक्षवः उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्योपायासास्संभवन्ति रूपजातिका रूपप्रभृतिका । वेदनामूलका संज्ञामूलका संस्कारमूलका विज्ञानमूलका भिक्षवः उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति विज्ञानजातिका विज्ञानप्रभृतिका ॥

सचेद्यन्यथ भिक्षवो रूपं नित्यं वा अनित्यं वा ॥ अनित्यं हि तं भगवं ॥ रूपस्य

2. BM °bhûtaṁ saṁmya°. — 3. M °shipattane mṛi ° puna vyâkaraṇe ° ne âyushmatâjñâ ° dâçrave° B °dâyravebhya° BM °bhikshû(M °kshu)ṇâṁ vi° dharmaca(M °rmava)kshu viçuddhâ(M °ddhaṁ)ni âyushmato duça(M °to 'çva)ki ° triṁçatitâṁ ca de° M °koṭinâṁ ° rmacakshu vi° BM °çuddhâni â°.

7. BM °ttamano â°. — 9. M atha khalu bhagavân saṁmya° B bhagavân saṁmya° B °tam arthaṁm abhi ° hari[f° 371b]shyati | ṛi° M °shipattane mṛi°. — 10. M °gavân âmushma° B °shmantâ paṁ° BM °dravargikâm âmantrayesi(M °yati) |.

11. BM saced anya° M °vaḥ kiṁmuli° BM °daumanasyaṁ(M °syo)pâ° M °yâsâ saṁ°. — 12. M °shmantâḥ paṁ ° dravargikâ bha° B °rgiyâ bhavanta° M °d avâca ||. — 13. BM evaṁmûla° M °trikâ bhagavan tava prabhâvâ bhaga ° dhu bhagavân bhikshuṇâm e°. — 14. M bhikshur bha ° tvâ saṁmukhân prati° B °gṛihitvâ ta°. — 15. B °rgikâm e°.

16. M °kshavar utpa° BM °bhavati | rû° B °bhṛitikâ ve°. — 17. M vadanâ ° kshavo u ° syopâyâso sambhavaṁnti || vijñânajâ° B °sâḥ saṁbhavâ bhavanti°. — 20¹. M saced anyathâ bhikshavaḥ rû° B °nyathâ bhi° BM °anityaṁ vâ a°. — 20². M °gavan |. — 20³. BM khalu ° kshavaḥ(M °vo) anityaṁ vâ viditvâ caratâṁ(M °rantâṁ) prabhaṁguratâṁ vipariṇâ ° padyetsuḥ â ° dâhaghâsa° B °jvarâ saṁkle ° punaḥbhavikâ âyatyâ âyatyâṁ°.

खलु पुनर्भिक्षवः अनित्यतां विदित्वा चलतां प्रभंगुणतां विपरिणामविरागनिरोधतां विदित्वा ये रूपप्रत्यया उत्पद्येन्सुः आश्रवा विघाता परिदाघा सज्वरा सांक्लेशिका पुनर्भविका आयत्यां जातिजरामरणीयास्ते निरुध्यन्ते । तेषां निरोधान्न उत्पद्ये आश्रवा विघाता परिदाघा संज्वरा सांक्लेशिका पौनर्भविका आयत्यां जातिजरामरणीया ॥ सचेत् मन्यथ भिक्षवो वेदना संज्ञा संस्कारा विज्ञानं नित्यं वा अनित्यं वा ॥ अनित्यं हि तं भगवन् ॥ भगवानाह ॥ साधु भिक्षवो विज्ञानस्य खलु पुनर्भिक्षवः अनित्यतां विदित्वा चलतां प्रभंगुणतां विपरिणामविरागनिरोधतां विदित्वा ये विज्ञानप्रत्यया उत्पद्येन्सुः आश्रवा विघाता परिदाघा सज्वरा सांक्लेशिका पौनर्भविका जातिजरामरणीयास्ते निरुध्यन्ति व्युपशाम्यन्ति प्रहाणमस्तं गच्छन्ति । तेषां निरोधान्नोत्पद्यन्ति विज्ञानमूलका आश्रवा विघाता परिदाघा सज्वरा सांक्लेशिका पौनर्भविका आयत्यां जातिजरामरणीया विज्ञान[372ᵃ]जातिका विज्ञानप्रभूतिकाः । तस्मादिह वो भिक्षवः एवं शिक्षितव्यं ॥ यत्किंचिद्रूपं अध्यात्मं वा बहिर्धा वा औदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यं दूरे न्तिके अतीतमनागतं प्रत्युत्पन्नं सर्वं रूपं न एतं मम न एषो हमस्मि न एषो आत्मा ति एवं वो भिक्षवः शिक्षितव्यं ॥ या काचिद्वेदना या काचित्संज्ञा ये केचित्संस्कारा यत्किंचिद्विज्ञानं अध्यात्मं वा बहिर्धा वा औदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यं दूरे अन्तिके वा अतीतानागतप्रत्युत्पन्नं नैते मम नैषो हमस्मि नैष आत्मा ति । एवमेतं यथाभूतं सम्यक्प्रज्ञाया द्रष्टव्यं ॥ इदमवोचद्भगवान्वाराणस्यां विहरन्तो ऋषिपदने मृगदावे इमस्मिंश्च पुन व्याकरणे भाष्यमाणे आयुष्मानाज्ञातकौण्डिन्यो वशवशीभावं प्राप्तुणेसि । चतुर्णां भिक्षूणां अनुपादा-

3. B °rodhâm̃ na u° M °rodhe utpadyante âçra° B °jvarâ sam̃kle° M °çikâ punarbha° BM °vikâ âratyâ jâ° B °ṇîyâ sa°. — 5. BM sacet a(M °d a)nya° B °skâro vi° anityam̃ vâ ni°.

$6^1$. B ni°. — $6^2$. B °puna bhikshavaḥ° M °carantâm̃ prabham̃gulatâm̃ viparinâmavirâganiro° B °gurutâm̃ vipariṇâ° BM °jñânapratyayo utpadyetsuḥ âçra° B °dâghâ sam̃jva° M °çikâ punarbha° hâṇaçastram̃ ga° B °hâṇasastam̃° BM °gacchati te°. — 10. M °rodho notpa° BM °dyanti | vijñânamû° B °ṇîyâyâ vijñânajâ° M °bhṛitikâ B °bhṛitikâs tasmâ°.

12. M °kshavo e°. — 13. M °t kim̃cit rûpam̃ adhyâ° M °hînam̃ vâ prahînam̃ vâ praṇî° dûranti° evam̃ naitam̃ rûpam̃ mama naisho ham asmi naisho â° B °ham asmim̃ na esho â° BM °vam̃ bho bhi° M °kshavo çi° B °vyam̃ yâ°. — 15. BM °jñâ yâ(M °ye) kecit sam̃° nnam̃ naite(M °tam̃) mama naisho ham asmim̃ naisha(M °sho) â°.

$18^1$. M evam evam̃ ya° tam̃ sam̃mya°. — $18^2$. M °bhagavâm̃ vârâṇa° shipattane mṛi° smim̃ ca pu° nyo vasavaçi° B °nyo cala° ṇetsuḥ | M °ṇetsuḥ. — 20. M °bhikshuṇâm̃ anupâdâyaçra° B °ç cittâyâni vimu° BM °kisya bhaddrika° M °pam̃câṅgikâ° B °gikâyâm̃ ca de° M °ṭînâm̃ vigatamalam̃ virajam̃ dharme° cakshum̃ viçuddhâni B °cakshum̃shi viçuddhânâni â°.

यास्रवेभ्यश्चित्तानि विमुक्तानि आयुष्मतो अश्वकिस्य भद्रिकस्य वाष्पस्य महानामस्य पंचांगिकानां च देवकोटीनां विरजं विगतमलं धर्मेषु धर्मचक्षूंषि विशुद्धानि । आत्तमना आयुष्मन्ता पंचका भद्रवर्गिका भगवतो भाषितमभिनन्दे ॥

भगवां सम्यक्संबुद्धो यदर्थं समुदागतो तमर्थमभिसंभावयित्वा वाराणस्यां विहरति ऋषिवदने मृगदावे । तेन खलु पुनः समयेन त्रयो भिक्षू वाराणसीं पिण्डाय प्रक्रमे । तेषां भिक्षूणां भगवां चेतसा चित्तानि अधिष्ठाय ओवदे अनुशासनं अनुशासे ॥ एवं भिक्षवः मनसा करोथ एवं मनसीकरोथ इमां वितर्का वितर्कयथ आत्मद्वीपा भिक्षवो विहरथ अनन्यद्वीपा आत्मशरणा अनन्यशरणा धर्मद्वीपा धर्मशरणा अनन्यशरणा । तेहि ततो भिक्षवः आत्मद्वीपेहि विहरन्तेहि अनन्यद्वीपेहि धर्मद्वीपेहि धर्मशरणेहि अनन्यशरणेहि योनिशो उपपरीक्षितव्यं किंमूलका उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति किंजातिका किंप्रभूतिका ॥ एवमुक्ते भिक्षू भगवन्तमेतदवोचत् ॥ भवमूलका भगवन्धर्मा भवनेत्रिका भगवन्भवप्रभवाः भवप्रतिशर[372b]णा । साधु भगवां भिक्षूणामेतमर्थं भाषे भिक्षू भगवतः संमुखाच्छ्रुत्वा संमुखात्प्रतिगृहीत्वा तथत्वाय धारयिष्यन्ति ॥ एवमुक्ते तां भिक्षू भगवानेतदवोचत् ॥ रूपमूलका भिक्षवो उत्पद्यन्ति शोकपरिदेवदुःखदौर्मनस्योपायासाः संभवन्ति रूपजातिका वा रूपप्रभूतिका वा । सचेत् मन्यथ भिक्षवः रूपं नित्यं वा अनित्यं वा ॥ रूपं अनित्यं हीदं भगवन् ॥ साधु भिक्षवः रूपस्य खलु पुनर्भिक्षवः अनित्यतां विदित्वा दुर्बलतां प्रभंगुणतां विपरिणामविरा-

3. B °bhinandaḥ ‖. — 4. M atha bhagavân sammya° B °vâṁ saṁmya° 6 ‖ ṛi° M °shipattane mṛi°. — 5. BM °yena dvau bhikshû° B °me tra°.

6. B trayo bhikshu bha° M trayo bhikshur bhagavân cetovasitâyaṁ ci° B °cetasâyaṁ ci° M °shṭhâye ovade âruçâ° B °de ânusâsanaṁ ânuçâse ‖. — 7. M °sâ karotha evaṁ mânasikarotha | imâṁ vitarkâ vitarkayatha âtmadîpâ bhikshavaḥ viha° B °rkaya | imâṁ vitarkâṁ vitarkayatha âtmadvîpa bhi° M °tmaçaraṇâ ananyaçaraṇâḥ dharmadvî° BM °nyaçaraṇâ(M °ṇâḥ) te°. — 9. M °bhikshavo âtma° BM °ntehi ananyadvîpehi ananyaçaraṇehi dharmadvî° B °ṇehi | yo° M °yoniço upaparîksha° B °kshatavyaḥ kiṁmû° BM °daurma-(B °rma)nasopâyâsâ(B °sâḥ) saṁ° jâtiko kiṁ° B °prabhûtikâ ‖.

12[1]. M °kte te bhikshur bhagantam e° B° bhikshu bha°. — 12[2]. B bhagavantamûlakâ bhagavân dharmabhavanetrikâ bhavantaprabhavâḥ bhagavataḥ prati° M bhavantamû° n dharmo bhavanetrikâ bhagavan prabhâvaḥ bhagavatâ prati°. — 13. B °she ‖ bhi° M °she ‖ bhikshur bhagavato saṁmukhâcchru° B °gavantaḥ saṁmukhâcchru° BM °khân pratigṛihitvâ pravivekitatvâ(B °tvâya) dhâ°. — 14. M evaṁm ukte° B °ktes tân bhikshû° M °bhikshu bha°. — 15. M °daumanasyopâyâso saṁ°.

16. M saced anya° BM °anityaṁ vâ rû°. — 17[1]. M °nitya hi°. — 17[2]. B sâdhû bhikshavaḥ purushasya kha° M °dhu bhikshavo purushasya khalu punar bhikshavo anitya° latâṁ prabhaṅgulatâṁ viparinâ° B °gulatâṁ viparinâ° M °vikâ âyatyâ jâ° BM °ṇyâ sace°.

गनिरोधतां विदित्वा ये रूपप्रत्यया उत्पद्यन्ति आश्रवा विघाता परिदाघा सज्वरा सांक्लेशिका पौनर्भविका आयत्यां जातिजरामरणीया ते निरुध्यन्ते ॥ सचेत् मन्यथ भिक्षवः वेदना संज्ञा संस्कारा विज्ञानं नित्यं वा अनित्यं वा ॥ अनित्यं हीदं भगवन् ॥ भगवानाह ॥ साधु भिक्षवो विज्ञानस्य खलु पुनर्भिक्षवो अनित्यतां वा दुर्बलतां प्रभंगुणतां विदित्वा ते निरुध्यन्ति व्युपशाम्यन्ति प्रहाणमस्तं गच्छन्ति । तेषां निरोधातो न उत्पद्यन्ति आश्रवा विघाता परिदाघा सज्वराः सांक्लेशिका पौनर्भविका आयत्यां जातिजरामरणीया निरुध्यन्ति । विज्ञानमूलका आश्रवा विघाता परिदाघा सज्वराः सांक्लेशिका पौनर्भविका आयत्यां जातिजरामरणीया विज्ञानजातिका विज्ञानप्रभूतिकाः । तस्मादिह वो भिक्षवो एवं शिक्षितव्यं । यत्किंचिद्रूपं अध्यात्मं वा बहिर्धा वा औदारिकं वा सूक्ष्मं वा हीनं वा प्रणीतं वा यद्दूरे अन्तिके वा अतीतानागतप्रत्युत्पन्नं सर्वं रूपं नैतं मम नैषो हमस्मि नैष आत्मेति एवमेव तं यथाभूतं सम्यक्प्रज्ञया द्रष्टव्यं ॥ इदमवोचद्भगवां वाराणस्यां विहरन्तो ऋषिवदने मृगदावे इमस्मिंश्च पुनर्व्याकरणे भाष्यमाणे त्रयो भिक्षू बलवशीभावं प्रापुणेन्सुः अशीतीनां च देवकोटीनां विरजा विगतमला धर्मेषु धर्मचक्षूंषि विशुद्धानि । आत्तमना ते भिक्षू भगवतो भाषितमभिनन्दे ॥

अथ खलु भगवां आषाढमासस्य उत्तरपक्षे द्वादशीयं पश्चाद्भक्तः पुरस्तात् संमुखो निषण्णो अर्धपौरुषायां छायायां अनुराधे नक्षत्रे विजये मु[373a]हूर्ते अनुत्तरं धर्मचक्रं प्रवर्तितं ॥ न खलु पुनर्बुद्धा भगवन्तो सुवर्णमयं वा धर्मचक्रं प्रवर्तेन्ति रूप्यमयं वा मुक्तामयं वा वैडूर्यमयं वा स्फटिकमयं वा मुसारगल्वमयं वा लो-

2. BM °asaṁjñā saskā°. — $4^{2}$. M sâdhû bhikshavaḥ vijñā° BM °anityam vâ du ° bhaṁgura(M °la)tâṁ vi° M °dhyanti teshâṁ° (*l. suiv.*) B °gacchati | . — 5. M °rodhân nopadyanti ‖ vijñânamûlatâ âçra° B °vighâto paridâhâ saṁjva° M °çikâ purnarbha ° tyâṁ jarâ ° ṇyâ vijñânajâtikâ° (*l.* 9) B °nti | teshâṁ nirodhân notpadyanti | .

7. B °tyâṁ jarâ ° bhṛitikâḥ ta° M °bhṛitikâs ta°. — $9^{1}$. B °kshavo atra çi° M °kshavo çi°. — $9^{2}$. M °cid rupaṁ adhyâ° M °ṇitaṁ va yaṁ dûre ° nnaṁ | sarvaṁ ya naitaṁ mama naisho° B °sho ham asmiṁ naisha âtmeti | e° M °sha ânmâ ti | evam etaṁ ya° M °bhûtaṁ saṁmya°.

12. M °syâṁ ṛishipattane mṛi° B °dâve | i° M °smiṁ ca punar vyâ ° bhikshu ba° B °bhikshû cala ° prâpûṇetsuḥ ‖ a° M °prâpûṇetsuḥ açiti° BM °ṭînâṁ virajo vigatamalaṁ dharme° M °rmacakshur viçuddhaṁ B °ddhâni â°. — 15. M âttamano tehi bhikshur bhaga°.

16. BM °vâṁ âkhâḍha° M° paçcâdbhaktaḥ° B °stân saṁmu° M °sharṇṇo adhya ° cchâyâyâṁ anurâḍhe naksha ° ye muhurtta anutta°. — 19. M °punaḥ bu ° gavaṁto su° BM° rmacakraṁ(B °kra) pravarttanti rû° B °vâ sphâṭi° M °kamayaṁ vâ asogalva ° hitikâmayaṁ vâ liḍikâmayaṁ vâ tâmramayaṁ vâ dânumayaṁ vâ mṛi°.

हितिकामयं वा रीतिकामयं वा ताम्रमयं वा लोहमयं वा शैलमयं वा दारुमयं वा मृत्तिकामयं वा । अथ खल्विमान्येव चत्वार्यार्यसत्यानि त्रिपरिवर्तं द्वादशाकारं धर्मचक्रं ॥ प्रवर्तिते प्रथमं धर्मचक्रप्रवर्तनसूत्रे आयुष्मतो आज्ञातकौण्डिन्यस्य विरजो विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं अष्टादशानां देवकोटीनां च । इयं च महापृथिवी अतिरिव षड्विकारं कम्पे प्रकम्पे संप्रकम्पे वेधे प्रवेधे संप्रवेधे दक्षिणतो अभिध्यायति वामतो पि अभिध्यायति वामदक्षिणतो पि अभिध्यायति संहर्षणीयं च कम्पयति दर्शनीयं च कम्पयति तोषणीयं च कम्पयति प्रेमणीयं च प्रह्लादनीयं च निर्वापनीयं च उल्लोकनीयं चासेचनकं चाप्रतिकूलं च प्रासादिकं च प्रसदनीयं च निरुद्वेगं च निरुत्त्रासं च कम्पति कम्पमाना च पुनर्महापृथिवी न कंचित्सत्वं व्याबाधति यदिदं त्रसं वा स्थावरं वा भगवतो ऽनुभावेनाप्रमेयं च लोके ओभासमभूषि अतिक्रम्य देवानां देवानुभावं नागानां नागानुभावं यक्षाणां यक्षानुभावं । या पि ता लोकान्तरिका अन्धकारार्पिता वा तमसा तमसार्पिता अघा असंभूता असंभूतपूर्वा यत्रेमे चन्द्रमसूर्या एवं महर्द्धिका महानुभावा आभाये आभां नाभिसंभुणन्ति आलोकेन वालोकं न स्फुरन्ति ता पि तेनावभासेन स्फुटा अभूंसु । ये पि तत्र सत्वा उपपन्ना ते अन्यमन्यं संजानेन्सुः अन्ये पि किल भो इह सत्वा उपपन्ना अन्ये पि किल भो इह सत्वा उपपन्ना एकान्तसुखसमर्पिता च पुनस्तत्क्षणं तन्मुहूर्तं सर्वसत्वा अभूंसु ये पि चावीचिस्मिं महानरके उपपन्नाः ॥

भगवां धर्मचक्रं प्रवर्तेन्तो एकषष्टिं त्रिसाहस्रमहासाहस्रलोकधातूं भाषमाण-

2. M °khalvimány evaṁ catvá° BM °kraṁ pra°. — 3. BM °rttitena pratha° M °maṁ dharmacakraṁ pravarttanasutre°. — 4. M imaṁ ca mahá° BM °ḍvikálaṁ kampe pra(M °prakaṁpe sapra)kampe vedhe saṁvedhe saṁpravedhe sarvato adhivyáyati vámato pi abhidhyáyati(B °pi adhivyáyati | ) vámadakshiṇato pi abhidhyá(B °dhyí)yati saṁharsha° M °toshaṇiyaṁ ca kaṁpayati | preshaṇiyaṁ prahládaçiyaṁ nirvá° B °preshaṇiyaṁ ca prahlá° M °llokaniyaṁ ca asecanakaṁ cápratikulaṁ° B °dikaṁ ca prasaniyaṁ ca niru° M °sadanipaṁ ca nirudvetaṁ ca nirudrásaṁ ca kaṁpati kampamáná ca ‖ pu° BC °tvaṁ vyávahati | yad i° B °sthâca vá bha° M °gavato anubháve° BM °shi | ati° B °mya devánáṁ vánubhávaṁ nágánubhávaṁ yakshâṇáṁ° M °kshâṇáṁ yakshá°.

12. BM °ndhakáro(M °lo)pitan vá(M °taṁ vá) tamasá tamasiyitatvá aghá(M °gho) aghá(M °gho) asaṁbhútá asaṁbhútapúrvá | yatre(M °tra)me candra° B °súryo e° M °rddhiká evaṁ mahánu° BM °ye ábhá rá(M °bháná)bhiçabhu° M °ṇanti | álokena vá álokaṁ na sphulanti táṁ pi tenábhásena sphuṭáṁ abhúnsuḥ | B °nsuḥ ye°. 15. M °tra satvá upapannáḥ te° BM °saṁjánetsuḥ anye pi kila bho iha satvá upapanná anye(M °nnáḥ a)pi kila bho iha satvá upapanno(M °nnáḥ) e° B °nsuḥ | ye° M °ye pi vávicismiṁ° B °vicismiṁ ° upapannaḥ ‖ .

18. M atha bhagaván dharmacakrapravarttanto° B °pravarttanto° BM °shashṭhiṁ tri° M °hásáhasrolo° BM °dhátuṁ bháshá(M °bhává)máṇaṁ svare(M °ra)ṇábhivijñápe(M °jñáye)ti | tato ° ṇi ye°.

स्वरेणाभिविज्ञापेति ततो च परेण बुद्धक्षेत्राणि । ये च तस्मिं समये बुद्धा भगवन्तो तेषां तेषां च परलोकधातुषु परिषदि धर्मं देशेन्ति ते भगवतो धर्मचक्रं प्रवर्तेन्तस्य तूष्णी अभून्सुः ॥ दुःप्रसहो सम्यक्संबुद्धो परिषदि धर्मं देशयति । भगवां दुःप्रस[373b]हो तूष्णीं अभूषि बुद्धघोषो च निश्चरति । विस्मिता परिषा भगवन्तं दुष्प्रसहं पृच्छति ॥ भगवं बुद्धघोषो निश्चरति । तस्मिं निश्चरन्ते तूष्णी अभूल्लोकनाथो दुष्प्रसहो विस्मिता परिषत्कलविंकमंजुघोषो मेघस्तनितदुन्दुभिस्वराभिगमो निश्चरति बुद्धघोषो न जल्पति वादीनां प्रवरो भगवान् ॥ दुष्प्रसहो आह ॥

लोकधातु महानाम तत्र शाक्यमुनिर्जिनः ।
धर्मचक्रं प्रवर्तेति यस्य घोषो निश्चरति ॥
लोकधातुसहस्राणि असंख्येयानि घोषये ।
श्रूयति वरबुद्धिस्य यथा दूरे य सन्तिके ॥
एवं महानुभावो यं परिपूर्णमनोरथो ।
संविभागं प्रवर्तेति संबुद्धो बोधियर्थिनां ति ॥

येन स्वरेण समन्वागतस्तथागतो र्हं सम्यक्संबुद्धो वाराणस्यां ऋषिवदने मृगदावे त्रिपरिवर्तं द्वादशाकारं अनुत्तरं धर्मचक्रं प्रवर्तयति सो स्वरो षष्टिभिराकारैः समन्वागतः । कतमैः षष्टिभिः । गम्भीरश्च तथागतस्वरो भीमरूपश्च आज्ञेयश्च हृद-

1. M °ddhá bhagavantaḥ teshám̃ cávalokalokadhátushu pariyadi dharmem̃ deçenti ‖ tam̃ bha° B °kram̃ pravarttetasya° M °sya bhúshṇí abhútsuḥ B °nsuḥ duḥ°. — 3[1]. M dushprasaho sam̃mya°. — 3[2]. M °gaván dushprasaho túshṇim abhú° B °shi ¦ bu° BM °ti vi°. — 4. B °ti bha°. — 5[1]. M °gava bu°. — 5[2]. BM tasmim̃ niçcarate maharshiṇá (M °ṇám̃) dharma(M °rmma)cakram̃ vácá tú° B °llokanáthe du° M °shprasaha vismito pa° BM °riparshat kala(M °t kara)vim̃° M °mam̃jughoshastanitadundubhisvaro vigamo° B °meghastarita° M °ddhaghosheṇa ja° B °lpati vádinám̃°.

8. M °hámáma°. — 9. BM °pravarttati°. — 10. M °dhátúsa° asam̃khyayá° BM °shayo | .

11. B çruyati° M çruyate va° B °ddhiya yathá°. — 12. B °norathá | M °norathá. — 13. BM dvipada(M °dam̃)çreshṭo sam̃vi° pravarttenti sam̃buddho(M °ddhaḥ) bodhirná(M °dhíná)rthiná iti | (M °ti) ye°. — 14. B °reṇa samanvágatás ta° M °s tagato 'rha samya° B °rham̃ sam̃mya° M °shipattane mṛi° trishparivartta dvá° BM °káram̃ a(M °ram a)nuttaradharma° rttayasi(M °si |) so° M °shashṭhibhi° gato B °gataḥ ka°.

16[1]. M °shashṭhibhiḥ B °bhiḥ ga°. — 16[2]. M gambhírasya tathágatasvaro° BM °bhíma(M °mma)rúpaçca ájñayaçca hṛi° premaṇíyaçca ase(B °sa)canikaçca(M °kasya) aprativaṇí° draçca apabhá(B °padbhá)raçca akalmá(M °lyá)shaçca rathanemigho(B °oenirgho)shaçca meghastani(B °stari)tameghagarjita(M °rjjitasvarçca satya)svaraçca vátavṛishṭi(B °shṭhi)stani° M °rjjitasvaraçca indrasvaraçca de° hmasvaraçca anukulasvaraçca dushṭasvaraçca

7. M so brâ° BM °to so pi parivrâjakâ anekâkâ(M °nekehi) parivrâjikâ(M °jake)hi sâ° M °gato B °gatâ sa°. — 8. B °tvâ | pa° BM °rishamadhye° M °kasvakehi â ° sharṇṇâni B °ṇṇâni brâ°. — 9. M °rishâ vi° B °peti bha°. — 10. B °r vaṭkacâ° M °câpaṁlpaṁ kṛi ° stribhi sârddha saṁ°.

11. B °bhaveyaṁ ya° BM °vrâjakâṁ° M °nirgṛihneyaṁ vadetsuḥ | ki° B °gṛihneyaṁ vadetsuḥ ki° M °shena strî nigṛihitaṁ ti ‖ . — 12. B °esho pa° BM °vrâjakâ ° gṛihneyâ° M °tato yaṁ sa ° veyaṁ vyaṁgu ° hito ti | B °hito nti | . — 14[1]. M tato ma° BM °esha sa° M °jñapto B °jñaptâ ya°. — 14[2]. BM yadâ esha(M °eva) parivrâji(M °ja)kâ parishâparishamadhye ° gṛihituṁ tato(M °tuṁ | tataḥ) mayâ | eta(M °yâ eka)sya parivrâji(M °ja)kâye ° tavyaṁ ‖ athâhaṁ etaṁ parivrâji(M °ja)kâṁ parishamadhye nigṛihneyaṁ | (M °hniyaṁ) tato° M °çishyaṁ upa°.

17. B so dâni mama pari° M °parivrâjakâ°.

एष ब्राह्मण एवं जल्पति कथं तव उत्पद्यति ॥ सा दानि आह ॥ एवं भवतूति ॥

ब्राह्मणेन एवं समयं कृत्वा प[388b]रिव्राजिकाये दण्डकं प्रगृहीतं परिव्राजिकापि तं ब्राह्मणं समज्यप्रत्यनुभाषार्थं उत्तरं प्रत्युद्धरेति । एवन्तेहि वाक्यप्रतिवाक्येहि तं दिवसं क्षपितं नैव एको एकस्य शक्नोति निग्रहीतुं नैव अपरो अपरस्य ॥ एवं यथा एकं दिवसं तथा सप्तरात्रं गच्छति । न च एको एकस्य शक्नोति निगृह्णितुं नापि अपरो अपरस्य ॥ ते मनुष्या ततो परिषातो विकाले विकाले गृहं गता सन्तो स्त्रीभिः पृच्छीयन्ति कुतो यूयं अद्य सप्तरात्रं उपादाय विकाले विकाले आगच्छथ ॥ ते आहन्सुः ॥ न जानथ कस्यार्थाय वयं विकाले आगच्छाम । दक्षिणापथातो ब्राह्मणो आगतो षडङ्गवेदपारगो सर्वशास्त्रेषु गतिंगतो वैयाकरणो अद्य सप्तमं दिवसं ताये परिव्राजिकाये सार्धं संलपति न च शक्नोति निगृह्णितुं ॥ ता दानि तेषां स्वामिकानां आहंसुः ॥ एवं पण्डितायो स्त्रीयो को पुरुषो स्त्रियं अयतो बुद्धीये च मीमांसाये ॥ तेषां मनुष्याणां भवति ॥ यदि केनचिदुपायेन सो ब्राह्मणो ताये परिव्राजिकाये परिगृह्णीयेय ततो इमा अस्माकं स्त्रियः सर्वकालं परिभवेन्सुः तृणसंज्ञां पि ता उत्पादयेन्सुः ॥ एवन्तं नगरं सर्वं योभूयेन तस्य परिव्राजकस्य योभूयेन तस्या परिव्राजिकाये अनुकूलकं संवृत्तं ॥ अपरं दिवसं परिषाये समागताये ब्राह्मणेन परिव्राजिकाये उत्तरं दिन्नं ताये च इच्छन्तिये तमुत्तरं न प्रत्यनुभाष्टं ततः जनेन हक्कारा क्षिप्ता ब्राह्मणस्य जयो परिव्राजिका निगृहीता ॥ तेन दानि ब्राह्मणेन सा परिव्राजिका त्रिदण्डं आरूपयित्वा छत्रोपानहां च गृह्णापेत्वा ततो परिषामध्यातो शिष्यधर्मेण निष्कासिता ॥ ब्राह्मणो पि परि-

1[1]. M °udyadyati ‖ . — 1[2]. BM °tûti brâ°. — 2. M °tvâ parivrâjakâye daṇḍa ° ktaṁ | parivrâjakâ pi ° B °majya pra° M °majya pratyâbhabhâvaṁ° BM °ttara pratyuddharehi | . — 3. M evaṁ tehi ° pitaṁ eko ° knoti nigṛihituṁ naivaṁ aparo parasya B °grahetuṁ | nai °sya e°. — 5[1]. M °eka di°. — 5[2]. B °gṛihnituṁ ‖ nâ° M °gṛihituṁ | nâ° BM °sya te°.

6. M °shyâ te parishâte vikâle avikâle gṛihaṁ gatâ° B °gatâ santâ stri° BM °yûyaṁ asya sa° M °ya vikâle avikâle â°. — 8[2]. M °syârthâ va ° gacchâmaḥ. — 8[3]. M °tâye çreshṭidhitâye pari° BM °rddhaṁ saṁllapati(M °ti | ) na ca° M °nigṛihnituṁ | B °knoti gṛihnituṁ | .

11[1]. M so dâ° B te dâ° M °mikân âhansuḥ | . — 11[2]. B °ṇḍitâye stri° M °ṇḍitâye striye ko ° sho striye a ° buddhiye vâ mi° B °ddhiye câ mi° BM °sâye te°. — 12[2]. M °pâyena brâ ° gṛihnîyetaṁ | tato° B °gṛihnîyeyaṁ tato° BM °imâṁ asmâ° M °rvakâle pa° B °vetsuḥ | triṇa° BM °saṁjñâpita u° B °yetsuḥ | . — 14. BM °raṁ sarva yobhûyena tasya parivrâjakâ bhûyo(B °vrâjikâ yo bhûyaḥ) na tasya parivrâjakâye akâra(M °kâla)kâ saṁvṛittâ(M °vṛitto) | . — 15. M °ṇena parivrâjakâye uttaraṁ di ° cchanti etaṁ uraṁ na pra° B °pratyubhâ° M °bhâshyaṁ | tato jane° BM °na ukkâ° M °vrâjakâ nigṛihito | .

18. M °daṇḍam ârapayi° BM °cchatropâ° B °gṛihnâpe° M °gṛihnâyetvâ ta° BM °rishamadhyâ°. — 19. M °vrâjakâye âvasatha gacchati°.

व्राजिकाये आवसथं गच्छति परोपरं च यथाभिप्रायं समागच्छन्ति ॥ अभीक्ष्णसंनिपातेन सा परिव्राजिका आपन्नसत्वसंपन्ना संवृत्ता ॥

ते दानि मथुराया निर्गम्य दक्षिणापथे जनपदचारिकां चरमाणा नवानां वा दशानां वा मासानामत्ययेन श्वेतवलाकामनुप्राप्ता तहिं श्वेतवलाकायां रात्रिं आवासिता ॥ तत्र सभायां सा परिव्राजिका प्रजाता । दारको जातो प्रासादिको दर्शनीयो परमाये शुभवर्णपुष्कलतया स[389a]मन्वागतो ॥ तेहि तस्य माणवकस्य सभाये जातो ति सभिको त्ति नाम कृतं ॥ तेहि दानि मातापितृहि सो माणवको संवर्धियति ॥ यत्र काले सो माणवको विज्ञप्राप्तो संवृत्तो ततो पि लिपिं शिक्षापितो गणनां धारणां निक्षेपणां सर्वाणि च परिव्राजकशास्त्राणि अधीयापितो वादिप्रवादी ॥ सो दानि समुद्रकुक्षिं प्रविष्टो अबुद्धे बुद्धं मार्गति । सो दानि षोडश महाजनपदानि अखन्तो वाराणसीं आगतो ऋषिपतनं मृगदावं भगवन्तमुपसंक्रान्तो ॥

अथ खलु सभिको परिव्राजको भगवता सार्धं संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां व्यतिसारयित्वा एकान्ते निषण्णो । सभिको परिव्राजको भगवन्तं प्रश्नं पृच्छे ॥

कांक्षाविचिकित्सी आगतो स्मि
प्रश्नं पृच्छितुं अभिकांक्षमाणो ।
तस्य सभिकस्य प्रश्नमेवं पृष्टं
भगवं अनुपूर्वमनुलोममनुसन्धिमनुधर्मं व्याकरोहि ॥

भगवानाह ॥

1. BM °satvá saṁ° M °vṛitto | . — 3. M °ráyáṁ ni° B °mya daṇiṇápathaṁ ja° M °pathaṁ ja° caramáṇáṁ navánáṁ vá da° BM °tavalákam a(M °kaṁ a)nu° M °prápto ta° sito | B °sitá ta°. — $5^{1}$. BM °yáṁ so pa° BM °vráji(M °ja)ká prájátá dá°. — $5^{2}$. M °játaḥ prá° máye pushkalatáye çubhavarṇṇatáyo samaṁnvá° BM °gato te°.

6. M °bháryáye játo ti sábhi° BM °konti ná°. — 7. B tehi dáni dáni má° M °dávi má° saṁvarddháyati | B °saṁvarddhayati | . — 8. B °kálaṁ so° M °kálaṁ sa máṇavako vijñáprá° BM °náṁ váraṇaṁ ni° M °kshepanaṁ sa° B °to vádipra°. — $10^{1}$. M °ddhe buddha má°. — $10^{2}$. B °janapadáni akaṇṭhato vá° M °shipattanaṁ mṛi°.

13. M °bhagavato sárddha maṁmodani° dayitvá sáropaṇiyáṁ kathaṁ vya° B °niyáṁ katháṁ saṁmodayitvá sáropaniyáṁ sáropayitvá e° BM °sharṇṇo sa°. — 14. B °vrájiko° BM °cche káṁ°.

16. B káṁkácit kiṁcit sá á° M káṁksháyicikitsá° BM °smi iti(M °ti | ) sabhiko praçnaṁ pṛicchatum abhi° M °máno B °ṇo ta°. — 18. BM °praçnaṁ me pṛishṭá || bhagavám anu(M °ván a)púrvem anulomam a(M °maṁ a)nusandhim a(B °saṁdhi a)nudha°.

दूरा सभिका तुवमागतो सि
प्रश्नं प्रष्टुमिहाभिकांक्षमाणो ।
प्रश्नान्तकरो भवामि ते हं
अनुपूर्वमनुलोममनुसंधिमनुधर्मं व्याकरिष्यामि ॥

एवमुक्ते सभियो परिव्राजको भगवन्तं गाथाये प्रत्यभाषि ॥

किंप्राप्तमाहु भिक्षुणं
सुव्रतं किं सु कथं च दान्तमाहु ।
बुद्धो ति कथं प्रवुच्चति
पृष्टो मे भगवं अनुपूर्वमनुलोमं अनुसंधिमनुधर्मं व्याकरोहि ॥

एवमुक्ते भगवां सभिकं परिव्राजकमेतदुवाच ॥

पथेन कृतेन आत्मना
अभिनिर्वाणगतो वितीर्णकांक्षो ।
विभवं च भवं च ज्ञात्व लोके
उषितवां क्षीणपुनर्भवो स भिक्षुः ॥
सर्व्वत्रउपेक्षो स्मृतिमां
न च सो हिंसति कंचि लोके ।
तीर्णो श्रमणो अनाविलो
उत्सन्नो यो न करोति आस्रवं ॥
यस्येन्द्रियाणि भावितानि

1. B °sabhikaḥ tvam âga° M °sabhikas tvam âga° BM °si praçnaṁ(M °çnâṁ) prashṭuṁ ihâ kâṁ ° ṇo pra°. — 3. BM praçnâ(M °çnâṁ)ntekaro bhavâmi(M °vâpi) te aham anupûrvem a(M °rvaṁ a)nulo° M °anudharma vyâ°. — 5. M °bhiko pa° B °shi kiṁ°.

6. BM °prâptaṁ mahâbhikshuṇâ iti sabhiko suvrato praçnaṁ | te sabhi(M °sati)ka pṛishṭo(M °shṭho) kiṁ su kathaṁ vadanti(M °nte)m âhuṁ bu°. — 8. B buddho ti su kathaṁ vuccati ‖ pṛishṭaṁ me° M buddho ti su kathaṁ pravuccati | pṛiccha me bhagavan pṛishṭo anupûrvaṁ anulo° B °vaṁ pṛishṭo anupûrva anulo° M °nusandhi anu ° roti | . — 10. M evaṁm u ° gavân sabhiko pa ° tad avocat | .

11. B yaṁ yena kṛi° M jayena kṛi° BM °tmano sabhiyo hi(M °yo bhi) bhagavâṁ(B °vaṁ) abhinirvâṇaṁ gato vistirṇṇa(M °rṇṇe)kâṁksho(M °kshâ) vi°. — 13. BM °jñâtvâ loke ushitaṁ vâ kshi° M °vo si kshu B °si | bhikshuḥ sa°. — 15. BM °pekshâṁ smṛi ° ca so arhanta ciṁki(M °nta kiṁci)lloke ti°.

17. M °rṇṇo çravaṇo° BM °tsanto yena karoti(B °ti | ) âçravaṁ(B °çramaṁ) pa°. — 19. BM paçyendriyâṇi(M °yâni) bhâ° M °rddhâ ca sarvaloke B °loke ni°.

अध्यात्मं वहिर्धा च लोके ।
निर्विध्य इमं परं च लोकं
कालं रक्षति भावितो स दान्तो ॥
कल्पानि विकीर्य केवलानि
संसारदुःखानि चतूपपातं ।
विगतमलं विरजं अनंगणं
प्राप्तं जातिक्षयन्तमाहु भिक्षुं ॥

अथ खलु [389[b]] सभिको परिव्राजको भगवतो भाषितमभिनन्दित्वा भगवन्तमेव उत्तरिं प्रश्नं पृच्छे ॥

किंप्राप्तिनमाहु ब्राह्मणं
श्रमणो किं सु कथं सुस्नातको त्ति ।
विशुद्धो नागो ति कथं प्रवुच्चति
प्रश्नं मे भगवं पृष्टो अनुपूर्वमनुलोमं अनुसन्धिमनुधर्मं व्याकरोहि ॥

एवमुक्ते भगवां सभिकं परिव्राजकमेतदुवाच ॥

वाहेत्व सर्वपापकानि
विमलो साधुसमाहितो स्थितात्मा ।
संसारमवेत्य केवलं
उषितवां क्षीणपुनर्भवो स ब्रह्मा ॥
समितावि प्रहाय पुण्यविपाकं
विरतो ज्ञात्व इमं परं च लोकं ।

2. B nividya imaṁ paṁcaraloke kâlaṁ° M °rvidya imaṁ paṁcacalokakâcaṁ raksha°. — 4. M kalpâṇi vi° B °vivikîrya ° catoyapâdaṁ | M °carâyapâdaṁ | .

6. B vigatamalajo anaṁgaṇo prâ° M vigataṁ alajaṁ anaṅgaprâ ° kshayaṁ ta° BM °m âha bhikshuṁ || . — 8. B °lu sa sabhikâ pa° M °tvâ bhagavam evam utta ° çnaṁ paripṛi°. — 10. BM °prâptenam âhu brâ(M °na âhur brâ)hmaṇo ti sabhiko çrama(M °çrava)ṇo kiṁ suḥ ka ° takonti vi°.

12. BM °thaṁ nâgo ti vuccati | pra° M °çnaṁ bha° BM °gavâṁ pṛi°. — 14. M °gavân sabhi ° jakaṁ eta°. — 15. BM vâhi(M °hiṁ)tvaṁ sarvapâpâni sabhikonti bhagavâṁ vi° B °dhumohito | sthi° M °hitaḥ | sthitânmâ B °tmâ saṁ°.

17. M saṁmâram ayatya ° shitamaya kshînapunarbhava sa hmâ B °shita te yaṁ kshîṇaṁ punarbhava | sa brahmâ sa°. — 19. M sapitâvi prabhâye pu° B °prabhâve puṇyâvi° BM °pâkaṁ nirato jñâtvâ i ° lokaṁ jñâ°.

जातीमरणं उपातिवृत्तो
श्रमणो तादि प्रवुच्चति तथत्वा ॥
विस्नापिय सर्वपापकानि
अध्यात्म बहिर्धा च सर्वलोके ।
देवमनुष्येहि कल्पितानि
कल्पं नेति पुनर् स्नातको मे ॥
अगुं न करोति किंचि लोके
सर्वयोगेहि विसृज्य बन्धनानि ।
सर्वत्र अनिश्रितो विमुक्तो
नागो तायि प्रवुच्चति तथत्वा ।

अथ खलु सभिको परिव्राजको भगवन्तमेतदुवाच ॥

किंप्राप्तिनमाहु वेदको ति
अनुविदितं किन्ति कथन्ति वीर्यवा ति ।
आजानेयो कहिन्ति नाम भोति
प्रश्नं मे भगवं पृष्टो अनुपूर्वमनुलोममनुसंधिमनुधर्मं व्याकरोहि ॥

एवमुक्ते भगवां सभिकं परिव्राजकमेतदुवाच ॥

वेदानि विचार्य केवलानि
श्रमणानां . . . . . . ।
सो सर्ववेदनासु वीतरागो
सर्ववेदनामतीत्य वेदको ति ॥

1. BM jñâtimaraṇaṁ ‖ upâdâbhivṛitto çrama( M °çrava)ṇo bhâvayi pra°. — 3. BM kiṁ snâ° M °pâpâni a° B °ni | a° BM °loke de°. — 5. BM °ni kalpa ne° M °punaḥ snâ° BM °ko me aṅge°.

7. BM aṅgena ka ° cilloke ° dhanâni sa°. — 9. BM °anisṛito(B °to | ) vimukto bhâgo tâye pra°.

12. BM °ptinâma vedako ti sabhiko anuvidenti ki° M °kathaṁ titi iyaṁ vâdî B °than titiryavâdî â°. — 14. BM °yo kâhinti(B °hiti) kâma° B °bhoti ‖ pra ° gavâṁ pṛi° M °gavân pṛishṭo° B °pûrvem anu° M °anusandhim a° B °nudharma vyâ°.

16. M evaṁm u ° gavân sabhi° B °jakaṁm e° M °vâcat ‖ . — 17. BM °lâni sabhiyatti(M °bhiyati) bhagavâṁ çrama(M °vân çrava)ṇânâṁ | . — 19. B so sacaivaṁ vedanâ° M so sarve ve° BM °su tîvrarâgo ° nâm adhîtya° M °vedako B ° ko ca abhâ°.

अभावित्व प्रपंचनामरूपं
अध्यात्मं वहिर्धा च रागभूतं ।
यो समानो रागमूले बंधनप्रमुक्तो
अनुविदितो तायि प्रवुच्चति तथत्वा ॥
यः प्रहीणबन्धनो प्रहाणवां
सर्वदुःखचयं जनेत्वा ।
नान्यान् सर्वत्र न रक्षति
विरजो वीर्यवान्प्रवुच्चति तथत्वा ॥
यस्य बन्धनानि संछत्तानि
अध्यात्म वहिर्धा च सर्वलोके ।
सर्वरागबन्धनप्रमुक्तो
आजानेयो ति तमाहु भूरिप्रज्ञा ॥

अथ खलु सभिको परिव्राजको भगवन्तं प्रश्नं पृच्छति ॥

क्षेत्रज्ञो खलु पुनर्नाम भवति
इति सभिको प्रश्नं पृच्छेत् मुनिं ।
तत्ते मुनी नाम कथं प्रवुच्चति
प्रश्नं मे भगवं पृष्टो अनुपूर्वमनुलोमं अनुसंधिमनुधर्मं व्याकरोहि ॥

एवमुक्ते भगवान् सभिकं परिव्राजकमेतदुवाच ॥

क्षेत्राणि सं[३९०]यम केवलानि
दिव्यं मानुषं यं च ब्राह्मं क्षेत्रं ।

1. B abhavitva ca námarú° M ábhavitva yantamarú ° tmaṁ ca vahirddhá° B °rddhára rogabhú° BM °taṁ yo°. — 3. B °no rágasáre baṁdhanaprayukto anunihito taye pravu° M °no rágasu evaṁ bandhana ° nuhítútaye pra° BM °ti || tathatvá ya°. — 5. BM ya prahinaba ° háṇaṁ ca sarva ° yaṁ jñáne ná°.

7. BM nárye(M °ryye)ṇa sarva° B °kshati cirajo vi ° ti | tathá tra° M °ti | tathá 'tra°. — 9. BM °bandhá(B °ndháni) saṁvṛittáni ° ke sa°.

11. BM °rvará(M °ro)galobhadoshamoha(M °ho)mánamrakshaba ° neyo(M °neya) tam áhur bhú(M °hu | bhú)riprajño || . — 13. M °jaka bha°. — 14. B kshetrejño ° bhavati | i° BM °bhiko bhagavantaṁ pra° B °çnaṁ praccha° M °pṛicchetsuḥ mu°.

16. M °muni náma kathám pravu° BM °gavám pṛi° M °lomam anu°. — 19. M ketráṇi saṁyama kabaláni || || sabhiko áha || bhagaván divyaṁ° B kshetráṇi saṁ[f° 390°]-yyama kaṁbaláni || || sabhiko áha || bhagavám di ° shaṁ paṁ ca brá° M °bráhmaṇaṁ kshe° BM °traṁ sa sa°.

स सर्वमूलक्षेत्रबन्धनात्प्रमुक्तो
क्षेत्रज्ञो तायि प्रवुच्चति तथत्वा ॥
कोशानि विचार्य केवलानि
दिव्यं मानुषं यं च ब्रह्मकोशं ।
स सर्वकोशबन्धनात्प्रमुक्तो
कुशलो तायि प्रवुच्चति तथात्वा ॥
विचार्य उभयानि प्रहीणानि
अध्यात्म बहिर्धा च शुक्लमूलं ।
कृष्णमूलमुपातिवृत्तो
पण्डितो तायि प्रवुच्चति तथात्वा ॥
सतां च असतां च ज्ञात्व धर्मं
अध्यात्म बहिर्धा च मुक्तचित्तो ।
देवमनुष्येहि पूजियो सो
संगमलमतीत्य सो मुनि ॥

अथ खलु सभिको परिव्राजको भगवन्तमेतदुवाच ॥

श्रोत्रियो . . . . . . . .
. . . . . . . . . . . . . . ।
. . . . . किं सु नाम भोति
प्रश्नं मे भगवं पृष्टो अनुपूर्वमनुलोममनुसन्धिमनुधर्मं व्याकरोहि ॥

एवमुक्ते भगवां सभिकं परिव्राजकमेतदुवाच ॥

श्रुत्वा सर्वधर्ममभिज्ञाय
सावद्यमनवद्यं च सदेवके लोके ।

1. BM °ndhanân pramu° M °kto kshatrajña tâye pra° B °tâye pra° BM °ti | tathâsmi(M °smiṁ) kle°. — 3. BM kleçâni vi ° hmakshetraṁ. — 5. BM pramukto ko(M °ke)-çabandhanât || (M °nâ) pramukto kuçila tâye ca pravu(M °ca punar u)ccati( M °ti | ) tathâsmi(M °smiṁ) tâni°.

7. BM tâni ubha° M °ṇâni âtmavahirdhyâni çu° B °laṁ u°. — 9. M upâvṛito pa° B °mûlaṁ upânivṛi° BM °ṇḍitâye(B °ye pra)vuccati | tathâtmâ asa°.

11. B asantâ ca jñâtvâ dha° M asaṁto ca jñâtvâ dha° BM °cittâ de°. — 13. BM °pûjaye so° M °saṁmaṁgala° BM °so mati || . — 15. M °bhiko bhiksho pa °tad avocat | .

16. M çrotiyeshu ca nâmo âniti kiṁ su° B çrotriyo khuttunâ mamâniti ca kiṁ su° BM °bhoti ca pra° B °gavâṁ pṛi° M °gavân pṛishṭo ° dharma vyâ°. — 20. M evaṁm u° gavân sabhi°.

21. M çrutvâ hi sa° BM °jñâya sabhikonti bhagavantaṁ sâ ° loke a°.

असमो अपरिग्रहो विशुद्धो
अनिश्रो तायि तमाहु श्रोत्रियन्ति ॥
हित्वा आलयानि आसयानि
बन्धनानि अनिवृत्तो नेति ।
गर्भशय्यं चरतो सर्वपापकेहि
आर्यो तायि प्रवुच्चति तथत्वा ॥
यो मे चरणेहि प्राप्तिप्राप्तो
सम्यगाज्ञाय उपेत्य सर्वधर्मा ।
विद्याचरणेन सो उपेतो
चरणवा तायि प्रवुच्चति तथात्मा ॥
दुःखविपाकं यदस्ति किंचिद्ध धर्मं
ऊर्ध्वं अधो तिर्यक्सदेवकस्मिं ।
परिवर्जयित्वा परिज्ञाचारी
मायं मानं च अथो पि क्रोधलोभं ।
पर्यन्तमकासि नामरूपं
तं परिव्राजकमाहु प्राप्तिप्राप्तं ॥

अथ खलु सभिको भगवतो सुभाषितमभिनन्दित्वा अनुमोदित्वा भगवन्तमिमाहि सारूप्याहि गाथाभिरभिस्तवे ॥

यानि च त्रीणि यानि च षष्टि
श्रमणप्रवादनिश्रितानि भूरिप्रज्ञ ।
संज्ञाचरसंज्ञानिश्रितानि

1. B amamo° M agamo° B °ddho anighâ tâyi tenâhu çotriyanti hi° M °yi mo tenâhu çotriyaṁ ti. — 3. M hitvâ âlepati | â° B hitvâ âlepati â° M °âsanâni bandhanâni anivarttishu neti B °ndhanâti anivarttishu neti ga°. — 5. BM garbhaçayya are(M °çaryya are)-mo sarva ° hi ariyo tâpi pra° B °ti | tathoshâṁ asatâṁ yo° M °ti tatheshâṁ asaṁtâ.

7. M yo me varaṇe ° pto saṁmya ° dharmâ B °rmâṁ vi°. — 9. M °dyâcaraṇa so° BM °to ca(B °to va)raṇe vâ tâpi pravuccati | ta° B °thâ tamâ du° M °thâtmâ.

11. BM °dharma(B °rma ûrddhaṁ) ‖ atha virya(M °ryya) sade ° smiṁ pa°. — 13. B °varjiyitvâ° BM °ri(B °ri | ) mâryamânaṁ ca adho pi° B °kroṭalâbha parya° M °lobha parya°. — 15. B °kâçi nâma kûpetaṁ ‖ pa° M °nâma kûpetaṁ pa ° m âhuḥ prâptaprâptâ ‖ B °hu ‖ prâptaprâptâ ‖.

17. M °gâthâm abhi° B °stave yâ°. — 19. M yâni ca triṇi yâni ca shashṭhi çravaṇa-pra° BM °jña saṁ°.

21. M °kshayaṁ saṁjñâ° B °ksharaṁ saṁjñâ ° virya | orâsasamâgâ anta° M °viryya orâçasamâgâ a°.

ओसरणानि वीर ओसरेसि मार्गा ॥
अन्तको सि दुःखस्य पारगो सि धर्माणां
सम्यक्संबुद्धो सि अनाश्रवो सि ।
द्युतिमां धृतिमां प्रभूतप्रज्ञो
दुःखस्यान्तकरो खु वीतरागो ॥
मुनि मौनेयपदेषु प्राप्तिप्राप्तो अकंपियो ।
अतुल्य आदित्यबन्धु विमुक्तिदो शुभव्रतो ॥
तस्य ते नागनागस्य महावीरस्य भाषतो ।
सर्वदेवतानुमोदन्ति उभौ नारदपर्वता ॥
अहं कांचितमन्वे[390b]षि तं मे व्याकार्षि चक्षुमां ।
उपयासा च ते सर्वे विध्वस्ता विनलीकृता ॥
अथा मुनि सि संबुद्धो नास्ति नीवरणानि च ।
एवं पुण्ये च पापे च उभयत्र न लिप्यसे ॥
शीतीभूतो दमप्राप्तो द्युतिमां सत्यविक्रमां ।
पादां वीर प्रसारेहि सभिको वन्दि शास्तुनो ॥

सो दानि भगवता बलवशीभावे विनीतो एहिभिक्षुकाये च प्रव्राजितो उपसंपादितो । एषा आयुष्मतो सभिकस्य प्रव्रज्या उपसंपदा भिक्षुभावो ॥

सभिकस्य वस्तु प्रश्ना च आश्रवक्षया प्रव्रज्या समाप्तं ॥

भगवां वाराणस्यां विहरे वरणाये नदीये पारे शास्ता देवानां च मनुष्याणां च विस्तरेण निदानं कृत्वा तस्या दानि वरणाये नदीये कूले महान्यग्रोधवृक्षो मूलवन्तो च स्कन्धवन्तो च शाखापत्रपलाशवन्तो च प्रासादिको प्रसादनीयो नीलो

2. B °go si | dha° M °ṇâṁ saṁmya° B °buddhesi anâçravo vi° M °si | anâçuvo vi°. — 4. BM vimucyati(M °tiṁ)mâṁ dhṛi ° prajñâ duḥkhasyântaṁkaro(M °re)shu vîtarâgo mu°.

6. BM °maunapadeshu akaṁpiyo akhilam atulya°. — 7. B °muktadaṁ çubhavratâ | M °ktidaṁ çubhavrataḥ ta°. — 8. BM °shato sa°. — 9. BM °nti obhau°. — 10. BM °haṁ rakshitam anve ° kshusho ‖.

11. BM upâdâyâsâ° M °sarva vidhvastâ vilalî° B °stâ vilarikṛi°. — 12. B addâ mu° M atha vâ mu ° buddhaṁ nânâvaraṇâ°. — 13. BM sarve(M °rva) puṇyo ca pâpâyikâ u°. — 14. BM çiti(M °ti)bhûta saprâptâ cyuti° M °kramaṁ | . — 15. M °vîna prasâdehi°.

16. M °bhâva vinito | e° BM °pravraji ° dito e°. — 17. BM esha â° M °bhâvaḥ ‖ . — 18. M iti çrîmahâvastuavadâne sabhi°. — 19. M atha bhagavân vârâ° BM °tasya dâ° M °diye kule° BM °vṛiksha mû° B °traphalâpalâ° M °diko prasamadanîyo ° megho saṁkâço B °ghasakâço ta°.

अंजनमेघसंकाशो ॥ तत्र न्यग्रोधे यदृच्छया पुरुषेण उपयाचितं तस्य च उपयाचनं समृद्धं । तेन तस्य न्यग्रोधस्य महापूजासत्कारं कृतं । तस्य दानि पुरुषस्य दृष्टानुकृतिमापद्यन्ता अपरापरे च स्त्रियो च तत्र न्यग्रोधे सत्योपयाचनं ति कृत्वा उपयाचन्ति सर्वाये वाराणसीये तं न्यग्रोधं सत्योपयाचनातो अभिज्ञातो यो च तत्र न्यग्रोधे उपयाचति तं तस्य उपयाचनं समृध्यति ।

शुभाये पूर्वचरितो स्ति कोचिद्
अयं च दैवप्रणिपातमेति ।
यदृच्छया तं पदमुपनेति
एमेवमेन्ति कुदर्शनानि ॥

वाराणस्यां च नगरे श्रेष्ठि आढ्यो महाधनो महाभोगो प्रभूतभोगो प्रभूतस्वापतेयो प्रभूतधनधान्यकोशकोष्ठागारो प्रभूतजातरूपरजतवित्तोपकरणो प्रभूतहस्त्यश्वाजगवेडको प्रभूतदासीदासकर्मकरपौरुषेयो अपुत्रो । तेन दानि पुत्राय बहूनि यष्टोपयाचितशतानि यथा मे पुत्रो भवेयाति न च भवति ॥ ताये दानि श्रेष्ठिभार्याये श्रुतं वरणाये नदीये कूले न्यग्रोधो सत्योपयाचनं तत्र यो यं याचति तस्य तं उपयाचनं समृध्यति ॥ ताये दानि श्रेष्ठिभार्याये तस्य श्रेष्ठिस्य आरोचितं । आर्यपुत्र श्रुतं मे वरणाये नदीये कूले महान्यग्रोधो सत्योपयाचनो तत्र यो यं याचति तस्य तं समृध्यति । गच्छाम तत्र [391a] न्यग्रोधे पुत्रमुपयाचेम: ॥

श्रेष्ठि सपरिवारो महर्द्धिये समृद्धिये तहिं न्यग्रोधं गतो तहिं गत्वा तस्य न्यग्रोधस्य महापूजासत्कारं कृत्वा ताये भार्याये सार्धं श्रेष्ठिना तत्र न्यग्रोधं उपयाचितं ।

1. BM °ddhaṁ te°. — 2[1]. M °tasya copayâcanaṁ samṛiddhaṁ | tena tasya nya°. — 3[1]. BM °striyâ ca tatra nyagrodhe satyo(B °tyopa)yâcanaṁ ti kṛi° siye taṁ nyagrodha (B °ḍha) satyo° M °jñâto abhijñâto yâ ca tatra° B °jñâto yâ ca tatra°.

6. B subhâse pûrvacaristâsti kiṁcid ayaṁ ca daivaṁ pra° M °ritâsti kiṁcid ayaṁ ca devaṁ pra° BM °pâtim e°. — 8. BM °taṁ param u° B °panayati | evam enti° M °panamatiṁ evam enti°. — 10. B °çreshṭi âḍhyo° M °çreshṭi âdyo mahâdhano mahâbhogo prabhûtasvâ° BM °dhânyo(M °nyâ)koçakoshṭâgâ° M °ttopakaraṇaḥ prabhûtaha° jagaḍavedâ pra° B °veḍâ pra° M °sheyâ a° BM °tro te°.

12. BM °trârthe ba° M °na ca me bhavati | . — 13. BM °çreshṭibhâ° M °diye kulena mahânya° tyopayâvanâ tatra yâtraṁ yâcayati tasya° B °sya te u° M °mṛiddhyati | . — 15. BM °ni çreshṭibhâ° B °çreshṭisya° BM °taṁ â°.

16. M °diye kule° grodhamûle satyopayâcanâ tatra yo yaṁ jâcati | tasya° B °tyopacâraṇo tatra yo yaṁ yâceti | tasya° BM °mṛiddhyati | (M °ti). — 17. M °grodha pu° cema. — 18. BM çreshṭi sapari° M °rddhiye tahiṁ nyagrodhaṁ gataḥ tahiṁ° çreshṭinâ ta° BM °tra nyagrodha(M °dhe) upa°.

इच्छाम तव मूलातो पुत्रं यदि मे पुत्रो जातो भविष्यति ततो इह देवकुलं प्रतिष्ठापयिष्यं महांतं च ते पूजासत्कारं करिष्यामीति ।

स्त्रियः समर्था पुरुषा नियोक्तुं
यो तत्र भद्रो स्त्रिय एव मूलं ।
ये चापि संग्रामहता नरेन्द्रा
तेषां प्पनयो स्त्रिय एव मूलं ॥

ताये पि श्रेष्ठिभार्याये उपयाचितं ॥ त्वं न्यग्रोध सत्ययाचनो श्रूयसि । यथा यथा ते श्रेष्ठिना देवकुलं प्रतिश्रुतं पूजासत्कारं च तथा करिष्यामि अथ मे पुत्रं न दास्यसि ततो ते मूलानि समूलकं छिन्दापयिष्यामि ॥ यन्नामा वृक्षो तन्नामा वृक्षदेवता तत्र प्रतिवसति । तत्र न्यग्रोधे न्यग्रोधो नाम देवपुत्रो प्रतिवसति ॥ सो दानि देवपुत्रो ताये श्रेष्ठिभार्याये तथा उपयाचितो समानो भीतो । अहं न कस्य चिदेर्मिनापि आच्छिन्दामि एषा च मे श्रेष्ठिभार्या एवं याचति । यदि एतस्या पुत्रो न भविष्यति परशुणा मे इमं भवनं छेदापयिष्यति ॥ तेन न्यग्रोधेन देवपुत्रेण शक्रो देवानामिन्द्रो अधीष्टो । अहं कौशिक नैव कस्यचिदेर्मिनापि आच्छिन्दामि मम श्रेष्ठिना भवने पूजासत्कारं कृत्वा एवं चोपयाचितं तदिच्छामि तथा क्रियमाणं यथा तस्य वाराणसीयस्य श्रेष्ठिस्य पुत्रो भवेय मा मे तं भवनं छिंदेया ॥ सो दानि देवपुत्रो शक्रेण देवानामिन्द्रेणाश्वासितो । मा भाहि तथा करिष्यामि यथा तस्य पुत्रो भविष्यति तव भवनं न च्छिन्दिष्यति ॥

1. BM °di se putro jâ(M °tro yâ)to bhavishyati ‖ tato i ° hâm̃ ca te pû°. — 3. BM striyaḥ(M °yo) samasamarthâ bhavanti purushâṇi vuktam̃ so tatra bhadrastriyayevam̃(M °striyam eva) mû°. — 5. BM °grâmam̃ mahatâ ca narendrâ(M °ndro) te ° striyam eva mû°.

7[1]. BM °çreshṭibhâryâye upajâci° B °tam̃ tvam̃°. — 7[2]. BM °no çruyati | . — 7[3]. BM yato ya(B °to pa)thâto çreshṭinâ° M °rishyati ‖ atha te putram̃ ° te mûlanâri sa° BM °yishyâmaḥ | . — 9. M yam̃nâmo vṛiksho tam̃nâmo tatra vṛiddho vṛikshade° B yannâmâ tatra vṛiddho vṛikshade° BM °tra pravisati | . — 10. M tatra nyagrodhasya nyagrodho nâ°.

11[1]. BM °çreshṭibhâryâ(M °ryâm̃)ye° B °bhîto a° M °bhîto 'ham̃°. — 11[2]. B °cid acchindâma e° M °cid acchindâmi mama çreshṭibhâryâ esho ca me e° B °çreshṭibhâ°. — 12. BM °etasya pu° B °vishyati caçvaryeṇa me° M °vishyati aiçvaryyeṇa me° B °nam̃ cchadâ°. — 13. B °adhishṭo | M °adhishṭho | . — 14. M °naivam̃ kasyacid acchi° B °pi acchim̃dâmi° BM °mama çreshṭinâ bhavane pu° M °evam̃ vopayâcitam̃ | tad icchâmi tam̃thâ kriyamânam̃ yathâ° B °kriyamânam̃ tathâ° M °ṇasim̃ tasya çreshṭisya pu° B °çreshṭisya pu ° cchidyayâ ‖ M °cchindeya | .

17[1]. BM °sito mâ°. — 17[2]. BM °shyâmi | ya° M °nam̃ | cchi° B °nam̃ na cchim̃dishyati | .

तहिं दानि त्रयस्त्रिंशभवने अपरो देवपुत्रो कृतपुण्यो महेशाख्यो महर्द्धिको महानुभावो कृताधिकारो पुरिमकेहि सम्यक्संबुद्धेहि परिपक्वकुशलमूलो आसंनभूतो निर्वाणस्य एकजन्मप्रतिबद्धो च्यवनधर्मो त्रयस्त्रिंशेषु देवनिकायेषु । सो शक्रेण देवानामिन्द्रेण वुच्यति । त्वं च्यवनधर्मो यं च ते च्यवनधर्मनिमित्तानि प्रादुर्भूतानि च्यविष्यसि उपपद्यिष्यसि ततो च वाराणस्यां श्रेष्ठिस्य भार्याये कुक्षिस्मिं उपपद्याहि ॥ सो दानि देवपुत्रो [391ᵇ] शक्रं देवानामिन्द्रमाह ॥ ममाभिप्रायो मनुष्येषूपपद्यित्वा बुद्धस्य भगवतो शासने प्रव्रजिष्यामि प्रव्रजित्वा च दुःखस्यान्तं करिष्यामि । ततो न शक्यं तत्र श्रेष्ठिकुले उपपद्यितुं यत्कारणं श्रेष्ठिकुलो वा प्रमोदकरो अन्तरायकरो कुशलानां धर्माणां अन्यत्राहं अत्र मध्यमे कुले उपपद्यामि । तदहं यथासुखं अविघ्नेन भगवतो शासने प्रव्रजित्वा दुःखस्यान्तं करिष्यामि ॥ शक्रो तमाह ॥ प्रणिधेहि तुवं तत्र श्रेष्ठिकुले चित्तं उपपत्तीये अहं तथा करिष्यं यथा तुवं ततः श्रेष्ठिकुलातो अभिनिष्क्रमित्वा भगवतो शासने प्रव्रजिष्यसि ॥ तेन देवपुत्रेण शक्रस्य देवानामिन्द्रस्य वचनेन तत्र वाराणसीयं ओकस्य श्रेष्ठिस्य कुले चित्तं प्रणिहितं । सो दानि त्रयस्त्रिंशेषु देवनिकायेषु च्यवित्वा वाराणसीयं श्रेष्ठिभार्याये कुक्षिस्मिं उपपन्नो कालेन समयेन नवानां वा दशानां वा मासानामत्ययेन सा श्रेष्ठिभार्या प्रजाता ॥

ताये दारको जातो प्रासादिको दर्शनीयो अक्षुद्रावकाशो परमाये वर्णपुष्कलताये समन्वागतो जातमात्रस्य च श्रेष्ठिना रमणीयानि जातकर्माणि क्रियन्ति

1. M °rddhiko maheçâkhyo mahânu° purimakasya sam̃myaksam̃buddhasya pari° B °purimake samya° M °mûla âsannabhû° B °lo âçam̃nabhû° BM °ekajatmapra° dharmâ tra° shu so°. — 3. M °çakro de° B °devâm indre° BM °ṇa budhyati tvam̃°. — 4. BM tvam̃ cyavanadharmâ(M °rmmâ) yam̃° M °prâdubhûtâni tataḥ cyavishyasi | tato° B °dyishyasi | tato° BM °çreshṭisya° B °smim̃ upapadyohi | .

6¹. BM °putrâ ça° M °ndram âham̃ | . — 6². M °prâyam̃ manushyeshûpapayitvâ bu° BM °ne pravrajishyâmi | pra°. — 8. M tataḥ na° BM °kyam̃(B °kyam̃ | )tatra çreshṭikule upapadyitum̃(M °dyatum̃ | ) yatkâra(B °tkâla)nam(M °ṇam̃) çreshṭiku(M °kule) vâ pramo(M °prasâ)da° M °rmâṇâ anya° dhyamakule u°. — 10. M °khasyâkam̃ kari°.

11¹. M °kro âha || . — 11². BM °dhehi(M °dhemi) tuvam̃ tatra çreshṭikule ci° M °upapattishye aham̃° BM °shyam̃ | yathâ tuvam̃ tataḥ(M °tato) çreshṭikulâ°. — 13. M tena na devapu° BM °çreshṭisya ku°. — 14. BM °siyam̃ çreshṭibhâryâ(B °ryâye) kukshi° M °nno | tena kâlena tena samayena navânâm̃ mâsânâ° BM °tyayena sâ(B °so) çreshṭibhâ° jâtâ to°.

17. B to | ye dâ° M toye dârako jâtaḥ prâ° shkaratâye samatvâgato° BM °çreshṭinâ ramaṇiyâni jâta(B °tam̃)karmâṇi(M °rmâni) kriyanti çrama(M °nti | çrava)ṇabrâ° M °niyakeshu° nnapânasya khâjyabho° BM °çrâṇiyati(M °ti | ) tailapraṇâlîyâ(M °ṇâlikâ) ca pra° B °nti | ghṛitapaṇâlîyâ ca pâ° M °ghṛitapraṇâlîyâ ca sa° B °lîyâ ca sa°.

श्रमणब्राह्मणेषु कृपणवनीपकेषु अन्यस्य च जनकायस्य अन्नपानखाद्यभोज्यगन्धमाल्यविलेपनं विश्राणीयति तैलप्रणालीयो च प्रवाहीयन्ति घृतप्रणालीयो च पानप्रणालीयो च ॥ सप्ताहस्यात्ययेन दैवज्ञब्राह्मणपरिषा शब्दापिता दारकस्य नामं करोथ ॥ तेहि तस्य दारकस्य नामं करोन्तेहि तस्य दारकस्य यशोदो ति नामं कृतं ॥ ते दानि ब्राह्मणा तेन खादनीयभोजनीयेन संतर्पयित्वा संप्रवारयित्वा हिरण्यसुवर्णस्य उत्संगशतानि दत्त्वा विसर्जिता ॥ यशोदस्य चत्वारि धात्रीयो उपस्थापिताः । एका उद्वर्तेति च स्नापेति च अपरा स्तनं पायेति अपरा उच्चारप्रस्रावमपकर्षति अपरा अंकेन धारेति ॥ एवं यशोदो कुमारो यथा उत्पलं वा पदुमं वा पुण्डरीकं वा एवं संवर्धीयति ॥ यथोक्तं भगवता ।

कृतपुण्या हि वर्धन्ति न्यग्रोधो व सुभूमियं ।
अनु[392a]पच्छको विय द्रुमो न अल्पपुण्यो विरुह्यति ॥

यदा कुमारो विज्ञप्राप्तो संजातो तदा लिपिं शिक्षितो निक्षेपणं धारणं व्यवहारं च । त्रीणि चास्य पितरेण प्रासादानि कारापितानि हैमन्तिको ग्रैष्मिको वार्षिको षष्टिं च स्त्रीसहस्राणि अन्तःपुरं उपस्थापितं ॥ तेहि च प्रासादेहि यन्त्रमन्त्रयुक्तानि सोपानानि कारापितानि पंचहि पुरुषशतेहि अल्लीपियन्ति च अपनीयन्ति च तेहि सोपानेहि अल्लीपियन्तेहि च अपनीयन्तेहि च अर्धयोजनं शब्दं गच्छति ॥

द्वितीयकुलिको व्यवहारेण पूर्वदेशं गत्वा आगतो । तस्य दानि श्रेष्ठिना दूतं

3. BM °tyayena dârakasya brâhmaṇasya abhijñâ çabdâ° B °rothe | . — 4. M te dâni tasya dârakasya nâmaṁ karotha | tehi tasya dârakasya yaço° B °ntehi | ta ° taṁ te°. — 5. B °khâdaniyo bho° M °khâdanîyena bhojaniyena santarpa° B °saṁtapayi ° tsaṁgaḥ dentiti datvâ vi° M °tsaṁgo dadantiti | datvâ visarjjitâḥ ya°.

6. M yaçodo tasya datta catvâri dhâtriye u° B yaçodattasya catvâ ° triye u° M °pitâ e°. — 7. M eko udva° BM °peti ca aparâ staṁ(B °ste)naṁ pâyeti(M °ti ca) aparâ uccâraprâçâ(M °çrâ)vam a° M °râ aṅgena dhârayati | . — 8. M evaṁ dâni yaço° B °çodâ ku° BM °tparaṁ vâ padu° M °rddhishyanti ‖ . — 9. BM °tâ kṛi°. — 10. M °puṇyo hi° BM °grodhe va°.

11. BM jâto anu(fol. 392a)pacchako° M °drumâ na alpapuṇyâni virûhyanti | B °hyanti | . — 12. B °piṁ çekshi ° paṇaṁ taṁ dhâ° M °panan taṁ dhâraṇaṁ vyavahâryya | tâṁ yeshu ca trî° B °hâryeshu ca trî°. — 13. B °shashṭiṁ ca strî° M °shashṭhiṁ ca strî° puram upa° B °taṁ te°. — 14. B °dehi yantrayantrayuktânâni sopanâni kâ° M °ktâni sopânâni kârâpitâni tâni paṁ ° shaçatehi allipiyanti | apanîyaṁti ca tehi sopânehi ca apanîyanti ca allipiyanti arddha° B °shaçatehi allipiyanti ca apanîyanti ca te° M °gacchanti | .

18[1]. B dvitîye ku° M dvitîye kulake vya°. — 18[2]. BM °çreshṭinâ°.

प्रेषितं । आगच्छ मम पुत्रस्यानुभावं पश्यहीति ॥ सो दानि कुलिको श्रेष्ठिस्य सकाशं आगतो ॥ श्रेष्ठिना सो द्वितीयकुलिको एकपर्यंके उपविशापितो । कुमारो पि यशोदो शब्दापितो । सो पितुश्च द्वितीयकुलिकस्य चाभिवन्दनं कृत्वा तत्रैव पर्यंके उपविशापितो । इमे सर्वे त्रयो एकपर्यंके उपविष्टा ॥ राज्ञा श्रेष्ठिस्य दूतो प्रेषितो । अस्ति राजकार्यो सत्वरो शीघ्रमागच्छेसि ॥ श्रेष्ठि द्वितीयकुलिकस्याह ॥ आस त्वं कुमारेण सह अहं याव राजकुलातो आगच्छामि ॥ श्रेष्ठि राजकुलं गतो द्वितीयकुलिको च गृहपति यशोदेन कुमारेण सार्धं आसति ॥

सो दानि तस्य यशोदस्य श्रेष्ठिपुत्रस्य तां सम्पत्तिं दृष्ट्वा एतदभूषि । न खल्वयं घरावासो वा इच्छितव्यो यस्येदृशो उपभोगपरिभोगो । निःसंशयं अयं कुमारो बुद्धप्रत्येकबुद्धेषु श्रावकमहेशाख्येषु च कृताधिकारो इच्छितव्यो दिन्नसर्वाकारो वासितवासनो कृतपूर्वयोगो असाधारणो अवरुप्तकुशलमूलो । सचेत्सो कुमारो बुद्धं भगवन्तं देवातिदेवं पश्येय अथ महतार्थेन संयुज्येय ॥ गृहपति आह ॥ कुमार सर्वं खलु यौवनं जरापर्यवसानं सर्वं आरोग्यं व्याधिपर्यवसानं सर्वं जीवितं मरणपर्यवसानं सर्वा संपत्ति विपत्तिपर्यवसाना सर्वेहि प्रियेहि मनापेहि नानाभावं विनाभावं विप्रयोगं चिराद्वाचिराद्वा पितुं पि एतं वा जहिष्यसि एतं वा भवं जहिष्यसि । किं नु खलु ते कुमार भगवां दृष्टो ॥ कुमारो आह ॥ कीदृशो भगवां ॥ गृहपति आह ॥ कुमार देवा[392b]तिदेवो भगवां तथागतो र्हं सम्यक्संबुद्धो

1[2]. BM °çreshṭisya° B °sakaçaṁ° BM °to çre°. — 2[1]. B çreshṭinâ ço dvi° M çreshṭino | so dvitîyo ku ° ekaparyyake°. — 2[2]. B °vito so°. — 3. M so pito so pitu ° sya nâbhi ° traivaṁ paryyake u° B °ryaṁko u°. — 4[1] M ime so ca tra° B °sarvaṁ tra° M °ekaparyyakaṁ upavishṭho ‖ B °vishye | . — 4[2]. M râjâ çreshṭiyasya° B °çreshṭisya° M °dûto a°. — 5[1]. B °satputro çî° M °satputro çîghraṁ âga° B °gacchasi | . — 5[2]. BM çreshṭi dvi°.

6. M âsu caṁ ku° B °ha | ahaṁ yâ ca kumâro râ° M °yâvad râja°. — 7. BM çreshṭi râ ° dena ca ku°. — 8[1]. BM °çreshṭipu° B °shi na°. — 8[2]. B °khalv evaṁ yovâso° M °khalv eyaṁ yovâso ° ço upabhoga niḥ° B °go niḥ°. — 9. BM °mâro buddhe pra° B °çrâkamahe° M °dinno sarvakâravâsitasano° B °nnasarvakâro vâsitasanâ kṛi° M °ṇo anava ° lamulo B °lo sa°.

11. M sacet sa ku ° ntaṁ devântidevaṁ paçyeye | anyâ maha° B °çyeyaṁ ‖ a.yâ mahatârthona saṁ° M °saṁpûjyeyaṁ ‖ B °jyeyaṁ ‖ . — 12[2]. M kumâra sarve kha ° jarâparyyavasânaṁ sarvam ârogyaṁ vyâdhiparyyavasânaṁ sarvam ârogyaṁ sarvâ sampatti °ryyavasâno sarve° B °saṁpatti vipattiparyavasâne | sarve ° yogaṁ cirâd vâ kâlâd vâ pi pituṁ ° etâ vâ bhava jahishyasi | M °yogaṁ virâd vâ cid vâ kâlâd vâ pi pituṁ pi etaṁ vo jayishyasi | etâ vo bhava jahishyasi.

16[1]. B kiṁ tu kha° M kin tu kha ° dṛishṭyo ‖ . — 16[2]. B °âha ‖ ku°(l. 17[2]). — 16[3]. M kidṛi ° vân gṛiha°. — 17[2]. M kumâra devântideva bha ° gato 'haṁ saṁmya° BM °dvâtriṁçatihi mahâpurushalakshaṇehi samanvâgato açî(B °çitihi mahâpurushalakshaṇehi samatvâgato açî)tihi anuvyaṁ° B °çobhitehi çarîro ashṭâdaçehi âvenikehi bu° M °vâṁ

विद्याचरणसंपन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतो अशीतिहि अनुव्यंजनेहि उपशोभितशरीरो अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतो दशहि तथागतबलेहि बलवां चतुर्वैशारद्येहि सुविशारदो प्रासादिको प्रसादनीयो शान्तेन्द्रियो शान्तमानसो उत्तमदमशमथपारमिप्राप्तः नागो यथा कारितकारणो अन्तर्गतेहि इन्द्रियेहि अबहिर्गतेन मनस्थितेन धर्मताप्राप्तेन गुप्तो नागो जितेन्द्रियो ह्रदमिवाच्छो अनाविलो विप्रसन्नो रत्नयूपं वा समुद्गतो सुवर्णयूपं वा प्रभासति तेजोराशि वा श्रिरीया देदीप्यमानो असेचनको अप्रतिकूलो दर्शनाये इहैव वाराणस्यां विहरति च नद्या वरणाय पारिमे तीरे मुक्तो मुक्तपरिवारो शान्तो शान्तपरिवारो दान्तो दान्तपरिवारो ब्राह्मणो ब्राह्मणपरिवारो श्रोत्रियो श्रोत्रियपरिवारो स्नातको स्नातकपरिवारो वेदको वेदकपरिवारो पारगो पारगपरिवारो स्थलगतो स्थलगतपरिवारो सर्वाकुशलधर्मप्रहीणो सर्वकुशलधर्मसमन्वागतो अभिभू अनभिभूतो आज्ञातार्थदर्शी वशी वशवर्ती देवमनुष्याणां अर्थचर्यां चरति ॥

एवं गृहपतिना द्वितीयकुलिकेन यशोदस्य कुमारस्य पुरतो बुद्धस्य वर्णं भाषितं । कुमारो च यशोदो पूर्वयोगसंपन्नो चरमभविको ॥ तस्य दानि भगवतो दर्शनकामता उदपासि कामेषु चास्य जुगुप्सना उत्पन्ना योनिशो मनसिकारो निष्क्रम्ये चैवं चित्तं प्रस्कन्दति संतिष्ठति प्रसीदति ॥ सो दानि रात्रीये अर्धरात्रीसमये प्रतिबुद्धो पश्यति तमन्तःपुरं ओसुप्तं काचिद्वीणामुपगुह्य काचि तूणं काचित्सुघोषकां काचित् नकुलं काचिद्वेणुं काचित् महतीं काचिद्वादिशं काचिद्विकूटकं काचिद् भ्रमरिकां काचिदेकादशिकां काचित् मृदंगं काचिदालिंगिकां काचित्पणवं काचि दर्दुरं काचित्परस्परस्य अंशे बाहां कृत्वा काचिद् हनु[393a]कां गृह्य

catuhi vai° BM °diko prasada° M °uttamaçamathapâramiprâpto nâgo yathâ° BM °tnayûsham̃ (M °yûtham̃) vâ samudgato(M °taḥ) suvarṇṇayûsham̃(M °yûtham̃) vâ prabhâsati | tejorâçi (B °çim̃) vâ çiriyo(M °ya) dedîpyamânam̃ asecanako apratikû(M °ku)lo ° syâm̃ viharati ca bhavyâ varaṇâ(M °bharaṇâyâ) pârime ti° M °ktaparivâro çânto çântaparivâro brâhmaṇo brâhmaṇaparivâro çrotiyo çrotiyaparivâro snâtako snâ° B °go pâragaparivâro sthalagato sthalagatoparivâro || sarvâ° M °rvân kuçaladharmapra° BM °nvâgato abhikhûto ana° M °jñânârthidarçâ va vaçavartti°.

14. M °ddhasya kumârasya purato buddhasya va°. — 15[1]. B kumârasya ca° M °yogasampanno°. — 15[2]. M °udupâsi° B °câsya jogustanâ utpa° M °tpanno yoni manasikâra nishkramyaivam̃° B °ço manasikâra nishkramye ca nam̃ ci° BM °ttam̃ praskam̃dati santi(M °sam̃ti)sthṭha°.

17. M °rddhrâtresmim̃ samaye° B °çyati ca tantaḥ° M °vinân upagṛhya kâcit sughosham̃ kâcin naku° B °guhya kâci trâṇam̃ kâcit su° M °t mahatim̃ kâcid vâ° d bhramaṇikâ kâcid e° BM °çikâ kâcit mṛidam̃gam̃(M °daṅgam̃) kâcid alim̃gikâ kâcit pa° M °ram̃ kâcin puruspa-rasya aṅge bâ° B °sya am̃çe bâ° M °tvâ kâcid bhanukâm̃° BM °sâm̃cillolâ° M °gharanti | .

कासांचिन्नग्नका चरति ॥ कुमारस्य तं दृष्ट्वा विकृतमन्तःपुरं श्मशानसंज्ञा उत्पन्ना अभिनिष्क्रमितुकामो च भगवतो सन्तिके अगारादनगारियं प्रव्रजिष्यामीति ॥

शक्रो देवानामिन्द्रो अनन्तकेहि देवशतसहस्रेहि परिवृतो गन्धमाल्यमादाय आगतो । देवपुत्रेहि सोपाना अल्लीपिता यशोदे च पश्चिमे सोपानके पादतला निक्षिपित्वा देवेहि दिव्यं कुसुमवर्षं ओसृष्टं श्रेष्ठिकुले दिव्यानां कुसुमानां जानुमात्रं ओघं संवृत्तं ॥ कुमारो देवशतसहस्रेण संवृतो वाराणसीतो नगरातो निर्गम्य येन भगवांस्तेनोपसंक्रमे ॥ भगवता प्रभा प्रमुक्ता ॥ अद्राक्षीद्यशोदो कुलपुत्रो भगवन्तं वरणाये नदीये पारे असेचनकं अप्रतिकूलं दर्शनाये दृष्ट्वा भगवन्तं मणिपादुकेषु उत्तरित्वा भगवन्तं गाथाये अध्यभाषि ॥

उपद्रुतो स्मि श्रमण उपद्रुतो स्मि मारिष ॥

भगवानाह ॥ एहि कुमार मा भायाहि इदन्तमनुपद्रुतं इमस्मिं धर्मे स्वाख्याते वीतरागो भविष्यसि ॥

अथ खलु यशोदो श्रेष्ठिपुत्रो येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा एकान्तनिषण्णः ॥ तस्य यशोदस्य श्रेष्ठिपुत्रस्य भगवां प्रसादनीयां कथां कथे । तद्यथा दानकथां शीलकथां स्वर्गकथां पुण्यकथां पुण्यविपाककथां ॥ अभिप्रसादेसि यशोदो श्रेष्ठिपुत्रो भगवतो सन्तिके चित्तमभिप्रसन्नः ॥ तस्य पुनर्यशोदस्य श्रेष्ठिपुत्रस्य भगवां चत्वार्यार्यसत्यानि प्रकाशयति । दुःखं आर्यसत्यमाचिक्षति देशयति प्रज्ञापयति विवरति विभजति उत्तानीकरोति प्रकाशयति । दुःखसमुदयमार्यसत्यं । दुःखनिरोधं दुःखनिरोधगामिनीप्रतिपदार्यसत्यं आ-

1. M °kṛitaṁm antaḥ ° tpanno abhinishkramituṁ | kámá ca bha°. — 3. B °dâya gato de°. — 4. BM °trehi sopâdâná(M °náṁ) alli ° çodena paçci(M °na ca pacchi)mena ca sopánakasya páda° M °pitváni de° BM °jaṁ kusumaṁ varshaṁ osṛishṭaṁ(M °shṭáṁ) çreshṭikule° M °numátre o° B °ttaṁ ku°.

6. M °hasraṁ saṁvṛitto vá° B °sreṇaṁ vṛitto váránasí° M °gavánsteno ° kramitvá. — 7[1]. B bhagavato prabhá° M °gavato prabhá muktáḥ B °mukto | . — 7[2]. M °tro bhagavaṁntaṁ varaṇá° B °pratishkúlaṁ° M °pratikulaṁ° BM °pádakeshu° M °tháye 'dhya°. — 10. BM upadruto smiṁ çrama(M °çrava)ṇa° B °to smiṁ má° M °rishaḥ ‖.

11[2]. M °ra ma bhá° M °ra ma bháhi idan taṁ anu°. — 13. BM °çreshṭiputro° M °yena bhagavánsteno ° gavato pá ° sharṇṇo | B °sharṇṇas tasya°. — 15. BM tadyathá ‖ dá° B °çilaka svarga° M °rgakatháṁ puṇyakatháṁ puṇyakatháṁ puṇyavi°.

16[1]. BM °bhiprásádehi ‖ yaçodá çreshṭipu ° sannas tasya°. — 16[2]. M °punaḥ yaço° BM °çreshipu ° gavá(M °váṁ) cchutvá°. — 17. B °cikshiti de° M °cikshishyati de ° jñápayati prastháрayati viva° B °ttánikaro°. — 19[1]. M °mudayán áryya°. — 19[2]. BM °yávan pra°.

क्षिपति यावत् प्रकाशयति ॥ अथ खलु यशोदो श्रेष्ठिपुत्रो तत्रैवासने निषण्णो तिस्रो भिक्षा षडभिज्ञा बलवशीभावं साक्षीकरोति अनेकविधां ऋद्धिं प्रत्यनुभवति ॥

अथ खलु यशोदस्य श्रेष्ठिपुत्रस्य मातापितरौ तस्यैव रात्र्या अत्ययेन यशोदं श्रेष्ठिपुत्रं अपश्यन्तौ अश्रुकण्ठा रुदन्मुखा महाज्ञातिस्कन्धस्य परिवृता बहूहि प्राणसहस्रेहि सार्धं [393b] वाराणसीतो निर्यात्वा येन भगवांस्तेनोपसंक्रमे यशोदं श्रेष्ठिपुत्रं अन्वेषन्ता । अद्राक्षीत् यशोदस्य श्रेष्ठिपुत्रस्य मातापितरौ नदीये वरणाये तीरे यशोदस्य मणिपादुकानि दृष्ट्वा च पुनः यशोदस्य मणिपादुकानि गृह्य मुखेन परिचुम्बेन्सुः रोदेन्सुः क्रन्देन्सुः शोचेन्सुः परिदेवेन्सुः ॥ रोदित्वा क्रन्दित्वा शोचित्वा परिदेवित्वा येन भगवांस्तेनोपसंक्रमित्वा भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेतदुवाच ॥ अद्राक्षीद्भगवां यशोदं श्रेष्ठिपुत्रं ॥ यशोदो श्रेष्ठिपुत्रो तथारूपां चेतोसमाधिं समापद्ये यथा नं तत्रैव निषण्णस्य मातापितरौ नाद्दृशेन्सुः न च अन्यो जनकायः ॥ अथ खलु भगवां यशोदस्य श्रेष्ठिपुत्रस्य मातापितरं आमन्त्रयति ॥ निषीदथ गृहपते । स्थानमेतं विद्यति यशोदं श्रेष्ठिपुत्रं पश्यथ दृष्ट्वा च पुनः यशोदे श्रेष्ठिपुत्रे चित्तं प्रसादेथ ॥ अथ खलु यशोदस्य श्रेष्ठिपुत्रस्य मातापितरौ भगवतो पादौ शिरसा वन्दित्वा एकमन्ते निषीदेन्सुः अन्यो च जनकायो ॥ अथ खलु भगवां यशोदं श्रेष्ठिपुत्रं मनसाध्यभाषे । ऋद्धिप्रातिहार्यं विदर्शेहि ॥

अथ खलु यशोदो श्रेष्ठिपुत्रो तालमात्रं वैहायसे संस्थितो अनेकविधं ऋद्धिप्रातिहार्यं विदर्शयन्तो सो एको पि भूत्वा बहवो भवति बहुधापि भूत्वा एको भवति

1. BM °çreshṭipu° B °sharṇṇo | tisro° M °sharṇṇo tisro ° bhijño bala° BM °nekavidhaṁ ṛiddhi pra° B °bhavati a°. — 4. BM °lu yaçodasya çreshṭiputra° M °daṁ çreshṭiṁ putraṁ sarveshâṁ tân adrâ° (*l.* 7) B °daṁ çreshṭiputraṁ apraçya ° nmukhi mahâ ° hûni prâ ° saṁkrâme ‖ yaço° B °daṁ çreshṭiputraṁ sarveshân tâ adrâ°.

7. BM °kshit | yaçodasya çreshṭiputra° M °tire yaçodasya maṇipâdukâni gṛi° BM °khe ca paricuṁbetsuḥ rodetsuḥ krande(M °kraṁde)tsuḥ çocetsuḥ paridevetsuḥ ro°. — 9. M °yena bhagavan teno ° mitvâ bhagavato pâ°.

11[1]. BM °çreshṭiputraṁ tathârû°. — 11[2]. M °dye | yathâ yaṁ tatraivaṁ ni° BM °sharṇṇasya° BM °dṛiçetsuḥ(B °tsuḥ ‖ ) anyo° M °kâyo | . — 13. M °gavân yaço° BM °ntrayati ni°. — 14[2]. BM °daṁ çreshṭiputraṁ° M °çreshṭiputro ci° B °çodo çreshṭiputro manasâ° (*l.* 17) M °prasideya ‖ . — 15. M °çreshṭipu ° nsuḥ anye ca janakâye | .

17[1]. M °çreshṭipu° B °sâ adhyeshe ṛi° M °bhâshaṁ | . — 19. BM °çreshṭiputro ° vaihâyasaṁ saṁsthi° M °nto saikâpi bhûtvâ bahavo bhavanti | bahu° B °vo bhavanti bahudho pi bhûtvâ e° M °âvibhâvan tirobhâvan tirokudyan tirauçailan tiroparva° B °rbhâvan tirokudyaṁ tiloçai°.

आविर्भावं तिरोकुड्यं तिरोशैलं तिरोपर्वतेषु असज्जमानो गच्छति । इमम्पि च पृथिवीयं उन्मज्जननिमज्जनं करोति । सय्यथापि नाम उदके पि अभिद्यमानो गच्छति तद्यथापि नाम पृथिवीयं । इमावपि चन्द्रसूर्यौ एवंमहर्द्धिका एवंमहानुभावौ पर्यङ्केन निषण्णः पाणिना परिमार्जति परामृषति यावद्ब्रह्मलोकं कायेन वशे वर्तेति । विविधानि च यमकानि प्रातिहार्याणि करोति हेष्टिमं कायं प्रज्वलति उपरिमातो कायातो शीतस्य वारिस्य पंच धाराशतानि स्रवन्ति उपरिमो कायो प्रज्वलति हेष्टिमातो कायातो शीतस्य वारिस्य पंच धाराशतानि स्रवन्ति वामो पार्श्वो ज्वलति दक्षिणातो पार्श्वातो शीतस्य वारिस्य पंच धाराशतानि स्रवन्ति दक्षिणो पार्श्वो ज्वलति वामातो पार्श्वातो शीतस्य वारिस्य पंच धाराशतानि स्रवन्ति ॥

अथ खलु यशोदो श्रेष्ठिपुत्रो नीलांजनवर्णं रूपमात्मानं ऋद्धीये अभिनिर्मिणित्वा पुरस्तिमायां दि[394*]शायामन्तरहायति पश्चिमायां दिशायां प्रादुर्भवति पश्चिमायां दिशायां अन्तरहायति पुरस्तिमायां दिशायां प्रादुर्भवति दक्षिणायां दिशायां अन्तरहायति उत्तरायां दिशायां प्रादुर्भवति उत्तरायां दिशायां अन्तरहायति दक्षिणायां दिशायां प्रादुर्भवति ॥ अथ खलु यशोदो श्रेष्ठिपुत्रो सिंहमृगराजमात्मानमृद्धिये अभिनिर्मिणित्वा दाठी बलवां केशरी त्रिखुत्तं सिंहनादं नदित्वा पुरस्तिमायां दिशायां अन्तरहायति पश्चिमायां प्रादुर्भवति पश्चिमायां दिशायामन्तर्हायति पुरस्तिमायां दिशायां प्रादुर्भवति दक्षिणातो

1. B °yaṁ utsajjati majjanaṁ° M °yaṁ ujjamati majjanaṁ°. — 2. BM °dyamânâ gacchati ‖ ta° M °nâma ithi° BM °yaṁ i°. — 3. B °sûryo evaṁ maha° M °bhâvâ paryyakena nisharṇṇo pâ° B °nishaṇṇeḥ pâṇinâ parimâjjati parâ° M °yâvacca brahma ° kâyena ca çobhateti | B °yena vaço vartteti | . — 5. M °uparimâtro kâ ° uparimo kâyo prajvalite heshṭimâtro kâ ° tâni çrava° B °nti | vâmo pârçve jva° M °vâ me pârçve çîtasya° dakshiṇe pârçve jva° B °lati | vâmâto pârçvâto paṁca°.

11. BM °çreshṭiputro° M °lâṁjana risha° B °rṇṇaṁ risha° B °rmiṇî vâ ° antarahâyati | pa° M °çcimâyâṁ diçâyâm aṁtarahâyati | dakshiṇâyâṁ diçâyâṁ prâdurbhavati | paçcimâyâṁ diçâyâm antarhâyati° B °hâyati | purastimâyâṁ diçâyâṁ prâdurbhavati | dakshiṇâyâṁ diçâyâṁ antarahâyati | uttarâyâṁ diçâyâṁ prâdurbhavati | uttarâyâṁ diçâyâṁ antarahâyati | da° M *omet* prâdurbhavati uttarâyâṁ diçâyâṁ B °kshiṇâyaṁ di° M °ṇâyâṁ prâ°. — 15. BM °çreshṭiputro° M °tmânam ṛiddhiye° BM °rmiṇi(M °ṇî)tvâ dâṭi balâṁ keçarî ṭrikshustaṁ(M °çarîṁ trishkṛityaṁ) siṁhanâdaṁ nanditvâ purastimâyâṁ diçâyâṁ antarahâyati | (M °çâyâm antahâyimi) paçci ° çcimâyâṁ diçâ(B °çâyâṁ)m antarahâyati (B °ntarhâyati | ) pu ° çâyâṁ prâdurbhavati | dakshiṇâto antarhito uttarâto(M °râyâṁ) prâdurbhavati | uttarâto antarhi(M °ntahi)to dakshiṇâyâṁ prâdurbhavati | bhûmyâm antahi(M °myâm antarhi)to antarikshe prâdurbhavati | antari°.

अन्तर्हितो उत्तरातो प्रादुर्भवति उत्तरातो अन्तर्हितो दक्षिणायां प्रादुर्भवति भूम्यामन्तर्हितो अन्तरीक्षे प्रादुर्भवति अन्तरीक्षे अन्तर्हितो धरण्यां प्रादुर्भवति ॥ अथ खलु यशोदो श्रेष्ठिपुत्रो सर्वश्वेतं हस्तिनागमात्मानं ऋद्धिये अभिनिर्मिणित्वा षड्डन्तं इन्द्रगोपशीर्षं सप्ताङ्गसुप्रतिष्ठितं कुमुदवर्णं पुरस्तिमायां दिशायामन्तर्हितो पश्चिमायां प्रादुर्भवति पश्चिमायां अन्तर्हितो पुरस्तिमायां प्रादुर्भूतः दक्षिणातो अन्तर्हितो उत्तरायां प्रादुर्भूतः उत्तरायामन्तर्हितो दक्षिणायां प्रादुर्भूतः भूम्यामन्तर्हितो अन्तरीक्षे प्रादुर्भूतः अन्तरीक्षे अन्तर्हितो भूम्यां प्रादुर्भवति ॥ अथ खलु यशोदो कुलपुत्रो चक्रवर्तिवेषमात्मानमभिनिर्मिणित्वा सप्तरत्नसमन्वागतं चतुरङ्गेन बलकायेन संपरिवृतो पुरस्तिमायां दिशायां अन्तर्हितो पश्चिमायां प्रादुर्भूतः पश्चिमायामन्तर्हितो पुरस्तिमायां प्रादुर्भूतो दक्षिणायामन्तर्हितः उत्तरायां प्रादुर्भूतो उत्तरायां अन्तर्हितः दक्षिणायां प्रादुर्भूतो भूम्यामन्तर्हितो अन्तरीक्षे प्रादुर्भूतः अन्तरीक्षे अन्तर्हितो भूम्यां प्रादुर्भूतः ॥

अथ खलु यशोदो कुलपुत्रो तालमात्रं अन्तरीक्षे गच्छति पि तिष्ठति पि निषीदति पि शेय्यमपि कल्पयति परितपति पि परिभ्रमति पि । तद्यथापि ग्रीष्माणां पश्चिमे मासे संघट्टका नाम वाता वायन्ति एवमेव यशोदो श्रेष्ठिपुत्रो तालमात्रं वैहायसमन्तरीक्षे गच्छति पि तिष्ठति पि निषीदति पि शेय्यमपि कल्पयति परितपति परिभ्रमति पि । एकतालातो द्वितालातो स्थितो ए[394b]को भूत्वा बहुधा भवति बहुधा भूत्वा एको भवति । यथा प्रथमे परिवर्तके तथा कर्तव्यं यावत्सप्त-

3. BM °çreshṭiputro ° stinágam̃m á(M °gam̃ á)tmánam̃ ṛiddhi(M °ddhi)ye abhinirmiṇi-(M °ṇi)tvá shaḍḍanta indra° M °gopakaçirsho saptáṅgasupratisthitam̃° BM °rṇṇam̃ purastimáyám̃ diçáyám̃ antarhi(B °ntahi)to paçcimáyám̃ prádurbhavati | paçcimáyám̃ a(M °yám̃m a)ntarhito purastimáyá pradurbhútaḥ(M °rbhúto |) dakshiṇáto antarhito utta ° ttaráyám antarhi(B °ntahi)to dakshiṇáyám̃ prádubhútaḥ bhúmyá(B °myám a)ntarhito antari(M °rikshe) prádurbhútaḥ(M °taḥ | ) antari° M °kshe prádurbhúto bhúmyám̃ prádurbhúto bhavati.

7. B °kravarttive° M °rttiveçam átmá ° rmiṇitvá sapta ° ṅgena barakáye° BM °vṛito purastimáyám̃(B °stimenam̃) diçáyám̃ antarhito(M °rhitá) paçci ° çcimáyám antarhi-(B °ntahi)to purastimáyám̃(B °yá) prádurbhúto(M °rbhútaḥ) dakshiṇáyám̃ antarhitaḥ (M °rhito) uttaráyám̃ prádurbhúto(M °rbhútaḥ | ) uttaráyám̃ a(M °yám a)ntarhitaḥ(M °rhito) dakshiṇáyám̃ prádurbhúto(M °rbhútaḥ | ) bhúmyám antarhitá(B °ntahito) antari°.

13. M °tro táramátram̃°. — 14. M °ṭṭaká nám̃ma váto váyanti | e° B °ṭṭaká náma parvatá váyanti evam ena yaço° BM °çreshṭipu° B °bhramati e°.

17. M °sthitaḥ eko bhú°. — 18. M °rivarttate tathá ° t saptatálam̃ saptatálam̃ saptatáláto shaḍṭálam̃ shaḍṭáláto pam̃catále sthitaḥ pam̃catáláto catustáláto tritálasthito tri° B °saptatáláto shaṭṭálam̃ shaṭṭáláto pam̃ ° pam̃catáláto catu ° tustáláto tritálasthito tritáláto dvitále shṭito dvi ° dharaṇyá sthito | .

तालं सप्ततालातो षट्ताले षट्तालातो पंचताले स्थितो पंचतालातो चतुस्ताले चतुस्तालातो त्रिताले स्थितो त्रितालातो द्विताले स्थितो द्वितालातो एकताले स्थितो एकतालातो धरण्यां स्थितो एको पि भूत्वा बहुधा भवति बहुधापि भूत्वा एको भवति ॥ इति आविर्भावं तिरोकुड्यं तिरोशैलं तिरोपर्वतेषु असज्जमानो गच्छति इमस्मिं पृथिवीयं उन्मज्जति निमज्जति । धरणीतो अभ्युद्गम्य गच्छति पि तिष्ठति पि निषीदति पि शय्यामपि कल्पयति परितपति परिश्रमति पि ॥

अथ खलु अन्यतीर्थिकचरकपरिव्राजका वैदण्डिकमानन्दिकगुरुपुत्रकगौतमधर्मचिन्तिकवृद्धश्रावकतृतीया उलूकपक्षिकभगिनी श्रमणा यशोदस्य श्रेष्ठिपुत्रस्य इमानि एवंरूपाणि विविधानि विचित्राणि ऋद्धिप्रातिहार्याणि दृष्ट्वाश्चर्याद्भुतसंविग्नसंहृष्टरोमजाता अभूंसुः यावत्स्वाख्यातो भगवतो गौतमस्य धर्मविनयो विवृतो दण्डच्छिन्नपिलोतिको अलं अलंकाराय अलं प्रसादाय यत्र हि नाम गृहीतो अवदातवसनो काशिकशुचिवस्त्रधरो चन्दनानुलिप्तकगात्रो अंगदी कुण्डली एवमेवरूपं धर्मं साक्षीकरोति ॥

अथ खलु भगवां ताये वेलाये यशोदं श्रेष्ठिपुत्रं आरभ्य इममुदानमुदानये ॥

न मुण्डभावो न जटा न पंको
नानासनं स्थण्डिलशायिका वा ।
रजोजल्लं वोत्कुटुकप्रहाणं
दुःखप्रमोक्षं न हि तेन भोति ॥
अलंकृतो वापि चरेय धर्मं
क्षान्तो दान्तो नियतो ब्रह्मचारी ।
सर्वेहि भूतेहि निधाय दण्डं
सो ब्राह्मणो सो श्रमणो स भिक्षुः ॥

4. BM °âvibhâvaṁ ti(M °van ti)robhâvaṁ tiroku° M °kudyan tiroçai° B °kudyaṁ tiroçailyaṁ tiropa°. — 5. B °dati ça° M °dati çeyyâm a° B °lpayati | patita°.

7. M °khalu anyatîrthikacanakaparivrâjakâ te daṇḍi° B °vrâjakâ trodaṇḍi° BM °trakagauttamadharmaci° B °ddhaçrâkatṛi ° kshibhagini çravaṇâ° M °gini çravaṇâ° B °çreshṭipu° M °çreshṭiputrakasya imâni evaṁrûpâni vividhâ ° shṭaromajâto abhûnsuḥ | yâvat svâ° BM °gauttamasya° B °rmavinaye vivṛi° BM °lohitiko haṁ arthikarmâya(M °kamârya) alaṁ prasâ(B °pramâ)dâya yatra° B °gṛihîtâ a° M °dâtaçca vasano ° tro aṅgadî kuṇḍala e° BM °dharma sâ°.

14. M °gavân tâye ve° BM °çreshṭipu° M °imam uḍânaye ‖. — 15. B °paṁkâ nânâsanâ thaṇḍilaçâyinâ vâ ra° M °paṁkâ nânâsanârthadiraçâyino kâ°.

17. M kâlayâjalaṁ vo utkutukaprahâ° B °laṁ vo utku ° tena bhavati a° M °tena bhavati | . — 19. M °dharmakshonto dâ°.

21. B °hmaṇaçra° M °hmaṇaçravaṇo sa°.

अथ खलु भगवां यशोदस्य मातापितॄणां तस्य च जनकायस्य प्रसादनीयां कथां कथये । तद्यथा दानकथां शीलकथां स्वर्गकथां पुण्यकथां पुण्यविपाककथां । अभिप्रसादयन्ति यशोदस्य मातापितरौ भगवतो सन्तिके चित्तं तं च महाजनकायं अभिप्रसन्नचित्तो ॥ भगवां यशोदस्य मातापितॄणां तस्य च महतो जनकायस्य चत्वार्यार्यसत्यानि प्रकाशयति दुःखं दुःखसमुदयं दुःखनिरोधं दुःखनिरोधमार्गं ॥ अथ खलु यशोदस्य श्रेष्ठि[395a]पुत्रस्य मातापितॄणां तेष्वेवासनेषु निषण्णानां विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं बहूनां च प्राणिसहस्राणां अधिगता च धर्मा ॥ ते पुनर्यशोदस्य श्रेष्ठिपुत्रस्य मातापितरौ भगवन्तमेतदवोचत् ॥ प्रव्राजेहि भगवं यशोदं श्रेष्ठिपुत्रं उपसंपादेहि सुगत यशोदं श्रेष्ठिपुत्रं ॥ अथ खलु भगवां एहिभिक्षुकाये आभाषे । एहि भिक्षु चर तथागते ब्रह्मचर्यं ॥

अथ खलु यशोदस्य श्रेष्ठिपुत्रस्य भगवता एहिभिक्षुकाये आभाष्टस्य यत्किंचिद्गृहिलिंगं गृहिगुप्तं गृहिध्वजं गृहिकल्पं सर्वमन्तरहाये त्रिचीवरं चास्य प्रादुर्भवित्सुंभकं च कंसपात्रं प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथो चास्य संस्थिहे तद्यथा नाम वर्षशतोपसंपन्नस्य भिक्षुस्य । एषा आयुष्मतो यशोदस्य श्रेष्ठिपुत्रस्य प्रव्रज्या उपसंपदा भिक्षुभावो ॥

समाप्तं यशोदस्य श्रेष्ठिपुत्रस्य वस्तुं ॥

भिक्षू भगवन्तमाहन्सुः ॥ कस्य भगवन् कर्मस्य विपाकेन यशोदो श्रेष्ठिपुत्रो आढ्यो महाधनो महाभोगो श्रेष्ठिकुले उपपन्नो क्षिप्राधिगमो च गृहस्थभूतेनैव बलवशीभावं प्राप्तं ॥ भगवानाह ॥ एतस्यैव भिक्षवो यशोदस्य श्रेष्ठिपुत्रस्य पूर्वप्रणिधानं ॥

1. M °çodasya çreshṭiputrasya mâ°. — 2[1]. BM tadyathâ ‖ dâ° BM °vipâ(B °pâka)kathâm̃ abhi°. — 2[2]. B °sâdayanti | yaço° M °gavato bhagavato santike cittam̃ ca ma° BM °tto bha°. — 4. BM °çayati | duḥkasamudayam̃ duḥkhanirodhamârgam̃ ‖.

6. BM °çreshṭipu° B °ṇâm̃ teshvavâ° M °sharṇṇânâm̃° B °sharṇṇânâm̃ vigatam̃ vigatamalam̃° BM °hûṇâm̃ ca prâ° B °srâṇi a° M °srâṇâ a° BM °rmâ ca pu°. — 8[1]. B ca puna° M ca punaḥ yaço° BM °çreshṭipu° M °pita bha°. — 8[2]. BM pravrajahi bhagavâm̃ yaçodam̃ çreshṭiputram̃ u° B °sugatam̃ yaço° BM °çreshṭipu°. — 9. M °she | ehi bhikshu caratha tathâ°.

11. BM °trasya bhagavato e° B °âbhâshṭhasya yat kim̃° BM °d gṛihalim̃gam̃ gṛihi(B °gṛiha)gu° M °lpam̃ ayam anta° BM °rbhavetsuḥ sum̃bhakam̃° B °ca kam̃ ca pâtram̃° M °svabhâvam̃ sam̃sthitâ ca keçâ iryyâpathe câ° B °çâ iryâ °sthihe | tadyathâ | nâ ° kshusya e°. — 14. BM °çreshṭipu° M °kshurbhâvaḥ ‖.

16. M iti çrimahâvastuavadâne yaço° BM °çreshṭipu° M °stum̃ samâptam̃ ‖. — 17[1]. M bhirkshu bha ° hatsuḥ ‖. — 17[2]. B °bhagava karma° BM °do çreshṭipu° M °âdyo mahâdha° BM °çreshṭiku° M °dhigato ca gṛi°. — 19[2]. B °syaicaiva bhi° M °syaisha evam̃ bhi° BM °çreshṭipu°.

भूतपूर्वं भिक्षवो इहैव वाराणस्यां नगरे क्षीणकुलपुत्रो अभूषि कृच्छ्रवृत्तिको दरिद्रो परकर्मेण वृत्तिं कल्पयति बुद्धानां चानुत्पादाय प्रत्येकबुद्धा लोके उत्पद्यन्ति बुद्धानामन्तरा दक्षिणीया तूष्णीकशोभना एकचरा खड्गविषाणकल्पा एकमात्मानं दमेन्ति परिनिर्वापयन्ति दक्षिणीया पुण्यक्षेत्रा ॥ ततो भद्रिको नाम प्रत्येकबुद्धो ऋषिपतनातो कल्यस्यैव निवासयित्वा पात्रचीवरमादाय नातिकाले नातिविकाले समये प्रातराशे वर्तमाने वाराणस्यां नगरे पिण्डाय प्रविष्टो सुसंवृतो कायेन सुसंवृतो वाचाय सुसंवृतो मनेन सूपस्थितकाय स्मृतिये समाहितो एकाग्रचित्तो सुसंवृतेन्द्रियो ॥

सो दानि वाराणसीनगरे पिण्डाय चरन्तो तेन क्षीणकुलपुत्रेण पुरुषेण दृष्टो । प्रासादिकाभिप्रसन्ना देवमनुष्या तस्य क्षीणकुलपुत्रस्य पुरुषस्य । भद्रिकं प्रत्येकबुद्धं दृष्ट्वा अतीव मनं [395a] प्रसन्नं प्रसन्नचित्तेन गृहं प्रवेशेत्वा गृहे आहारेण प्रतिमानितो एवं चानेन प्रणिधानमुत्पादितं यं एदृशे दक्षिणीये अधिकारं कृत्वा कुशलमूलं मा कांचिद्दुर्गतिं वा विनिपातं वा गच्छेयं मा वा कदाचिद्दरिद्रेषु कुलेषूपपद्येयं आढ्येषु महाधनेषु महाभोगेषु कुलेषूपपद्येयं ॥ सो दानि भद्रिको प्रत्येकबुद्धो इममेवरूपं प्रणिधानं विदित्वा हंसराजा विय वैहायसेन प्रक्रान्तो ॥ सो दानि पुरुषो तं भद्रिकं प्रत्येकबुद्धं वैहायसेन हंसराजा विय विक्रमन्तं दृष्ट्वा च तस्य प्रत्येकबुद्धस्य स्पृहयन्तो भूयो प्रसन्नचित्तो प्रणिधानमुत्पादेति । एतेषां धर्माणां लाभी भवेयं येषामेष प्रव्रजितो धर्माणां लाभी ॥

भगवानाह ॥ एष भिक्षवः यशोदो श्रेष्ठिपुत्रो तेन कालेन तेन समयेन इह वा-

1. M °pûrva bhikshavaḥ i° B °kshînaku° M °shi | kṛicchravṛishṭiko ° ṇa vṛishṭim̃ kalpa° BM °nâm̃ câ(M °nâm̃ vâ)nupâdâye pratye ° dyanti(M °dyati) | buddhânâm antaro dakshiṇeyo tû° B °ekavarâ kha° M °lpâ | ekam ânmânam̃ dameti parini° B °tmânam̃ dayenti paninirvâ ° ṇyakshatrâ | . — 4. M tataḥ bhadrikâ nâma pratye° B °buddhâ ṛi° M °ṛishipatanâto kâlyasyai° B °danâto kâlasyai° BM °dâya nânyâtikâle nâtivikâle samaye(B °same) prâtarâsam̃ vartta° B °shṭo susam̃vṛitâ kâye° M °shṭo susam̃vṛito vâvâya susam̃vṛito manena supasthi° BM °smṛitisamâ° B °tto susam̃vṛittendriyo || .

9. M °râṇasyâm̃ naga ° kshînaku° BM °shṭo prâ°. — 10[1]. B °diko bhipra° M °sanno de° BM °shasya bha°. — 10[2]. B °nam̃ prasanne citte ° tvâ griham̃ âhâre° M °tvâ griham âhâre ° tpâditam̃ yam edṛi ° kshiṇoyam̃ adhi° B °ṇeyam̃ adhikâram̃ kṛi° M °mûla mâ kaçci durga° BM °dreshu kuleshu papadyam̃ âdye(B °shûpapadyevam̃ âḍhye)shu mahâdha°.

14. B °jâ visha vai°.

16. M °ddham̃ vihâyasena ham̃sarâjâ viya vaihâyasena viya vikra ° spṛihayam̃to bhû°. — 17. BM eteshâm̃ dharmâṇâm̃ lâbhi(B °bhi) bhaveyam̃ teshâm e(M °shâm̃m e)sha pra° M °rmâlâṇâ lâbhi || . — 19[2]. M °kshavo yaço° BM °çreshṭiputro te° M °samaye i°.

राणस्यां नगरे श्रेष्ठिकुलपुत्रो अभूषि । यं सो तत्र प्रत्येकबुद्धे अधिकारं कृत्वा प्रणिधानमुत्पादितं तस्य कर्मस्य विपाकेन तदुपादाय न कदाचिद्दुर्गतिविनिपातेषूपपन्नो मनुष्येषु च्युतो देवेषु देवमहेशाख्यो उपपन्नो देवेषु च्युतो मनुष्यमहेशाख्यो उपपन्नो इहैव च नं पश्चिमे जन्मे तथागतं आरागेत्वा बलवशीभावं प्राप्तो ॥

यशोदजातकं समाप्तं ॥

भगवान्सम्यक्संबुद्धो यदर्थं समुदागतो तमर्थं अभिसंभावयित्वा वाराणस्यां विहरति ऋषिवदने मृगदावे । तत्र खलु भगवां आयुष्मन्तां पंचकां भद्रवर्गीयानामन्त्रयति ॥ मुक्तो हं भिक्षवः सर्वपाशेहि ये दिव्या ये च मानुषा । चरथ भिक्षवः चारिकां मा च दुवे एकेन अगमित्थ ॥ सन्ति हि भिक्षवः सत्वाः शुद्धा अल्परजा अपरोक्षजातिका ते च अश्रवणत्वाद्धर्माणां परिहायन्ति । अहं पि गंसि येन उरुविल्वायां सेनापतिग्रामकं जटिलानामनुकंपाय ॥

अथ खलु मारस्य पापिष्ठस्यैतदभूषि ॥ अयं खु श्रमणो गौतमो वाराणस्यां विहरति ऋषिवदने मृगदावे सो पंचकां भद्रवर्गिकां भिक्षूनामन्त्रयति मुक्तो हं भिक्षवः सर्वपाशेहि ये दिव्या ये च मानुषा यूयमपि भिक्षवः मुक्ताः सर्वपाशेहि ये दिव्या ये च मानुषाः चरथ भिक्षवः चारिकां मा च एकेन दुवे अगमि[396a]त्थ सन्ति भिक्षवः सत्वा अल्परजा अपरोक्षजातिका अश्रवणत्वाद्धर्माणां परिहायन्ति अहं पि गंसि येन उरुविल्वायां सेनपतिग्रामकं जटिलानामनुकंपाय यं नूनाहं उप-

1. BM yo so° M °buddho adhi ° kena tadupâyena kaçci durgatavinipâteshupapannâ ma° heçâkhyeshupapanno deveshu cyuto ma ° papannâ iha vanam̃ paçci° B °shyeshu cyu ° cyuto manukhyo mahe ° haiva vanam̃ paçcime jatme tathâ° M °ârâdhetvâ ba° B °prâptam̃ ‖ . — 5. M iti çrimahâvastuavadâne yaço°.

6. M bhagavân sam̃mya° B °to tadartham̃° M °shipattane mṛi° B °dâve ta°. — 7. M °gavân âyushmantânâm̃ pam̃cakâ bhadra° B °shmantam̃ pam̃° M °rgiyâm âma°. — 8[1]. M °kshavo sa° B °vyâ ye ye ca mânushâ ca° M °shâ yûyam̃ api bhikshavo muktâ sarvapâçehi ye divyâ ye ca mânushâ ye ca°. — 8[2]. M ye cara bhi° B carati bhi° BM °rikâ mâ(M °mo) ca du° B °kena âgamittha sam̃° M °kena agamirshya. — 9. B sam̃sthihi bhi° M °bhikshavo satvâḥ° B °lparajo aparokshajâtika tvâya açra° M °rokshajâtiko açravaṇatvâ dharmâ° BM °hâyati a°. — 10. M aham̃ game ‖ yena uluvi° B °gam̃se | ye ° lvâyam̃ senâ° BM °grâmakâ ja° M °ṭilonâ°.

12[1]. BM °pâpisthasyai°. — 12[2]. M °khu çravaṇo çauttamo° BM °syâm̃ viharati | ṛi° M °shipattane mṛi ° ve ‖ so pam̃cakâ bhadra° BM °bhikshuṇâm âmantrayati ‖ mukto ° shâ(M °shâye) | yû° M °vyâ ye mânushâḥ ° kâm̃ mâ cara ekena duve agamishyam̃ | santi bhi° B °ttha | santi bhi° M °vaḥ satvâ çuddhâ alpa ° jâtiko açravaṇatvâ dharmâṇâm̃° BM °hâyati | aham̃ pi gam̃se yena uru(B °ulu)vilvâ° M °grâmikam̃ jaṭilonâm anukam̃pâye ‖ yam̃ nû° B °nukam̃pâya ‖ yam̃ nû° M °rmâye ‖ .

संक्रमेयं विचक्षुकर्माय ॥ अथ खलु मारो पापीमां भगवन्तं गाथाये ध्यभाषे ॥

अमुक्तो मन्यसे मुक्तो किं तु मुक्तो ति मन्यसि ।
गाढबंधनबद्धो सि न मे श्रमण मोक्ष्यसि ॥

अथ खलु भगवां मारं पापीमं गाथाये प्रत्यभाषे ॥

मुक्तो हं सर्वपाशेहि ये दिव्या ये च मानुषा ।
एवं जानाहि पापीमं निहतो त्वमसि अन्तक ॥

अथ खलु मारो पापीमां जानाति खलु मे श्रमणो गौतमो त्ति दुःखी दुर्मनो विप्रतिसारी तत्रैव अन्तरहाये । इत्यमेतं श्रूयति ॥

भगवान्सम्यक्संबुद्धो यदर्थं समुदागतो तमर्थं अभिसंभावयित्वा वाराणस्यां विहरति ऋषिवदने मृगदावे शास्ता देवानां च मनुष्याणां च । अथ खलु भगवतो एकस्य रहोगतस्य प्रतिसंलीनस्य अयमेवंरूपो चेतसः परिवितर्को उदपासि । कामा अनित्यदुःखविपरिणामधर्मा ॥ अथ खलु मारस्य पापीयस एतदभूषि ॥ अयं श्रमणो गौतमो वाराणस्यां विहरति ऋषिवदने मृगदावे तस्यैकस्य रहोगतस्य प्रतिसंलीनस्य अयमेव चेतसः परिवितर्को उदपासि कामा अनित्यदुःखविपरिणामधर्मा यं नूनाहं उपसंक्रमेयं विचक्षुकर्माय ॥ अथ खलु मारो पापीमां येन भगवान्स्तेनोपसंक्रमित्वा भगवन्तं गाथाये ध्यभाषे ॥

दृढो नाम मया पाशो चरति मानसं तव ।
तेन त्वां बन्धयिष्यामि न मे श्रमण मोक्ष्यसि ॥

1. M °thâye 'dhya°. — 2. BM °se mukto kiṁ tu(M °kim tu) mukto si ma°. — 3. M gâḍhabandha ° çravaṇa° BM °mokshasi ‖. — 4. M °gavân mâ ° pimâṁ gâ°. — 5. M °vyâ hi ca mânushâḥ e°.

6. M °piyaṁ ni ° ntako ‖ B °ntakaṁ ‖. — 7. M °çravaṇo gauttamonti duḥkhi durma° B °monti duḥ° M °traivântarhito B °hâye e°. — 8. B ettha° M itham evaṁ çrû° B °taṁ çruyati ‖. — 9. M bhagavâṁ samya° B bhagavân saṁmya° M °to tam arthaṁm abhi° B °bhisaṁvâdayi° BM °ti | ṛishi°. — 10. M °ekaraho ° m evarû ° udupâsi.

11. M kâmâ parivitarka ani° B °dharmâ a° M °dharmaḥ ‖. — 12. M °pimâṁ saita°. — 13. M °çravaṇo gauttamo ° ṛishipattane mṛi° B °linasya ayam evaç cetasaḥ paritarko udapâyi | kâ° M °cetaso parivittarko udupâsi | kâmo ani° B °nityaduḥkhâ vipariṇâmadharmo yaṁ nû° M °dharmo ‖ atha khalu mâro pâpimâṁ yaṁ nû ° vicakshuḥka°. — 15. M °thâye 'dhyabhâshaḥ ‖.

17. M dṛidho nâma mayo pâṇo carati mânase B °mânasa te |. — 18. BM na tvaṁ va(M °vu)ccayishyâ° M °çravaṇa mokshasi ‖.

अथ खलु भगवां मारं पापीमं गाथाये प्रत्यभाषे ॥

पंचकामगुणो लोके मनः षष्ठं प्रवेदितं ।
तत्र मे विगतो छन्दो विध्वस्तो विनलीकृतो ।
एवं जानाहि पापीमं निहतो त्वमसि अन्तक ॥

अथ खलु मारस्य पापीयस एतदभूषि । जानाति खलु मे श्रमणो गौतमो ति । दुःखी दुर्मनो विप्रतिसारी तत्रैवान्तरहायि । एत्यं एतं श्रूयति ॥

भगवान्सम्यक्संबुद्धो यदर्थं समुदागतो तमर्थमभिसंभावयित्वा वाराणस्यां विहरति ऋषिवदने मृगदावे ॥ अथ खलु भगवतो एकस्य रहोगतस्य प्रतिसंलीनस्य अयमेव चेतसो परिवितर्को उदपासि [396b] उपधिरनित्यो दुःखो विपरिणामधर्मो ति ॥ अथ खलु मारस्य पापीयस एतदभूषि ॥ श्रमणो गौतमो वाराणस्यां विहरति ऋषिवदने मृगदावे एकस्य रहोगतस्य प्रतिसंलीनस्य अयमेवरूपो चेतसः परिवितर्को उदपासि उपधिरनित्यो दुःखो विपरिणामधर्मो ति यं नूनाहं उपसंक्रमेयं विचक्षुकर्माय ॥ अथ खलु मारो पापीमां येन भगवांस्तेनोपसंक्रमित्वा भगवन्तं गाथाये ध्यभाषे ॥

नन्दति पुत्रेहि पुत्रिमां
गोमिको गोहि तथैव नन्दति ।
उपधीहि नन्दति जनो
न हि सो नन्दति यो निरुपधि ॥

1. M °gavân mâraṁ pâpi gâ°. — 2. M °guṇopeto manaḥ° BM °shashṭhâ pravedità | . — 3. B °sto virali° M °sto vilalîkṛitâḥ | . — 4. M °jânâmi pâ ° hata tva° BM °antakaḥ | . — 5[1]. M °piyasyaita°. — 5[2]. M jânâmi kha ° çravaṇo gauttamo ti B °mo ti duḥ°.

6[1]. M duḥkhi du° B °hâyi e°. — 6[2]. BM °taṁ çruya°. — 7. B bhagavân saṁmya° M °ksaṁbodhi ya° BM °harati ‖ ṛi°. — 8. M °ekatya raho° B °cetasa parivitarko udupâsi upadhi° M °rko udupâsi | upadhi° BM °duḥkhâ vipari° M °dharmeti ‖ . — 10[1]. M °pimaṁ etad a°. — 10[2]. M çravaṇo gauttamo° B °harati | ṛi° M °ṛishipattane mṛi ° ekarasya raho ° pratisaṁlayanasya ayam evarûpaç cetasa parivitarka udupâsi upadhi° B °rko udupâsi | upadhi° BM °rmo ti | yaṁ nû°.

13. BM °pimaṁ(M °pimî) yena bhagavâṁste(M °vânate)no° M °gavaṁta gâthâye adhya° B °she na°. — 15. B nandati | putre° BM °mâṁ gopiko gopî(M °pi)hi ta ° ndati u°.

17. B upadhîti(M °pavîthi) nandati ja° M °rupadhiḥ | .

अथ खलु भगवां मारं पापीमं गाथाये प्रत्यभाषे ॥

सोचति पुत्रेहि पुत्रिमां
गोमिको गोहि तथैव सोचति ।
उपधीहि जनो प्रबाधितो
न हि शोचति यो निरुपधिः ॥

अथ खलु मारो पापीमां जानाति मां श्रमणो गौतमो ति दुःखी दुर्मनो विप्रतिसारी तत्रैवान्तरहाये । इत्यमेतं श्रूयति ॥

सुविमलविमलस्य निर्मलस्य शुचिस्य
भगवतो ऽमलवर्णो कीर्तितो गौतमस्य ।
तमरहितं प्रदिशं सर्वसत्वान देति
सर्वजगतः क्रियाभिर्निर्वृतिं प्रापुणेति ॥

भिक्षू भगवन्तमाहन्सुः ॥ कथं भगवानुदानं भाषति ॥

यस्मिं न माया वसति न मानं
यो वीतरागो अनिघो निरासो ।
प्रनुन्नक्रोधो अभिनिर्वृतात्मा
सो ब्राह्मणो स श्रमणो स भिक्षुः ॥

अस्माभिरपि भगवन् कथं पिण्डाय चरितव्यं भवति भिक्षां देहीति ॥ भगवानाह ॥ न होति तूष्णीभूतेन उद्देशेन स्थातव्यं । एवमार्याणां याचनं ॥

भूतपूर्वं भिक्षवो अतीतमध्वाने इहैव वाराणस्यां नगरे राजपुत्रस्य अश्विसेनो नाम पुरोहितपुत्रो वयस्यो । सो कामेषु आदीनवं दृष्ट्वा परिव्राजकप्रव्रज्यां प्रव-

1. M °bhagân mâ° BM °mâro yaṁ viditvâ mâraṁ pâ° B °bhâsho so°. — 2. BM soceti putre ° mâṁ gopibhis tathaiva ca socati | (M °ti) u°. — 4. M upadhihi janâ prabodhitâ na hi° B °janâ praçodhito ° rupedhiḥ ‖ .

6. M °çravaṇo gauttamo ti duḥkhi daumanâ tatrairvânta° B °rmano tatrai° BM °hâye i°. — 7. BM °taṁ çruya°. — 8. M suvimalavimalasya çu° BM °gavato mâyâvarṇṇo° B °gauttasya | M °gauttamasya. — 10. B tam ahasito pra° M tam ahasitasya pra° BM °desi sarvajagatakṛitsnâbhir nirvṛitiṁ(M °ttiṁ) prâ°.

12[1]. M bhiksho bha ° m âhaṁsuḥ ‖ B °hatsuḥ ‖ . — 12[2]. B kaṁ bha°. — 13. BM yasmiṁ gayâyâṁ vasati ta mânaṁ°. — 15. BM pratanukrodho(M °dhe) a° M °rvṛitâtma so° B °hmaṇo 'çra° M °hmaṇe açravaṇo sa bhikshuḥ.

17[1]. BM °gavân kathaṁ°. — 19. M °titam adhyânaṁ i° BM °sya so°. — 20. M °jitaḥ kau ° pathe samâdâ° B °dânavartti°.

जितो कौमारब्रह्मचारी दशकुशलपथसमादायवर्ती वेदपारगो परिव्राजकशास्त्रेषु गतिंगतो ॥ सो दानि राजपुत्रो राज्यप्राप्तो सो तं अखिसेनं पुरोहितपुत्रं गाथाये अध्यभाषे ॥

नैव द्विषन्ति सप्रज्ञा अखिसेन वनीपकं ।
ब्रह्मचारि प्रियो मे सि याचे ब्रह्मे यदिच्छसि ॥

अथ खलु भिक्षवो अखिसेनो वनीपको गाथाये प्रत्यभाषे ॥

याचेन्तो अप्रियो भवति अदेन्तो भवति अप्रियो ।
तस्माद्भवन्तं न याचामि मा मे विद्वेषणा भवेत् ॥

अथ खलु भिक्षवः स काशिराजा अखिसेनं वनीपकं गाथाये प्रत्यभा[397a]षे ॥

यो हि याचनको सन्तो याचितव्यं न याचति ।
परं च पुण्यं त्याजेति आत्मना च विहन्यति ॥

अथ खलु भिक्षवः अखिसेनो वनीपको तं काशिराजं प्रत्यभाषे ॥

याचनां रोदनमाहु अदानं प्रतिरोदनं ।
तस्माद्भवन्तं न याचामि मा मे आरोदनं भवेत् ॥
न वै याचति सप्रज्ञो नार्यो वेदितुमर्हति ।
उद्देश आर्या तिष्ठन्ति एषा आर्याण याचना ॥

अथ खलु भिक्षवः स काशिराजा अखिसेनं वनीपकं गाथाये प्रत्यभाषे ॥

ददामि ते ब्राह्मण रोहिणीनां
पूर्णं सहस्रं सह पुङ्गवेन ।

4. M naivam̃ visha ° jñâ adhisenam̃ va° B °jñâ sasthisenam̃ va° BM °kam̃ bra°. — 5. BM °cári(M °ri) priyá me si yâci brahme° M °yadicchasi | .

6. M °seno purohitaputro tam̃ kâçirâjam̃ gâ° B °nîpakam̃ gâ°. — 8. M °d bhavanto yâcemi° B °vantam̃ yâcâ°. — 9. M °kshavo sa°. — 10. M °vyam̃ na câti ‖ .

11. BM °ṇyam̃ tyaje°. — 12. M °nîpakam̃ tam̃°. — 13. M yâcanam̃ rodamânâhuḥ adâ° B °rodanâm âhu ‖ a°. — 14. BM °d bha(B °bhaga)vantam̃° BM °me aro yâ°. — 15. M na ca vai ° prajñâ âryave° B °prajña âryo°

16. M °ddeçe âryâ ti° B °esho âryâ° M °esho âryeṇa yâcanât ‖ . — 17. M °bhâshati | . — 18. B °hmaṇa puro° M °hmaṇa purohitânâm̃ pûrṇṇasahasram̃ ahapam̃gavena | B °pûrṇṇasahasram̃ mahatpuṅga°.

आर्यो हि आर्यस्य कथं न दद्या
श्रुत्वान गाथां कथितां सुभाषितां ॥

भगवानाह ॥ नान्यो भिक्षवस्तदा स काशिराज्ञो ऋषिसेनो नाम पुरोहितपुत्रो परिव्राजको वयस्यो अभूषि । अहं स तदा ऋषिसेनो परिव्राजको अभूषि ॥

ऋषिसेनस्य जातकं समाप्तं ॥

भगवानाह ॥

न वै याचति सप्रज्ञो नार्यो वेदयितुमर्हति ।
उद्दिशे आर्यास्तिष्ठन्ते एषा आर्याण याचना ॥

एवं भिक्षवः पिण्डचारं चरितव्यं ॥ ते दानि भिक्षू भगवन्तमाहन्सुः ॥ किमस्माभिर्भगवं भिक्षाये लब्धाये वक्तव्यं स्वस्ति स्वस्तीति ॥ भगवानाह ॥ न भिक्षवो युष्माभिरादिशितव्यं भिक्षायां लब्धायां ।

सर्वपापस्याकरणं कुशलस्योपसंपदा ।
स्वचित्तपर्यादापनं एतद्बुद्धानुशासनं ॥

ते दानि भिक्षू ऋषिवदने मृगदावे वर्षोषिता दिशोदिशं चारिकां प्रक्रान्ता ॥ ऋषिवदने देवता तेषां भिक्षूणां स्थानानि चंक्रमाणि निषद्यानि शय्यानि शून्यानि निरभिरम्याणि दृष्ट्वा रतिं अविन्दन्ती येन भगवांस्तेनोपसंक्रमित्वा भगवन्तं गाथाये प्रत्यभाषे ॥

अरति मे विषये व ख्यायति
शून्यं दृष्ट्व विविक्तमानुषं ।

1. B árya hi° BM °thaṁ nuda ° tháṁ bhavimaṁ su°. — 3[1]. B nánye bhi° M °kshavo tadá ° rájñá sasthi° B °rájá asthi° M °hitabuddho pari°. — 4. M °seno náma pa ° jaka a°. — 5. M iti çrimahávastuavadáne asthi°.

7. BM náryo(B °ryá) vedayati náryo ve° B °yituṁm arhasi | . — 8. M °çe áryyá tishṭhante | e°. — 9[1]. M °kshavo pi°. — 9[2]. M °bhikshur bhagavantam áhaṁsuḥ || B °vantaṁm á°. — 9[3]. M °smábhiḥ bhagavan bhikshá°. — 10[1]. M °shmábhiḥ rodisitavyá bhikshá° B °çitavyá bhikshá°.

12. M °çalasyápasaṁ°. — 13. B °ryádamanaṁ e° M °ryyádamanaṁ e°. — 14. B °kshú rishi° M °ṛishipattane mṛi ° rshopitáni diço diçaṁ corikáṁ° B °prakántá ṛi° — 15. B ṛishivadano de° M °devatás tesháṁ ° sthánáni nishadyáni çayyáṇi çú ° ndati | yena bhagaván teno° B °ndanti yena bhagaváṁ°.

18. B aratiya viya me yanya khyáyati çúnyáṁ dṛishṭvá viviktamánasáṁ | M arativa vishayamanyá ákhyáyati | çúnyáṁ dṛishṭvá viviktamánasáṁ | .

ते चित्रकथा बहुश्रुता
कहिं ते गौतम श्रावका गता ॥

भगवानाह ॥

मगधां गता कोशलां गता
वज्जिभूमिं च अथापरे गता ।
मृगका च असंगचारिणो
प्रविविक्ता विहरन्ति भिक्षवः ॥

भगवां प्रस्थितो । नाविकेन भगवन्तं दृष्ट्वा गंगातीरमुपसंक्रमन्तं नावा अक्षोपिता ॥ भगवां नावमारुह्य नाविकमाह ॥

सिंच भिक्षु इमां नावां मैत्राये सिक्ता ते लघु भेष्यति ।
छित्त्वा रागं च दोषं च ततो निर्वाणमेष्यसि ॥
सिंच भिक्षु इमां नावां करुणाय सिक्ता ते लघु भे[397b]ष्यति ।
छित्त्वा रागं च दोषं च ततो निर्वाणमेष्यसि ॥
सिंच भिक्षु इमां नावां मुदिताय सिक्ता ते लघु भेष्यति ।
छित्त्वा रागं च दोषं च ततो निर्वाणमेष्यसि ॥
सिंच भिक्षु इमां नावां उपेक्षाये सिक्ता ते लघु भेष्यति ।
छित्त्वा रागं च दोषं च ततो निर्वाणमेष्यसि ॥
मैत्राविहारी यो भिक्षुः प्रसन्नो बुद्धशासने ।
अधिगच्छति पदं शान्तं असेचनं च मोचनं ॥
करुणाविहारी यो भिक्षु प्रसन्नो बुद्धशासने ।
अधिगच्छति पदं शान्तं अपृथग्जनसेवितं ॥
मुदिताविहारी यो भिक्षु प्रसन्नो बुद्धशासने ।

1. M te cittakathâ° B °trakathâm̃ ba° M °gauttama çrâ°. — 4. M sagadhâm̃° BM °koçalâ gatâ vajri( M °vaji)bhûmim̃ ca ‖ a° gatâ mṛi°.

6. B °gakâm̃ ca asam̃° M °gakâm̃ ca nam̃ aṅgacâ° B °prativiviktâ°. — 8[1]. M bhagavân pratisthito ‖. — 8[2]. M nâkitena bha°. — 9. M °gavâ nâvam ârûhya°. — 10. M °maitrâya si° BM °ktâye la° B °ghu bhoshyati ‖.

11. B cchitvâ râ° M cchinvâ râ° BM °shyati |. — 12. M °kshur imâm̃ ° ṇâ siktâ la°. — 13. M citvâ râ° B cchitvâ râ ° shyati | M °shyati | mai° (*l.* 18). — 15. B cchitvâ râ°.

16. B °ktâye laghu te bhe°. — 17. B cchitvâ râ ° shyati |. — 18. M °hâri yo bhikshu pra°. — 19. BM °cchanti pa° B °secanamo°. — 20. M °hâri yo bhikshuḥ pra°.

21. B °cchanti pa° M °cchantu pa ° ntam̃ pṛithagjanasevanam̃ ‖. — 22. M °hâri yo bhi ° çâsano |.

अधिगच्छति पदं शान्तं अकापुरुषसेवितं ॥
उपेक्षाविहारी यो भिक्षु प्रसन्नो बुद्धशासने ।
अधिगच्छति पदं शान्तं निर्वाणं पदमच्युतं ॥
धर्मारामो धर्मरतो धर्ममनुविचिन्तयं ।
धर्मं समनुस्मरं भिक्षु सद्धर्मान्न परिहायति ॥
उदग्रचित्तो सुमना अभिभूय प्रियाप्रियं ।
ततो प्रामोद्यबहुलो भिक्षु निर्वाणसन्तिके ॥
न शीलव्रतमात्रेण बाहुश्रुत्येन वा पुनः ।
अथ वा समाधिलाभेन प्रान्तशय्यासनेन च ॥
स्पृहयं नैष्क्रम्यसुखं अपृथग्जनसेवितं ।
भिक्षु विश्वासमापद्ये अप्राप्ते आस्रवक्षये ॥
भिक्षु न तावता भवति यावता भिक्षते परां ।
विषमां धर्मा समादाय भिक्षु भोति न तावता ॥
यो च कामां च पापां चाधिष्ठत्वा ब्रह्मचर्यवां ।
निःश्रेणीभूतो समज्ञो स वै भिक्षूति वुच्चति ॥
यतो चरे यतो तिष्ठे यतो आसे यतो शये ।
यतो संमिंजये कायं यतो कायं प्रसारये ॥
यतयायी यतसेव्यो अस्था
यतसंकल्प ध्यायि अप्रमत्तो ।

1. M °daṁ çá apṛithagjanasevitaṁ ‖ muditávihári yo bhikshu prasanno buddhaçásane | adhigacchati padaṁ çántaṁ akárapuru°. — 2. M °hári yo°. — 4. BM karmárámo karmarato karmam anu° B °cintitaṁ | M °cintiyaṁ | . — 5. M °bhikshuḥ saddharmán pari° B °kshu saddharmá°.

6. B udacitto° M udayacitto° B °bhúta abhibhúya pri°. — 7. BM °to pramo° M °dya aprápte sanirvá° B °hulá bhikshú nirváṇasya sontike | . — 8. M °ṇa bahuçrutena°. — 9. BM atha so samá° M °lábhanto práute çaryyása°. — 10. B griheya nai° M spṛiheya nai°.

11. B °pte açra°. — 12. B bhikshú na tá° M bhikshuṇa tá° yávatte ca bhi° B °yávate bhi° BM °bhiksho paráṁ | . — 13. B °dharmá sa° bhikshú bho° M °bhonti na°. — 14. M °máṁ pá° hmacaryyaṁ vá | B °hmacaryaṁ vá | . — 15. M niççreṇi° jño sarve bhi° B °vai bhi ti vu°.

16. B yataṁ careya tan tishṭheya tam áseya taṁ çayeya | M yattaṁ careya taṁ nishṭheyato máseyato yaçaṁ | . — 17. B taṁ samijiyeya káye yataṁ káyaṁ pra° M taṁ samepijine káye taṁ ca káye pra° B °raye ya°. — 18. B yatavárí yatásiro siyá yatá saṁ° M yato vásivataçirosi saṁ° dhyáyí jáyatá | apra° B °dhyáyí | apra° BM °tto a°.

अध्यायरतो समाहितो
एको संतुषितो तमाहु भिक्षुं ॥
चक्षुषा संवरो साधु साधु श्रोत्रेण संवरः ।
घ्राणेन संवरो साधु साधु जिह्वाय संवरो ॥
कायेन संवरो साधु मनसा साधु संवरः ।
सर्वत्र संवृतो भिक्षुः सर्वदुःखा प्रमुच्यते ॥

सो दानि भगवता वशीभावेन विनीतो। सिंह भिक्षु इमां नावां ति आमाष्टस्य यत्किंचिद्गृहिलिंगं गृहिगुप्तं गृहिध्वजं गृहिकल्पं सर्वं समन्तर्हितं त्रिचीवरं चास्य प्रादुर्भवेत् सुंभकं च पात्रं प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथं चास्य संस्थिहे तद्यथापि नाम वर्षशतोपसंपन्नस्य भिक्षुस्य ॥ एवं आयुष्मतो गंगियकस्य नाविकस्य प्रव्रज्या उपसंपदा भिक्षुभावो ॥

तं तहिं भ[398ᵃ]गवां विसर्जयति ॥ सो दानि भगवन्तं आह ॥ यदि भगवं केनचित्पृच्छियेयं को त्वं ति किं मया भगवं वक्तव्यं ॥ भगवानाह ॥ श्रमणो पि त्वं ब्राह्मणो पि त्वं वेदको पि त्वं तारको पि त्वं पारगो पि त्वं ॥

शक्रो देवानामिन्द्रो माणवकवर्णमात्मानं छादीयि अभिनिर्मिणित्वा प्रासादिको दर्शनीयो शोभनेहि जटेहि नीलेहि नीलमयूरग्रीवसंनिकाशेहि सौवर्णेन यष्टिकमण्डलुना भगवतो पात्रचीवरकुण्डिकमादाय पृष्ठतो गच्छति ॥ जनो आह ॥ को स्वायं माणवको प्रासादिको दर्शनीयो ॥ सो दानि आह ॥

यो वीरो धृतिसंपन्नो ध्यायी अप्रतिपुद्गलो ॥
अर्हन्तो सुगतो लोके तस्याहं परिचारको ॥

1. M andhyácara ° eká sa° BM °bhikshuḥ ‖. — 3. BM cakshusá samvaro° M °çrotena samvaraḥ | B °ṇa samvaraḥ |. — 4. B práṇe° BM °na samvaro sádhu sádhu jihváya samvaro |. — 5. B °yena samvaro sádhu ma° BM °dhu samvaraḥ(M °ro) sa°.

6. M °tra samvaro bhi ° duḥkháṁ pra°. — 7[1]. BM °uto bhi°. — 7[2]. B °bhikshuḥ | i° M °nává ti ábhátasya yat kiṁci° B °ábháshṭhasya yat kiṁcilliṁgaṁ° M °dgrihiliṅga grihiguptiṁ grihidhvajaṁ grihikalpaṁ° B °jaṁ grihakalpaṁ° BM °rbhavatsuḥ | (M °vetsuḥ) suṁ° M °svabhávaṁ saṁsthitá ca keçá iryyá° B °keçá iryá° BM °he ‖ tadya° M °topasampanna° BM °kshusya e°. — 10. M °bhávaḥ |.

12[1]. BM tahiṁ°. — 12[2]. M °vantam áha ‖. — 12[3]. B °bhagaváṁ ke° M °bhagaván kena cin pricchiyeyaṁ ko tvan ti kiṁ ° gavan vakta°. — 13[2]. M çravaṇo pi tvaṁ brá°. — 15. B °ruṇam áṇmánaṁ ṛi° M °tmánam ṛiddhi ° çobhaṇehi jaṭe° B °jatehi nile° M °yúlagrivehi saṁ° B °sauvarṇṇana yashṭi° B °luná | bha°.

18[1]. BM kasyáyaṁ°. — 19. M °dhritisampanno ° puṁgavaḥ | B °pratipuṁgalo |. — 20. B arhan suga° M | arhaṁ suga°.

यो वुह्यमानं तारेति धर्मनावाय गौतमो ।
उत्तीर्णो पारगो बुद्धो तस्याहं परिचारको ॥

भगवां पि शक्रं देवानामिन्द्रं विसर्जयति ॥

अथ खलु भगवतो एतदभूषि ॥ किमधिमुक्ता जटिला जटिला खलु जटिलाधिमुक्ता ति भगवां जटिलसहस्रं अभिनिर्मिणित्वा प्रासादिकां प्रसादनीयां महेशाख्यां तेहि संपरिवारितो वैहायसेन ऋद्धीये उरुविल्वाकाश्यपस्य जटिलस्य उपसंक्रान्तो ॥ उरुविल्वाकाश्यपः सपरिवारो सार्धं पंचहि जटिलशतेहि जटिलसहस्रं दृष्ट्वा प्रासादिकां च दर्शनीयां च संकोचमापन्नो । इमं चास्माकमाश्रमं सर्वो उपस्थितो महाजनकायो आगमिष्यति ते चास्माकं अभिप्रसन्ना उरुविल्वाकाश्यपस्य ऋषिस्य सपरिवारस्य लोके समसमो नास्ति अयं च ऋषि जटिलसहस्रपरिवारो महर्धिको महानुभावो अद्यैवमिहाश्रमं प्राप्तो सर्वजनकायो एतस्य ऋषिस्य सहस्रपरिवारस्य महर्धिकस्य महानुभावस्याभिप्रसीदिष्यति । अभिप्रसन्ना च प्रसन्नाधिकारं करिष्यन्ति सत्करिष्यन्ति गुरुकरिष्यन्ति मानयिष्यन्ति पूजयिष्यन्ति अपचायिष्यन्ति मम सपरिवारस्य न तथा समन्वाहरिष्यन्ति ॥ अथ खलु भगवां उरुविल्वाकाश्यपस्य ऋषिस्य इममेवरूपं चेतसो परिवितर्कमाज्ञाय स्वयं जटिलवेशमन्तरहायितं च निर्मितं च जटिलसहस्रं ॥ अथ खलु उरुविल्वाकाश्यपो जटिलो तस्मिं जटिलसहस्रे अन्तर्हिते स्वकेन रूपेण च भगवन्तं दृष्ट्वा तथागतमर्हन्तं सम्यक्संबुद्धं विद्याचर[398$^{b}$]णसंपन्नं सुगतं लोकविदं अनुत्तरं पुरुषदम्यसारथिं

1. M yo pûjyamânaṁ târe dha ° gauttamo | . — 2. M tirṇṇo° BM °haṁ parivârako |. — 4°. B kiṁ adhimukti jaṭilâ jaṭilâ khalu jaṭilâ ti muktâ ti bha° M kiṁ adhimukti jaṭilo khalu jaṭilo ti muktâ ti bhagavân jaṭi ° dikaṁ pradarçanîyaṁ maheçâkhyam | te° B °kâṁ pradanîyâṁ maheçâkhyo tehi saṁparicârikaṁto vai° M °vârikaṁto vai° B °ddhiye uluvilvâkâçya jaṭi° BM °nto uru°.

7. M °çyapo sapari ° paṁcahi jaṭilasahasraṁ hi dṛi ° m âpannaṁ B °nno i°. — 8. BM imaṁ câsmâkam âçrame sa° M °sarve upasthi° BM °mishyati | tenâsmâkaṁ° B °prasanno u ° lokam asamasa° BM °nâsti || ayaṁ° M °pto sarvejanakâ°.

12. M abhiprasaṁnnâ ca ° pûjayishyanti mama sa ° nvaharishyanti || . — 14. M °gavân uru° B °uluvilvâ° M °idam e ° so parikitarkam âjñâpaya svayaṁ jaṭilo ve ° ntarhâyitaṁ | B °rmitaṁ jaṭi°.

16. BM °çyapo jaṭilo(M °lâ) tena jaṭilasahasreṇântarhi° M °rhanta saṁmyaksaṁ° B °nnaṁ sugato lokavid anutta° BM °myaçârathiṁ ° thâgatabalehi balavâṁ caturhi vai° M °ttamadamathaprâptaṁ nâgo viya kâritakârano avahirgatena mânase° B °indriyeṇa avarhirga° M °jitendriye hradam avâccho anâviro viṁprasanno ratasyûthaṁ vâ abhyu° B °yûshaṁ vâ abhyu ° tejarâçiṁ ° kaṁ apratishkûlaṁ° M °kaṁ apratikulaṁ darçanâye B °rçanâya dṛi°.

शास्तारं देवानां च मनुष्याणां च द्वात्रिंशतीहि महापुरुषलक्षणेहि समन्वागतं अशीतिहि अनुव्यंजनेहि उपशोभितशरीरं अष्टादशेहि आवेणिकेहि बुद्धधर्मेहि समन्वागतं दशहि तथागतबलेहि बलवन्तं चतुर्हि वैशारद्येहि विशारदं प्रासादिकं प्रसादनीयं च शान्तेन्द्रियं शान्तमानसं उत्तमदमशमथप्राप्तं परमदमशमथप्राप्तं नागो विय कारितकारणो अबहिर्गतेहि इन्द्रियेहि अबहिर्गतेन मानसेन स्थितेन धर्मताप्राप्तेन गुप्तो नागो जितेन्द्रियो ह्रदमिवाच्छो अनाविलो विप्रसन्नो रतनयूपं व अभ्युद्गतं सुवर्णबिम्बमिव प्रभासयन्तं तेजोराशिं शिरीये दीप्यमानं द्वितीयमिव आदित्यं उदयन्तं असेचनकं अप्रतिकूलं दर्शनाय । दृष्ट्वा च पुनरुरुविल्वाकाश्यपो सपरिवारो विस्मितो अभूषि । महर्द्धिको श्रमणो गौतमो महानुभावो ऽयं अहं पुनर्महर्द्धिकतरो ॥

अथ खलु सो जनकायो आगतागतो भगवन्तमुपसंक्रमेन्सुः भगवतः पादौ शिरसा वन्दित्वा भगवन्तमेव पुरस्करेन्सुः भगवतो दर्शनेन न तृप्येन्सुः ॥ अथ उरुविल्वाकाश्यपस्य ऋषिस्य एतदभूषि ॥ अहो पुनर्मे आश्रमातो श्रमणो गौतमो अन्येन प्रक्रमेया ॥ अथ भगवानुरुविल्वाकाश्यपस्य ऋषिस्य इममेवरूपं चेतसो परिवितर्कमाज्ञाय तद्यथापि नाम बलवां पुरुषो संमिंजितां वा बाहां प्रसारये प्रसारितां वा बाहां संमिंजये एत्तकेन क्षणवीतिहारेण उरुविल्वाकाश्यपस्य ऋषिस्याश्रमातो वैहायसमभ्युद्गम्य उरुविल्वायां सेनापतिग्रामके प्रत्यस्थासि नद्या नैरंजनायास्तीरे अजपालस्य न्यग्रोधमूले ॥ अथ खलु उरुविल्वाकाश्यपस्य जटिलवृत्तः अपगतेन जनकायेन एतदभूषि ॥ अहो पुनः श्रमणो गौतमो इहागच्छे इहागतो खादनीयं भोजनीयं परिभुंजेया ॥ अथ खलु भगवां उरुविल्वाकाश्यपस्य जटिलस्य इमं एवरूपं चेतसः परिवितर्कमाज्ञाय तद्यथापि नाम बलवां पुरुषो सम्मिंजितां वा बाहां प्रसारये प्रसारितां वा बाहां संमिञ्जये एत्तकेन क्षणवीतिहारेण अजपालस्य न्यग्रोधमूलातो वैहायसमभ्युद्ग[399a]म्य उरुविल्वाकाश्यपस्य

8. B °shi ma°. — 9. M °çravaṇo gautta mahânubhâvo yaṁ a° B °r marddhi° M °rddhiko yaṁ ‖.

11. B °âgatâgatâ bha° BM °metsuḥ bhagavataḥ(M °to) pâ° M °tvâ bhagavantamavantam e° BM °retsuḥ bha ° pyetsuḥ ‖. — 12. M atha khalu u ° shisyaita°. — 13. M °çravaṇo gauttamo anena pra° B °kramayâ ‖. — 14. M atha khalu bhagavâṁ uru° B °çyapaçya ṛi° M °çyapasya çirisya i° BM °jñâya ta ° balavâṁ pu(M °vân pu)rusho samiṁjitaṁ vâ bâhâṁ prasâraye prasâritâṁ bâhâṁ sami(M° sammiñ)jaye(M °ye | ) etta° M °vîthihâre° B °çyapapaçya ṛi° BM °vaihâyasam abhudga ° sthâsi(M °si | ) nadyâṁ nai°.

18. B °ṭilasya vṛitteḥ | pathaga° M °ṭilasya vṛito yathâga ° yenaita°. — 19. M °çravaṇo gauttamo ° cche ihâgataḥ khâ°. — 20. M °gavân uru ° çyapajaṭi ° m evaṁrû ° vittarka° purushaḥ saṁ° BM °ritâṁ(M °taṁ) bâhâṁ° M °saṁmiñja ° vîthihâre°.

जटिलस्याश्रमे प्रत्यस्थासि ॥ अथ खलु उरुविल्वाकाश्यपस्य जटिलस्य सपरिवारस्य एतदभूषि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो परसत्वानां परपुद्गलानां चित्तेन चित्तं जानाति महर्द्धिकतरा च वयं ॥ अथ खलु उरुविल्वाकाश्यपो जटिलो भगवन्तं स्वहस्तेन प्रणीतेन खादनीयभोजनीयेन सन्तर्पयति ॥ अथ खलु भगवां भुक्तावी धौतपात्र अपनीतपाणिरुरुविल्वाकाश्यपस्य ऋषिस्य जटिलस्य तं देयधर्मं इमायानुमोदनायानुमोदये ॥

अग्निहोत्रमुखा यज्ञा सावित्री छन्दसां मुखं ।
राजा मुखं मनुष्याणां नदीनां सागरो मुखं ॥
नक्षत्राणां चन्द्रो मुखं . . . . . . . . . ।
आदित्यो तपसां ऊर्ध्वं तिर्यगधस्तपस्वतां ।
सदेवकस्य लोकस्य संबुद्धो वदतां वरो ॥

अथ खलु उरुविल्वाकाश्यपो सपरिवारो वैहायसमन्तरीक्षे स्थितो अग्निं जुहति तेषां तमग्निं न ज्वलति तेषामेतदभूषि ॥ कस्यायमनुभावो येनाग्निं न प्रज्वलति । नूनं श्रमणस्य गौतमस्यानुभावेन ॥ सो दानि अग्निः प्रज्वलितो तेषामेतदभूषि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो वयं पुनः महर्द्धिकतरा ॥ तहिं अग्निस्मिं आहुतिं प्रक्षिपति न च पतति तेषामेतदभूषि ॥ कस्यायमनुभावो येनाग्निस्मिं आहुती न पतति । नूनं श्रमणस्य गौतमस्यानुभावेन । यतो सानं एवं भवति श्रमणस्य गौतमस्यानुभावो ति ततः सा आहुतिरग्निहोत्रस्मिं पतति ॥ अग्निं जुहन्तान्तरी-

1. B °shi ma°. — 2. M °çravaṇo gauttamo° BM °tvānāṃ parapuṃgalā(M °gavā)nāṃ cittena cittaṃ(B °na citte) jā° ṛddhikataro ca va(B °ca ve)yaṃ | . — 3. M °gavanta svahastena khādani° B °khādaṇīyabho° M °saṃtarppayati paricārayati || . — 4. M °pāṇir uru° imāṃyānumodanā° B °imāyānumodāyānumodaye | .

7. B °khā yajño sā° M °khā prajñā sā° BM °sāṃ mukhā | . — 8. M rājā mukhaṃ cchandasināṃ nadī° ro mukhā | . — 9. BM °khaṃ ādi°. — 10. B °sāṃ ūrddhaṃ ti° M °siṃ urddhatiryyagdhastayovatāṃ B °stapovatāṃ | .

11. BM jagatāṃ gato sa° M °devasya lo° saṃmukho vadatām varaḥ || . — 12. M °lu uluvilvā° B °junati teshāṃ° M °hvati | teshān taṃ agniṃ na jvaleti teshā°. — 13. B °bhāvenāgni° M °bhāvo nā 'gnir na°. — 14[1]. M °çravaṇasya gauttama°. — 14[2]. M °agnir prajva°. — 15[1] B mahardhi çra° M °çravaṇo gauttamo° punar maha° BM °tarā taṃ°. — 15[2]. B taṃ agniṃsmiṃ° M tam agnismiṃ° BM °kshipata na° B °ca patanti te° M °teshāṃ eta°.

16. BM °bhāvenā° M °nāgniṃ āhuti na°. — 17[1]. M °çravaṇasya gauttama° BM °vena yato°. — 17[2]. BM °bhavati | çrama(M °çrava)ṇa° M °gauttama° BM °vo ti | tataḥ (M °tato) sā° M °āhuti agnihotresmiṃ° BM °ti a°. — 18. M °tvā anta° shyāmiti na° ottari° BM °tuṃ te°.

घातो ओतरिष्यामो ति न शक्नोन्ति ओतरितुं ॥ तेषामेतदभूषि ॥ कस्मायमनुभावो येनान्तरीघातो न शक्नोम आश्रमं ओतरितुं । नूनं श्रमणस्य गौतमस्यानुभावेन ॥ यतः सानं एतदभूषि श्रमणस्यायं गौतमस्यानुभावो ति अथ ततो अन्तरीघातो आश्रमे प्रतिष्ठिता शिविकेषु स्वकस्वकेषु निषीदिष्यामो ति न च तानि शिविकानि अद्दशेन्सुः ॥ तेषामेतदभूषि ॥ कस्मायमनुभावो येन वयं शिविकां न दृशेम । नूनं श्रमणस्य गौतमस्यानुभावेन ॥ यतो सानं एवं भवति श्रमणस्य गौतमस्यानुभावो ति अथ तानि शिविकानि अद्दशेन्सुः ॥ तेषामेतदभू[399b]षि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतरा ॥ पानीयकरकानि आदाय उदकहारा गमिष्यामो ति न च तानि करकानि अद्दशेन्सुः ॥ तेषामेतदभूषि ॥ कस्मायमनुभावो नूनं श्रमणस्य गौतमस्य । यतो सानं एवं भवति श्रमणस्य गौतमस्यानुभावो ति अथ तानि स्वकस्वकानि करकानि अद्दशेन्सुः ॥ तेषामेतदभूषि ॥ महर्द्धिको श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतरा ॥ करकानि आदाय नेरंजनां नदीं उदकहारिं गता न च शक्नोन्ति तानि करकानि भरयितुं ॥ तेषां एतदभूषि ॥ कस्मायमनुभावो नूनं श्रमणस्य गौतमस्य ॥ यतो सानं एवं भवति श्रमणस्यायं गौतमस्यानुभावो ति अथ तानि करकानि उदकेन भरेन्सुः ॥ तेषामेतदभूषि ॥ महर्द्धिको यं श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतरा ॥ आहारं करिष्यन्ति न च शक्नोन्ति आहारं कर्तुं ॥ तेषामेतद-

1[1]. B °shi ka°. — 1[2]. B °bhâvenânta° M °bhâvânânta ° knomar âçramam̃ ottaritum̃. — 2. M °gauttama° BM °vena ya°. — 3. M °sâtam̃ e° B °shi | çramaṇa° M °shi | çravaṇasyâ gauttamasyânu° BM °vo tī || || atha° M °tato ntari° BM °âçramam̃ pratishṭhito çivi(B °to viçi)keshu svakasvakeshu nishidi nishidisyâmo(M °me)ti | na ca° B °tâni viçikâni addetsuḥ || M °çivikâm adda°. — 5[1]. M teshân eta° BM °shi ka°. — 5[2]. B °yam̃ viçikâm̃° M °driçâma | .

6[1]. M °çravaṇasya gauttama° BM °vena ya°. — 6[2]. M °sânam evam̃ ° çravaṇasya gauttamasyânubhâveti || a° B °ṇasyâ gautamasyânubhâveneti | atha tâni viçikâni addaçetsuḥ | M °çetsuḥ te°. — 7. B °shi ma° M °shi kasyâ° (*l.* 10). — 8[1]. B °katarâ pâ°. — 8[2]. B pâniye karakâni â°çetsuḥ te°. — 10[1] M °bhâvam̃ nûnam̃ çravaṇasya gauttamasya. — 10[2]. M °yataḥ sâ ° bhavati | çravaṇasya gauttamasyânubhâveneti || atha° B °vo ti || atha ° çetsuḥ | M °çetsuḥ.

12[1]. M teshân eta° BM °shi ma°. — 12[2]. M °çravaṇo gauttamo ° puna maha°. — 13. M karam̃kâni â° B °dâya | nai ° hâragatâ na° M °hârim̃ gato na° BM °knoti tâ ° kâni hara°. — 14[1]. M teshâm eta° B °shi ka°. — 14[2]. M kasyânu° B °syâyanu° M °çravaṇasya gauttama°. — 14[3]. M yato sânam evam̃ ° çravaṇa ° gauttamasyânubhâveti || atha° B °vo ti | atha ° kena bhavetsuḥ te° M °kena bharayetsuḥ.

16[1]. B °shi ma°. — 16[2]. M °çravaṇo gauttamasyâyam̃ anubhâvo ti || vayam̃° BM °tarâ â°. — 17[1]. M âharam̃ kari° B °shyati | na çaknoti â° M °knoti â° B °kartum̃ te°. — 17[2]. B °shi ka°.

भूषि ॥ कस्यायमनुभावो नूनं श्रमणस्य गौतमस्य ॥ यतो सानं एवं भवति श्रमणस्यायं गौतमस्यानुभावो त्ति ततः शक्नोन्ति आहारं कर्तुं ॥ तेषामेतद्भूषि ॥ महर्द्धिको श्रमणो गौतमः महानुभावो वयं पुनर्महर्द्धिकतरा ॥ कृताहारा काष्ठानि पातयिष्यामो ति उत्क्षिपितानि कुठाराणि न शक्नोन्ति निक्षिपितुं ॥ तेषामेतद्भूषि ॥ कस्यायमनुभावो नूनं श्रमणस्य गौतमस्य ॥ यतो सानं एवं भवति श्रमणस्य गौतमस्यायमनुभावो ति अथ तानि कुठाराणि उत्क्षिप्तानि निक्षेपेन्सुः तानि च काष्ठानि पातयेन्सुः ॥ तेषां एतद्भूषि ॥ महर्द्धिको यं श्रमणो गौतमो महानुभावो वयं पुनर्महर्द्धिकतराः ॥

एवं भगवां उरुविल्वाकाश्यपस्य संमुखा त्रयो भ्रातरां सपरिवारां पंचहि प्रातिहार्यशतेहि विनयेसि । पश्चिमं प्रातिहार्यं ॥ भगवां प्रतिसंलीयितुकामो उरुविल्वाकाश्यपमाह ॥ काश्यप अत्र अग्निशरणम्हि ते संलयिष्यामीति ॥ उरुविल्वाकाश्यपो आह ॥ सो गौतम अग्निशरणो अप्रवेश्यो केनचित् मनुष्येण वा अमनुष्येण वा अत्र सरणे दुष्टनागो प्रतिवसति । वयं पि तावदेतं अग्निशरणं दूरे परिवर्जेम तस्य दुष्टनागस्य भयेन ॥ भगवानाह ॥ अनुजानाहि त्वं काश्यप प्रतिसंलयिष्यामि अहमत्रा[400a]ग्निशरणे ॥ उरुविल्वाकाश्यपो आह ॥ न ते भो गौतम अग्निशरणं अनुजानामि । अत्र दोष एव आख्यायति एतं अग्निशरणं इमानि च बहूनि तृणकुटिकापर्णकुटिकाशतानि यत्र भवां गौतमो नन्दति तत्र प्रतिलीयतु ॥ अथ खलु भगवां उत्थायासनातो उरुविल्वाकाश्यपस्याग्निशरणं

1[1]. BM °syânubhâvo(M °vaṁ) nû° M °çravaṇasya gauttamasya B °masya ta°. — 1[2]. B tayo sâ° M °bhavati | maharddhiko yaṁ çravaṇo gauttamasyânubhâvonti | tato çaknoti â° B °bhâvânti | tataḥ çaknoti â ° rttuṁ te°. — 2. B °shi ma°. — 3[1]. M °çravaṇo gauttamo mahâ° B °bhâvaṁ vayaṁ° M °punaḥ maha° BM °tarâ kṛi°. — 3[2]. B °hâro | kâshṭhâni pâṭamishyâmo ti ukshipitâ° M °shyâmeti ukshipitâ° BM °kuṭhârâṇi(M °ni) na° B °çaknoti nikshipituṁ te°. — 5[1]. M °çravaṇasya gauttama°. — 5[2]. M °çravaṇasya gauttamasyâyam anubhâveti ‖ a° B °vo ti ‖ atha tâni kaṭhâ° M °kuthârâ° BM °ksho(M °ksha)petsuḥ (B °tsuḥ | ) tâni na kâ° B °pâṭayetsuḥ | M °pâtayetsuḥ.

7[1]. M teshâm eta° BM °shi ma°. — 7[2]. M °çravaṇo gauttamo ° punaḥ maha°. — 9. M °gavân uru ° mukhât trayo ° hâryyâçate° B °vinamesi pa°. — 10[2]. BM °gavâṁ pra-(M °vân pra)tiliyatu°.

11[1]. M kâçyapo ato agni° B °pa ato agni° BM °çaraṇaṁ hi te saṁçayi°. — 11[2]. M °çyapam âha ‖ . — 12. M °gauttamo esho agni° B °gauttamo agni° BM °veshya te(M °te | )na ke(M °kena)cit manushyeṇa vâ atra sa(M °tra ça)raṇe° M °dushṭhanâ°. — 13. M °paritarjjema | ta° B °rjema | ta ° bhavena ‖ . — 14[2]. M °mi atrâham agniçaraṇo ‖ . — 15[1]. M °çyapa â°. — 15[2]. M °gauttamo agni° B °gautamo agni° BM °mi a°.

16. M °dosho evam âkhyâyasi etaṁ° B °sha evam âkhyâyasi | etaṁ° M °bahuni tṛiṇakuṭṭikâparṇṇakuṭṭikâḥ ça ° gauttamo abhinandati tatra me pra°. — 18. M °gavân utthâ° B °tthâyasanâto ° ṇaṁ prativiçi°.

प्रविशित्वा निषीदे प्रतिसंलयनाय ॥ भगवान्दानि अग्निशरणे तेजोधातुं समापन्नो । सो दानि भगवतः तेजं असहन्तो यतो भगवतो पात्रं चतुर्हि महाराजेहि दिन्नं तत्र ओकन्तो । भगवता च मैत्र्या स्फुटो दमितो च निर्विषो संवृत्तो न च भूयो क्रोधं व्यावहति ॥ अग्निशरणो भगवतो तेजेन एकज्वालीभूतो दृश्यति ॥ तेषां जटिलानामेतदभूषि ॥ दुष्टनागेन गौतमो श्रमणो दग्धो अग्निशरणो च सर्वं आदीप्तं ॥ ते दानि उदकमादाय प्रधाविता अग्निशरणं निर्वापयिष्यामो त्ति श्रमणं च गौतमं परिमोचयिष्यामो त्ति ॥ भगवां तं नागं दमेत्वा निर्विषं कृत्वा पात्रेणादाय उरुविल्वाकाश्यपस्योपनामयति ॥ उरुविल्वाकाश्यपो भगवतो पात्रगतं तन्नागं दृष्ट्वा सपरिवारो विस्मितो । महर्द्धिको श्रमणो गौतमो महानुभावो यत्र हि नाम पश्य भगवन्मनुष्येण वा अमनुष्येण वा न शक्यं प्रवेष्टुं ति सो श्रमणस्य गौतमस्य तेजेन पर्यादिन्नो ॥ अथ खलु उरुविल्वाकाश्यपस्य संमुखा ते त्रयो भ्रातरो सपरिवारा भगवता इमेन पश्चिमेन प्रातिहार्येण सर्वे अभिप्रसादिता ॥

दमयित्वा उरगराजं उरुविल्वकाश्यपअग्निशरणस्मिं ।
पात्रेण नीहरित्वा काश्यपशिरिणो उपनयासि ॥
एषो स्य पश्य काश्यप पर्यादिन्नो स्वतेजसा तेजो ।
यस्य भवनं न शक्यं प्रवेष्टुमिह केनचिल्लोके ॥
संहृष्टरोमकूपो उरुविल्वाकाश्यपो सपरिवारो ।
नरनागेन हि नागो दान्तो उपशमयितो दृष्टो ॥
सो नागो यस्यार्थं महर्षिभवनं आसीद्दुःप्रवेशो ।
सो दान्तो निर्विषश्च कृतो यं बुद्धानुभावेन ॥

2. B °tejāṁ asa° M °tejām asa ° yataḥ bha ° turbhi mahā° B °nnaṁ | ta°. — 3. B bhagavāñ ca mai° M bhagavāṁ ca mai° B °sphuṭe da° M °sphuṭaṁ demitāṁ ca nirvishaṁ saṁvṛittaṁ na vā ca bhū° B °hati ca agni°. — 4. B °ekājvā°. — 5². M °gauttamo çravaṇo dagdha agniçaraṇe ca sa°.

6. B °rvāpayishyāmonti çra° M °rvāpayishyāmonti | çravaṇaṁ ca gauttamo pa ° shyāmeti | B °shyāmonti || . — 7. M °treṇādā ° çyapasya upanā°. — 8. BM °çyapa bhagavato (M °vanto) pā° M °tragataṁ taṁ nāgaṁ ° smitaḥ B °smito maha°. — 9. M °rddhiko çravaṇo gauttamo ° hi nāma sya bha° B °hi nāma yasya bha ° shṭuṁ | so° M °shṭuṁ so çravaṇasya gauttama°.

11. BM °sya pramukhā ta tra ° rivāro bha° B °çcimena pratihā° M °bhiprāsādikā B °ditā da°. — 13. BM °jaṁ | u° B °vilvākāçyapo a° M °vilvākā agniçaraṇesmiṁ B °smiṁ pā°. — 14. M °treṇa niha ° çirino u° BM °nayasi | . — 15. BM °esho sya kā° M °dinnā sya tejasātoto B °nno sya tejasā tejo ya°.

16. M jasya°. — 17. BM °vāro na°. — 18. BM °dānto paçyamāno dṛishṭvo | (M °shṭo). — 19. BM esho so nāgo etam arthaṁ ° naṁ yadya duḥpraveço. — 20. BM nara- (M nava)nāgena so° M °rvishakṛi°.

भगवानाह ॥

मया विनीते न सन्ति दोषा अत्यानियतो काश्यप न विद्यते ।
नभं पतेय पृथिवी फलेय च न बुद्धदान्तो सविषो चरेत् ॥
विस[400b]र्जितो भगवता स संवर्तनाग ति पन्नगो भणितो ।
मानुषकायो भूत्वा प्रणिपते चरणेषु सुगतस्य ॥
शरणं भवाहि नरवर अयं न मे अत्ययो महाप्रज्ञ ।
यस्य मम आसि चित्तं प्रदुष्टमपविद्धं प्रत्यक्षं ॥
बाल्यं कृतं नरोत्तम अपराधो मम अनत्ययो यमहं ।
तं खलु विनायकवर पुन ते शरणं अहं गच्छे ॥
वंदित्व वन्दनीयं बहुशो च प्रदक्षिणीकरित्वान ।
गुरुगारवेण महता नमस्य नागो अपक्रान्तो ॥

भगवता उरुविल्वाकाश्यपो पंचशतपरिवारो नदीकाश्यपो च त्रिशतपरिवारो गयाकाश्यपो च द्विशतपरिवारो सर्वे त्रयो भ्रातरो पंचहि प्रातिहार्यशतेहि वशीभावे विनीता एहिभिक्षुकाये सर्वे प्रव्राजिता उपसंपादिता । एथ भिक्षवश्चरथ तथागते ब्रह्मचर्यं ॥ तेषां दानि भगवता एहिभिक्षुकाये आभाष्टानां यत्किंचिदृषिलिङ्गं ऋषिगुप्ति ऋषिध्वजं ऋषिकल्पं सर्वं समन्तरहितं त्रिचीवरा च सानं प्रादुर्भवेत्सुः सुम्भका च पात्रा प्रकृतिस्वभावसंस्थिता च केशा ईर्यापथो सानं संस्थिहे तद्यथा वर्षशतोपसंपन्नानां भिक्षूणां । एवमायुष्मन्तानामुरुविल्वाकाश्यपनदीकाश्यपगयाकाश्यपानां त्रयाणां भ्रातृणां सपरिवाराणां प्रव्रज्या उपसंपदा भिक्षुभावो ॥

2. BM °nītasya na santi dushā(M °sho) atyantato kāçyapa(M °pasya) vidyate. — 3. B nahaṁ yateyā pṛi° M nāhaṁ pateyā pṛi° BM °leyā yo na buddha(B °ddho)dāntā savishā caretsuḥ | . — 4. BM °bhagavatā suvarttamāno ti | (M °māneti) panna ° to mā°. — 5. BM mānushakāyo bhū°.

6. M caraṇaṁ° BM °yaṁ ca me ° mahāṁ prajñā ya°. — 7. BM yasyā nama āçi(M °āsi) ci ° dushṭaṁ aravinda(M °viṁdu) pratyaksha bā°. — 8. BM bālyākṛi ° ttama(M °maṁ) | aparādho(M °dho)nam atyayam ahaṁ taṁ°. — 9. M °puṇā te° B °punā te° M °raṇam ahaṁ°. — 10. M vanditve va° B vaditvaṁ va° BM °tvāna gu°.

11. M °rugauraveṇa° B °vena maha° BM °aprakrā°. — 12. BM °lvākāçyapasya paṁ° M °dīkāçyapo ca triṁçaparivāro ga° BM °dviçataparivāro sarva tra° B °bhrātarā paṁ° M °paṁcehi prā°. — 15. B tehi dā° M °bhagavato e° BM °guptiṁ ṛishidhvajaṁ ṛishiākalpaṁ sa° M °rbhavetsuḥ sumbhakā ca pātra pra° M °bhāvasaṁsthihe keçā iryāpathe sā° B °çā iryāpatho ° sthite || ta° M °topasampannā° B °kshūṇā e°.

18. BM °trayāṇāṁ bhrā° B °bhikshūbhāvo | M °bhāvaḥ | .

तेषां दानि उपसेनो नाम भागिनेयो तस्यैव नद्या नैरंजनायास्तीरे आश्रमं मापयित्वा पत्रोपेतं पुष्पोपेतं फलोपेतं तत्रासौ प्रतिवसति त्रिंशतपरिवारो चतुर्ध्यानलाभी पंचाभिज्ञो महर्द्धिको महानुभावो ॥ तेहि दानि उरुविल्वाकाश्यपप्रमुखेहि भिक्षूहि सर्वन्तं ऋषिभाण्डं अजिनोपानहचीवरा च कठीनका च कमण्डलुं च नद्यां नैरंजनायां प्रवाहिता । सो अस्माकं भागिनेयो उपसेनो एतेन ऋषिभाण्डेन सपरिवारो कार्यं करिष्यति ॥ तेहि तं भाण्डं नैरंजनायां उह्यन्तं दृष्ट्वा तेहि तं भाण्डं सर्वं उत्कड्ढितं ॥ तस्य दानि उपसेनस्य ऋषिस्य एतदभूषि । मा हैव मे मातुलका केनचिद्विहेठिता भविष्यन्ति ॥ सो दानि शीघ्रशीघ्रं त्वरमाणरूपो सपरिवारो उरुविल्वाकाश्यपनदीकाश्यपगयाकाश्यपानां आश्रमं आगतो भगवां च सपरिवारो कृतभक्तकृत्यो । भिक्षुसंघो नद्यां नैरंजनायां पात्राणि निमज्जेत्वा शोधि[401a]न्ति परिमार्जन्ति ॥

अथ खलु उपसेनो ऋषिर्येन उरुविल्वाकाश्यपो तेनोपसंक्रमित्वा आयुष्मन्तं उरुविल्वाकाश्यपं गाथाये अध्यभाषे ॥

मोहं ते जुहितो अग्नि मोहन्ते सो तपो कृतो ।
यं जहे पश्चिमे काले जीर्णां व उरगो त्वचं ॥

अथ खल्वायुष्मां उरुविल्वाकाश्यपो उपसेनं ऋषिं गाथाये प्रत्यभाषे ॥

मोहं मे जुहितो अग्नि मोहं मे सो तपो कृतो ।
यं जहे पश्चिमे काले जीर्णां व उरगो त्वचं ॥

सो पि च भगवता सपरिवारो बलवशीभावे विनीतो एहिभिक्षुकाये प्रव्राजि-

1. BM °syaiva nadyām̃ nai ° çrama māpayi° M °tropetam̃ phalopetam̃ pushpopetam̃ tatrā ° ū | triñçata°. — 3. M °bhikshuhi sa° BM °jinopadarbhacivarā ca kaṭhinakā° M °ṇḍaru ca nadyām̃° B °hitā so°. — 5. BM °upasono | e° B °shyati te°.

6. M tehi tam̃ nai ° rvam̃ ukkaṭṭitam̃ | B °ukkaṭṭitam̃ | . — 7¹. M °shisyaita°. — 7². M °haivam̃ me māturukā kena viheṭhikā bha°. — 8. BM mānarū° B °lvākāçyapo nadikāçyapo ga° M °vām̃ ya sa° B °vām̃ ca pari° M °ktakṛitvā B °ktakṛityo bhi°. — 10. BM °ṇi nirmāpetvā çocim̃ti(M °socinti) pari° M °mārjati ‖ .

12. M °sena ṛishiḥ yena uruvilvākāçyapas teno ° thāye pratyabhā°. — 14. M mohan te juhuto agniḥ mohan te° B °krito yo°. — 15. BM yo ja ° jirṇṇo ca uragatvacam̃ ‖ .

16. M so pi ca bhagavatā āyushmān uru ° çyapar upasena ṛi°. — 17. M so ham̃ mam̃ juhuto agniḥ so ham̃ me° B °gni moha me°. — 18. BM °jirṇṇo ca uragatvacam̃ | . — 19. B °nīto | ehi° M °pravraji° BM °dito e°.

तो उपसंपादितो । एथ भिक्षवो चरथ तथागते ब्रह्मचर्यं ॥ तेषां भगवता एहिभिक्षुकाये आभाष्टानां यत्किंचिदृषिलिंगं ऋषिगुप्ति ऋषिध्वजं ऋषिकल्पं सर्वं समन्तरहितं त्रिचीवरं सानं च प्रादुर्भूतं सुभकं च पात्रं प्रकृतिस्वभावसंस्थिता च केशा ईर्या च सानं संस्थिहे तद्यथापि नाम वर्षशतोपसंपन्नानां भिक्षूणां । एवो आयुष्मतो उपसेनस्य अर्धत्रिंशतपरिवारस्य प्रव्रज्या उपसंपदा भिक्षुभावो ॥ इदं भगवतो प्रथमं श्रावकसंनिपातं अर्धत्रयोदश भिक्षुशतानि ॥

भिक्षू भगवन्तमाहन्सुः ॥ कस्य भगवं कर्मस्य विपाकेन आयुष्मन्ता उरुबिल्वाकाश्यपनदीकाश्यपगयाकाश्यपा त्रयो भ्रातरो महर्द्धिका महानुभावा क्षिप्राधिगमा च ॥ भगवानाह ॥ एतेषामेव भिक्षवः पूर्वप्रणिधानं बुद्धे ओरुप्तस्य कुशलमूलस्य विपाको यत्ते महर्द्धिका च महानुभावाश्च क्षिप्राधिगमाय ॥ भूतपूर्वं भिक्षवो तीतमध्वाने हस्तिनापुरे राजा महेन्द्रो नामाभूषि कृतपुण्यो महेशाख्यो धार्मिको धर्मराजा सुसंगृहीतपरिवारो दानसंविभागशीलो । तस्य दानि राज्ञो पुष्यो नाम तथागतो र्हन्सम्यक्संबुद्धो सश्रावकसंघो हस्तिनापुरे याचितको वसति ॥ कलिंगेषु सिंहपुरं नाम नगरं तत्र त्रयो भ्रातरो एकमातृका राज्यं कारयंति । तेषां दानि तत्र राज्ये रतनं उत्पन्नं ते तं रतनमादाय ततः सिंहपुरातो हस्तिनापुरमागता । तेहि तं रतनं राज्ञो महेन्द्रकस्य उपनामितं ॥ सो दानि राजा महेन्द्रको तेन प्राभृतेन तेषां भ्रातृणां प्रीतो संजातो ॥ सो आह ॥ किं वो करिष्यामि ॥ ते दानि आहन्सुः [401b] ॥ इच्छामो भगवां पुष्यो अस्माकं नगरे वर्षावासं वसेय अस्माकमनुकम्पाय । अद्यैव तेन प्राभृतेन महन्तमापूर्तं कर्तुकामा ॥ सो दानि राजा महेन्द्रको आह ॥ पुनो पि भगवां पुष्यो अस्माकं नगरे वसिष्य-

1[1]. M °kshavaç cara°. — 1[2]. M °bhagavatâ bhikshu° d ṛishiliṅga ṛishiguptiṁ ṛishiguptiṁ ṛishidhva° B °d ṛishiliṁgaṁ ṛishiguptiṁ ṛishidhva° BM °rvaṁ samananta° B °traṁ ca prakṛi° çâ iryâ ca mâna saṁ° M °çâ iryâpathâ ca sânaṁ saṁ° BM °he ‖ tadya° kshûṇâṁ e°. — 4. M °rddhatriṁçatparivârosya pra° bhâvaḥ | B °bhâvo i°. — 5. B °taṁ sarva trayodaçahi bhi° M °taṁ sarvaṁ trayodaçabhir bhikshu°.

7[1]. M bhikshur bhaga° B °hatsuḥ ‖ . — 7[2]. M °kenâyushmân uru° B °yushmatâ n° M °pânâṁ tra° BM °rddhiko mahâ°. — 9[2]. B °vaḥ purva° M °ko yan te maha° bhâvâ ca kshi° — 10. M °vo 'ti° re râjâ mahendrako nâ° BM °shi | kṛi° çilo ta°.

12. M °to rhaṁ samya° BM °ddho çrâvakasaṁghaṁ ha° B °re yâcati ko° M °re yâvantiko° B °ti ca ku°. — 14. B kuliṁdeshu° ekamâtrikâ râ° M °tṛiko râjyaṁ kârayati ‖ . — 15. M °jye ratnaṁ u° taṁ ratnaṁ âdâ °stiramâ° BM ° gatvâ te°.

16[1]. M tehi taṁ ratnaṁ râ°. — 16[2]. M °prâvṛitena°. — 17[2]. M kiṁ ka°. — 18[1]. M de dâni âhaṁsuḥ ‖ B °nsuḥ i°. — 18[2]. M icchâme bha° saṁ vaseyaṁ a° B °saṁ vaçeyaṁ a° M °nukaṁpâya ‖ . — 19. BM so dâni âha ‖ adyaiva(B °alpeca)tavena prâptena(M °prâpnuvate)na ma° M °ntaṁ praputaṁ ka° B °ntaṁ prapâḍhaṁ ka° M °kâmaḥ | . — 20[2]. M °bhagavân pushpo° B °re vaçishyati | .

ति ॥ यूयमपीमेन पुष्पेन संगृहीता भवथ ॥ तेहि दानि भ्रातृहि भगवां पुष्पो सश्रावकसंघो तहिं स्वके नगरे याचितो । भगवां तत्रैव वर्स्सं वुत्थो परिनिर्वृतो । तेहि भगवतो पुष्पस्य निर्वृतस्य शरीरपूजा च स्तूपो च कारितो ॥

राज्ञो महेन्द्रस्य महिं प्रशासतो
धर्मेण ज्ञानं च समादायवर्तिनो ।
त्रयो भ्रातरो आसि समानचारिणो
पुत्रा च दारा च तदानुवर्तका ॥
ते एकदा सुसमानचारिणो
धर्मेण वै ऐश्वरियं अकासि ।
प्रभूतभोगा रतनानुबद्धा
ताव बहूनि वर्षाणि तोषये ॥
ते एकराज्यसमानभोजना
बुद्धं अदृशिन्सु द्विपदानमुत्तमं ।
नक्षत्रनामो . . . पारमीं गतो
स्वयशक्तितो देवमनुष्यपूजितो ॥
परिनिर्वृते कारुणिकस्मिं शास्तुनि
स्तूपं अकरिम्ह वयं सप्रज्ञा ।
सपुत्रदारा सह ज्ञातिबान्धवैः
आर्या च श्रेष्ठा नगरस्मिं आत्मनो ॥
हस्तीहि अश्वेहि रथेहि पत्तिहि
नृत्येन गीतेन च वादितेन च ।

1[1]. B yûyaññm apimâni pu° M °pimâni pu°. — 1[2]. M °bhagavân pushpo çrâ° B °shpo çrâva ° tahi sva° BM °to bha°. — 2. M °gavân tatraiva vâsam° B °traivâsam° BM °vṛito te°. — 3. M °bhagato pure vaçishyati yûyam apimâni pushpasya parinirvṛi° B °po ca karito râ°. — 4. BM °hendrakasya ° dharmeṇa jñâye ca upâdâya vartti(M °vatti)no tra°.

6. M °putro ca dâ ° rttati B °rttakâ te°. — 8. BM °samânakâriṇo dharmeṇa te aiçvaryam(M °ryyam) âkâriyo(M °ye) pra°. — 10. M °bhoge ratnâni bandhanâni tâm bahunâ varshâpi toshaya B °nâni bandhanâni | tâ bahunâ varshâm pi toshaye te°.

12. B °bhojakânubandham addetsuḥ dvi° M °janânubandham addaçetsuḥ dvi°. — 14. BM °kshatranâ(B °trâṇâ)mo paramâm gato suçaktato de°.

16. M °nivṛite° B °rvṛito kâ° BM °stuno stû° B °pam aparcha vayam saprajño sapu° M °pam apare bhaveyam | saputro saprajño pu°. — 18. M putradâro mahatjñâtibândhavo âyâ ca çreshṭho nagare â° B °dâro mahajñâtibândhavâ âyâva çre ° gare â°. — 20. B asti° M hastihi a° B °açvahi ra° BM °tyena ca gi°.



IMPRIMERIE NATIONALE.

गन्धेन माल्येन विलेपनेन च
पूजां अकरिम्ह वयं महर्षिणो ॥
ते स्तूपपूजाय फलेन संप्रति
कल्पां न एम द्वानवति दुर्गां ।
तेनैव कर्मेण महामुने . . . .
सर्वे स्म दान्ता तव धीर शासने ॥

समाप्तं आयुष्मन्तानां उरुविल्वाकाश्यपनदीकाश्यपगयाकाश्यपानां जातकं ॥

भगवां उरुविल्वाकाश्यपस्य आश्रमातो महता भिक्षुसंघेन सार्धं अर्धत्रयोदशभिर्भिक्षुशतैर्महर्षिणामाश्रमपदं धर्मारण्यं गतो ॥ तहिं दानि सप्त जटिलशतानि प्रतिवसन्ति सर्वाणि चतुर्ध्यानलाभीनि पंचाभिज्ञानि सविंशशतवर्षिकाणि जातीये सर्वाणि च परिपक्वकुशलमूलानि चरमभविकानि ॥ भगवांस्तेषां अनुग्रहार्थं तहिं आश्रमपदं गतो । तेषां भगवां जटिलानां धर्मपदेषु सहस्रवर्गं भाषति ॥

सहस्रमपि वाचानां अनर्थपदसंहिता ।
एका अर्थवती श्रेया यां श्रुत्वा उपशाम्यति ॥
सहस्रमपि गाथानामनर्थपदसंहिता ।
एका अर्थवती श्रेया यां श्रुत्वा उप[402a]शाम्यति ॥
यो शतानि सहस्राणां संग्रामे मनुजा जये ।
यो चैकं जये आत्मानं स वै संग्रामजित् वरः ॥
यो जयेत सहस्राणां मासे मासे शतं शतं ।
न सो बुद्धे प्रसादस्य कलामर्घति षोडशीं ॥

1. M mályena ca vi° B °pújá a° M °pújá akári bhaveyaṁ° B °ṇo te°. — 3. M te túpapújá° B °saṁparikalpánamena dvá° M °saṁparikaṇamena dvá° BM °durga ti°. — 5. B tinai° M tinaivaṁ ka° mune | sarve samadá° B °mune sarve saṁsmadáṁtá ta° BM °sare ‖.

7. M iti çrimahávastuavadáne áyu° takaṁ samáptaṁ ‖. — 8. M atha bhagaván uru° ghena sá° ṇyaṁ gataṁ | B °ṇyaṁ gato ta°. — 9. BM °santi | sarváṇi° M °viṁçaçatavarshakáni já° B °rváni ca paripakkaku°.

11. M bhagaváṁ teshám anu° çramapato | B °pade gato te°. — 12. M °gaván jaṭi° B °sahavargaṁ° M °sravarshaṁ bhá°. — 13. M °rthaparisaṁ° BM °hitánáṁ |. — 14. B ekam arthaṁ vargi çre° M ekam arthapadavargi çre° B °tváṁ upa°. — 15. M °sram api sahasram api gádhyánáṁ artha° BM °hitá e°.

16. B ekárthaṁvani çre° M °kárthavati çre°. — 17. B °ṇáṁ saṁṭháme° M °ṇáṁ saṭháme°. — 18. BM °jaye cátmánaṁ sarve saṁ° M °grámajid varaḥ | B °raḥ yo°. — 19. B °jayet saha°.

यो जयेत सहस्राणां मासे मासे शतं शतं ।
न सो धर्मे प्रसादस्य कलामर्घति षोडशीं ॥
यो जयेत सहस्राणां मासे मासे शतं शतं ।
न सो संघे प्रसादस्य कलामर्घति षोडशीं ॥
यो जयेत सहस्राणां मासे मासे शतं शतं ।
सो च संपन्नशीलानां कलां नार्घति षोडशीं ॥
यो जयेत सहस्राणां मासे मासे शतं शतं ।
न सो स्वाख्यातधर्माणां कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो बुद्धे प्रसादस्य कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो धर्मे प्रसादस्य कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो संघे प्रसादस्य कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो ध्यानप्रसादानां कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो सम्पन्नशीलानां कलामर्घति षोडशीं ॥
मासे मासे कुशाग्रेण बालो भुंजेय भोजनं ।
न सो स्वाख्यातधर्माणां कलामर्घति षोडशीं ॥
यो च वर्षशतं जीवे अग्निपरिचरं चरेत् ।
पत्राहारो छवावासी करोन्तो विविधं तपं ॥
यो चैकं भावितात्मानं मुहूर्तमपि पूजयेत् ।
सा एकपूजना श्रेयो न च वर्षशतं हुतं ॥
यत्किंचिदिष्टं च हुतं च लोके

1. B °jayet saha°. — 2. B °dharmaṁ pra° M °dharmapra°. — 3. B °jayecca sa°. — 4. M *passe les lignes* 4-7. — 5. B °jayetta sa°.

6. B so ca saṁ ° çîlânâ ka°. — 7. B °jayet saha°.

12. B °dharmaprasâ kalâ°.

16. B *passe les lignes* 16-17. M °prasâdena ka ° çiṁ mâ°. — 17. M °bhuñjati bho°. — 18. B °çilâyâṁ ka°. — 20. M na mo svâ ° dânaprasâdena ka°.

21. M yo ca vavarsha ° ve agniṁ pari°. — 22. M paḍhâhâro cchavovâsi ka° BM °ronti vividhaṁ°. — 23. M °bhâvitânsânaṁ°. — 24. BM so eka°. — 25. BM yat kiñcit teshâṁ bahukaṁ ca loke sarvaṁ jayati puṇyaprekshi(M °puṇyaḥ prekshi) | .

संवत्सरं यजति पुण्यप्रेची ।
सर्वं पि तं न चतुर्भागमेति
अभिवादनं उज्जुगतेषु श्रेयं ॥
यो च वर्षशतं जीवे दुःशीलो असमाहितः ।
एकाहं जीवितं श्रेयं शीलवन्तस्य ध्यायतो ॥
यो च वर्षशतं जीवे कुशीदो हीनवीर्यवान् ।
एकाहं जीवितं श्रेयो वीर्यमारंभतो दृढं ॥
यो च वर्षशतं जीवे अपश्यं बुद्धशासनं ।
एकाहं जीवितं श्रेयो पश्यतो बुद्धशासनं ॥
यो च वर्षशतं जीवे अपश्यं धर्ममुत्तमं ।
एकाहं जीवितं श्रेयो पश्यतो धर्ममुत्तमं ॥
यो च वर्षशतं जीवे अपश्यं उदयव्ययं ।
एकाहं जीवितं श्रेयो पश्यतो उदयव्ययं ॥
यो च वर्षशतं जीवे अपश्यं अच्युतं पदं ।
एकाहं जीवितं श्रेयो पश्यतो अच्युतं पदं ॥
यो च वर्षशतं जीवे अपश्यं अमृतं पदं ।
एकाहं जीवितं श्रेयं पश्यतो अमृतं पदं ॥

ते च दानि भगवता वशवशी[402b]भावे विनीता सर्वे च ते परिनिर्वृता । तेषां भगवां शरीरपूजां च कृत्वा स्तूपां च धर्मारख्यातो अजपालस्य न्यग्रोधमागतो ॥

भगवां सम्यक्संबुद्धो यदर्थं समुदागतो तदर्थं अभिसंभावयित्वा उरुविल्वायां विहरति नद्या नैरंजनायास्तीरे अजपालस्य न्यग्रोधमूले अचिराभिसंबुद्धो ॥ तेन

2. B sarvavitaṁ° M sarve ci taṁ na catubhârgam e°. — 5. M °jîvita çreyo çî° B °sya vâyato | M °sya vâyataḥ ‖ .

6. M °ryyavân ekâ°. — 7. M °jîvita çre°. — 8. M °çâsane | *et passe la ligne* 9.

11. B °çreshṭaṁ pa°. — 12. M °udakavyayaṁ ‖ . — 13. BM °vita çre° M °udakavya°. — 14. B °cyutapadaṁ | M °cyutavyayaṁ | . — 15. BM °jîvita çre ° cyutapadaṁ | .

16. M °ve apaçyam amṛitapadaṁ e°. — 17. M °jîvita çreyo paçya ° mṛitapadaṁ ‖ . — 18. M te dâ° B tena dâ° M °gavatâ vaçibhâvavinîtâḥ sarve ca tâṁ pa° B °nîtâ | sarve° rvṛitâ te° M °rvṛitâs teshâṁ°. — 19. M °bhagavatâ çari°.

21. BM bhagavân(B °vâ) saṁmya ° harati | (M °ti) nadyaṁ nai°. — 22. M °punas samayena râjño çreshṭhiyasya bimbiçârasya brâ° B °jâcâryasya u ° gatasya râtryâ pratyushakâ° BM °kshaṇâni vâcâ(B °câvi)vista°.

खलु पुनः समयेन राज्ञो श्रेणियस्य बिम्बिसारस्य ब्राह्मणो पुरोहितो राजाचार्यो उपरिप्रासादवरगतो रात्र्या प्रत्यूषकालसमये द्वात्रिंशन्महापुरुषलक्षणानां वाचाविस्तरेण स्वाध्यायं करोति ॥ अश्रोषीत्खलु राजा श्रेणियो बिंबिसारो ब्राह्मणस्य पुरोहितस्य राजाचार्यस्य उपरिप्रासादवरगतस्य रात्र्या प्रत्यूषकालसमये द्वात्रिंशन्महापुरुषलक्षणानां वाचाविस्तरेण स्वाध्यायं करोन्तस्य श्रुत्वा च पुनरस्य भगवतो स्मृति उदपासि ॥ अहो पुनर्मे विजिते बुद्धो भगवां उत्पद्ये तं चाहं भगवन्तं पश्येयं दृष्ट्वा च पुनर्मे प्रवृत्ति प्रसीदिय प्रसन्नचित्तो च नं पर्युपासेयं सो च मां भगवां धर्मं देशेय तस्य चाहं धर्मं श्रुत्वा आजानेयं ॥

अथ खलु राजा श्रेण्यो बिंबिसारो तस्यैव रात्र्यात्ययेन अन्यतरं पुरुषमामंत्रयति ॥ एहि त्वं पुरुष क्षिप्रमेव भद्राणि यानानि योजापेहि युक्तानि च मे प्रतिवेदेहि ॥ साधु महाराज त्ति स पुरुषो राज्ञो श्रेणियस्य बिंबिसारस्य प्रतिश्रुत्वा क्षिप्रमेव भद्राणि यानानि योजयति युक्तानि च तं प्रतिवेदयति । युक्तानि ते महाराज भद्राणि यानानि यस्येदानिं कालं मन्यसे ॥ अथ खलु राजा श्रेण्यो बिम्बिसारो अन्यतरं भद्रं यानमभिरूहित्वा महता राजर्द्धा महता राजानुभावेन महतो जनकायस्य हक्कारहिक्कारभेरीमृदंगपणवशंखसन्निनादेन राजगृहातो नगरातो निर्यात्वा येनान्यतरा उद्यानभूमी प्रायासि ॥ अथ खलु राजा श्रेण्यो बिम्बिसारो यावतिका यानस्य भूमि तावतकं यानेन यात्वा यानातो प्रत्योरुह्य पद्सा येव तां उद्यानभूमिं अनुचंक्रमन्तो अनुविचरन्तो निषीदे सुवर्णमये पर्यंके प्राचीनाभिमुखो स्त्र्यागारपरिवृतो अमात्यपारिषद्यपुरस्कृतो ॥ अथ खलु [403a] रा-

3. M °ṇiyo bimbiçárasya brá ° sádavaraçatasya rátryá° B °tryá pratyushaká° M °trimça mahá° BM °kshaṇáni vácá° M °rotasya çru° BM °gavantam̃ smṛi°.

6. M °jiteshu buddho bhagaván utpadya tam̃° B °tpadya tam̃° B °vṛittam̃ prasi° M °vṛittam̃ prasideyam̃ prasannacittoçcemam̃ paryyúpá° B °tto va nam̃ paryu° BM °seyam̃ | so° M °mám̃ bhagavan dharmam̃° BM °çeyam̃ tasya°. — 9. M °çreṇyá bimbiçáro° rushasyam á°. — 10. M °rusham̃ kshipram evam̃ bhadráṇi yojáyehi yánáni yu° B °dráni yánáni yojáyehi muktá° BM °dehi sá°.

11. BM °hárájenti(M °nti | ) sa pu° B °rushá rájño° M °jño bim̃biçárasya° — 12. M yuktáni ca mahá ° dráni yá° BM °náni | yasye(M °syi)dá° M °kála ma°. — 13. M °bimbiçáro° dram̃ páram abhi° B °bhávena mahatá janaká° BM °sya hikkárapikkára(B °pikkáram̃) bhe° M °khasam̃ninádе ° bhúmim̃ práyási || B °práyosi ||.

16. BM °mbisá(M °mbiçá)ro yávati(M °vatti)kam̃ yánasya bhúmim̃ távatti(M °tta)kam̃ yáne° M °tvá yátáto pratyárúhya° B °dasá ye ca tám̃° M °dasá yeva tán udyá° BM °nishide | su ° tyapa(M °pá)rishadyápu°. — 19. M °jño bim̃biçála ° nagaram̃ abhivilokayam̃ tasya tasya rájagrihe° BM °rvatáni ca pushkiriṇám̃(M °shkariṇím̃) ca pau° B °pauráṇá cá° M °cáryam̃ ca mṛitá yetám̃ kálagatám̃ samanu° B °tpadya yonimanasikáro udyá°.

स्रो बिम्बिसारस्स राजगृहं नगरमभिविलोकयन्तस्स राजगृहेयकानि च पर्वतानि पुष्किरिणीं च पौराणां चार्यकां मृतां प्रेतां समनुस्मरन्तस्स कामेषु जुगुत्सुनो उत्पद्ये योनिसो मनसिकारो ॥

उद्यानभूमितो निर्यात्वा अङ्गानां राष्ट्रवर्धनो ।
पर्यंकस्मिं निषीदेसि अवदातसुवर्णमण्डले ॥
तंत्रिघोषाभिनादिता सम्यक्क्षाक्षप्रबोधना ।
पुष्पिता साला तस्मिं काले संपन्नकुसुमिता वरा ॥
व्यालमृगानुविचीर्णा गोलांगुलनिषेविताम् ।
पर्वतां स संवीक्षन्तो पृथुसिंहनिषेविताम् ॥
निषीदित्वाप्राङ्मुखो राजा पौराणानि अनुस्मरन् ।
अश्रुपूर्णेहि नेत्रेहि इमां गाथामभाषिषु ॥
तिष्ठे यं पाण्डरो गिरि कैलासवत्तथैव विपुलो ।
अथ मे पितरो पितामहा प्रेता कालगता अवीततृष्णा ॥
वरा रम्या वना विचित्रा पुष्किरिण्यो शिलोच्चयो ।
यानीमानि गमायेन्सुः कां नु ते दिशतां गता ॥
तथैवेमानि राष्ट्राणि इमा पृथुस्रवन्तियो ।
यानीमानि गमायेन्सुः कां नु ते दिशतां गता ॥
तथैवेमानि वस्त्राणि इमा निष्का सकुण्डला ।
यानीमानि गमायेन्सुः कां नु ते दिशतां गताः ॥
इमा पुष्किरिणी रम्या नानाद्विजनिकूजिता ।

4. M °bhûmito° BM °ryâtvâ magnânâṁ râshṭra° B °rddhana paryaṁ°. — 5. BM °shiditvâ ava ° ṇḍalaṁ tri°.

6. B trighoshe bhinadi° M trishyâme abhinandite saṁmya° BM °bodhana pu°. — 7. M pushpitâ çâlo tasmiṁ° B sâlâ tesmiṁ ° varâ vyâ° M °sumitâ valâ vyâ°. — 8. M vyâramṛi° BM °nuvicaribhâgo naṁgula(M °bhâgemaṁgu)nishevitâ parva°. — 9. B °samaṁ vi° M °samavi°. — 10. BM nishidet | prâṅmukho râjâ pau° M °rânâni anu° B °râṇâṁni anu° BM °smaranto a°.

11. M °bhâshatha ‖. — 12. B °ṇḍarâ giri kailâça parvata | tathai° M °kailâçavat ta° BM °pulo a°. — 13. M artha ma pitâmaahâ° B °me pitarâ pitâma° BM °tṛishṇâ va°. — 14. M varo ramyâ ° pushkariṇyaçilo° B °shkiriṇyaçilo° BM °ccayo yâ°. — 15. B yânimoni gamâyetsuḥ ‖ kâni te di° M yânimâni nigametsuḥ ‖ kâni te di° BM °gatâ ta°.

16. M tathaiva imâni° BM °ṇi imâṁ pṛi° M °nti | yo yâ°. — 17. BM yâni(B °nî)mâni gamâyensuḥ(B °tsuḥ | ) kâ nu te di° M °gatâḥ B °gatâ ta°. — 18. M tathaivam imâni vastrâni imâ tikâṁ çakuṇḍalâṁ B °nishkâṁ sukuṇḍalâṁ | . — 19. BM yânimâni gatâyetsuḥ kâṁ(M °kâ) nu°. — 20. BM imâṁ pu° M °shkiriṇîṁ ramyâ nânaṁ dvi°.

पुण्डरीकेहि संछन्ना कुमुदसौगन्धिकेहि च ।
ये च ते अत्र स्नायेन्सुः कां नु ते दिशतां गताः ॥
तथैवमासना रम्या दिव्या हरितशाद्वला ।
आसन्नोदकसंछन्ना शीतच्छाया मनोरमाः ।
यानि ते चात्र गमायेन्सुः कां नु ते दिशतां गताः ॥
तान्येव प्राणिशतानां निवेशनानि पर्वता ।
इमे च मे प्रचारिता अद्य जनमपश्यतो ॥
शून्यता च मे आख्यायन्ति दिशा पि मे नुचारिता ।
एवं मर्त्यजीवितं किंस्य परीत्तं च दुःखसंयुतं ॥
अनन्तरं जीवितस्य मरणं मरणं ध्रुवं ।
जातस्यामरणं नास्ति एतद्धर्मो हि प्राणिनो ॥
गच्छति खेदेन प्राणी प्रतिपन्नो क्वचिज्जनो ।
रात्रिंदिवं च यान्तीह यमदूता शासनाहरा ॥

अथ खलु अन्यतरस्य राजामात्यस्य एतदभूषि ॥ राज्ञो किल श्रेण्यस्य बिंबिसारस्य दौर्मनस्यमुत्पन्नं को नु खल्वस्यात्पर्यायो येनाहं राज्ञो श्रेण्यस्य बिम्बिसारस्य दौर्मनस्यं प्रतिविनोदयेयं ॥ अथ खलु तस्य राजामात्यस्यैतदभूषि ॥ राज्ञो [403b] किल श्रेण्यस्य बिंबिसारस्य राजगृहं नगरं प्रियं च मनापं च ।

1. M °ndhikedhikehi ca | . — 2. BM yena te atra(M °trâ) snâyetsuḥ kâ nu°. — 3. BM °haritasâhvayo | . — 4. BM °nnodakasaṁ° M °ramâ | . — 5. M yâni câtra gatâyetsuḥ kiṁ nu° B °mâyetsuḥ kiṁ nu°.

6. B nânye varaprâṇiniveçanâni te parvatâ | M nânyevaṁ prâṇiniveçatâni varaṇâni te ca parvataḥ | . — 7. B ime te ca pracârâtâm eva adya janatâm apaçyato M °pravâro tâṁ adya jatmam apaçyataḥ | . — 8. B çunyatâ ca me brâhmaṇâkhyâyati deçâpi naṁ te nucaritaṁ | M çunyatâ ca me brâhmaṇâshṭhâryyati diçâpitaṁ tena caritâṁ || . — 9. B °martyâna jîvitaṁ | kiṁ saraṁ parittaṁ° M °martyâ janajîvanaṁ kiṁ saraṁ paritte ca° BM °duḥkhena saṁ° B °taṁ a°. — 10. BM °ntaratnasya jîvitaṁ ma(B °maraṇa)-raṇaṁ dhru°.

11. M °rmâbhi prâṇinâṁ | B °ṇinâṁ | . — 12. B gacchati khalena° BM °prâṇino pratipanno ca ko vijâne râ°. — 13. BM °triṁ ca di ° yânti(B °nti)ha râjadûtâ viya çâsu-(B °çâha)nâ°. — 14[1]. M °tyasyaita°. — 14[2]. M °kila manyasya bimbiçâlasya daumanasya° B °lvasyâtyaparyâyo yenahaṁ° M ° lvasyâparyâyenâhaṁ ° mbiçâlasya daumanasyaṁ° daneyaṁ || .

16. M °syaitad abhavat rajño°. — 17. M °biṁbiçâlasya râjagrihe nagaraṁ ca pri° BM °manopaṁ ca | .

यन्नूनं अस्याहं पुरतो राजगृहस्य नगरस्य वर्णं भाषेयं ॥ अथ खलु सो राजामात्यो राजं श्रेण्यं बिंबिसारं गाथाये अध्यभाषि ॥

पर्वता इमे सत्तीना इमे रम्या शिलोच्चया ।
ये इमे राजगृहस्मिं सिक्ता दिविजेन वारिणा ॥
भिन्नकटका च श्रवन्ति . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . . . .

अथ खलु राजा श्रेण्यो बिम्बिसारो तं राजामात्यं अपसादये ॥ अस्ति नाम त्वं मोहपुरुषो यं यदेव वयं विगर्हाम तदेव त्वं प्रशंसितव्यं मन्यसि ॥ अथ खलु राज्ञो श्रेण्यस्य बिम्बिसारस्य भूयस्या मात्रया कामेषु व्याकुत्सना उत्पद्ये चित्तस्य दुःखदौर्मनस्यं योनिसो मनसिकारो ॥ अथ खलु ब्राह्मणस्य पुरोहितस्य राजाचार्यस्यैतदभूषि ॥ राज्ञो किल श्रेण्यस्य बिंबिसारस्य दुःखदौर्मनस्यमुत्पन्नं को नु खल्वस्यात्यर्थायो येनाहं राज्ञो श्रेण्यस्य बिम्बिसारस्य दुःखदौर्मनस्यं प्रतिविनोदयेयं ॥ अथ खलु ब्राह्मणस्य पुरोहितस्य राजाचार्यस्य एतदभूषि ॥ राज्ञो खलु श्रेण्यस्य बिम्बिसारस्य बुद्धो भगवान्प्रियो मनापो च यं नूनाहं तस्य पुरतो बुद्धस्य वर्णं भाषेयं ॥ अथ खलु ब्राह्मणो पुरोहितो राजाचार्यो राजानं श्रेणियं बिम्बिसारं गाथाये अध्यभाष ॥

लाभो स्ति राष्ट्राधिपते शिरीमतो
आंगस्य राज्ञो मगधाधिपस्य ।
यस्योदपासि विजिते तथागतो
विघुष्टशब्दो हिमवां व पर्वतो ।

1[1]. B nûnam° M yan nûnam asyâ° B °garasya bhâ° — 1[2]. M °ṇyam bimbiçâlam gâ°. — 3. BM atramâlino ime ramyâ° M °ccaye |. — 4. B ye i râjagṛihesmi parvatâ si° M °gṛihesmim parvatâ siktâ divivije°. — 5. M °nnakâkâ ca çra° BM °nti kuñja(M °jara)râ jâtâ(M °to) girinâgâ ca bho(M °ca parvatâ nabhâ) çobhati uttamam giri(M °ttama çivi)hvayam(M °yam ‖) obhâsamaṇidharmadhâriṇo ‖.

7[1]. M °mbiçâlo tam° B °apamâdaye ‖. — 7[2]. M °rusham yad eva vayam vigrahâmatam | tad eva tvam° B °vigarbhâma tam tade° vyam anyasi ‖. — 8. M °mbiçâlasya bhû° mâtrâye kâ° B °dyeccitta° M °daumanasyam°. — 10. M °ṇasya râjasya etad a°.

11. BM °kila çreṇyasya bimbisâra(M °bimbiçâla)sya duḥkhadaumanasya u(M °syam u)tpannam(M °nnam | ) ko nu khalvasyâtya pa° M °ṇyasya bimbiçâlasya duḥkhadaumanasyam°. — 13. M °mbiçâlasya buddho° B °gavâ priyo° nûnâm ta°. — 15. M °câryyaḥ râjânam° mbiçâlam gâ° BM °ye pratyabhâ°.

17. BM lâbho stu râshṭrâ° çirimato aṅga(M °aṅga)sya râjño° M °pasyâ ya°. — 19. M yasya udupâ° B °syodupâsi° M °vidyushṭa° B °himavân ca parvato M °vâm ca parvato ‖.

शीलेन क्षान्त्या तपसा उपेतो
लोकान्तको उषितब्रह्मचर्यो ॥
समागम्य सहस्राणि शतानि नयुतानि च ।
संप्राप्नोति अमृतं शान्तं योगक्षेममनुत्तरं ॥

अथ खलु राजा श्रेणियो बिम्बिसारो ब्राह्मणं पुरोहितं राजाचार्यं गाथाये प्रत्यभाषे ॥

प्रियं मे कीर्तये राज्ञे प्रियं मे कीर्तये प्रिय ।
प्रियस्य बुद्धस्य लोकार्थचरस्य ब्राह्मण ॥
ददामि ते ग्रामवराणि षोडश
युक्तानि आजान्यरथानि च दश ।
दासीशतं च गवां शतं च
प्रियस्य बुद्धस्य यशो प्रकीर्तये ॥

अथ खलु भगवां मगधेषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धमर्धत्रयोदशभिर्भिक्षुशतैः येन मगधानां राजगृहं नगरं तदनुसारि त[404a]दनुप्राप्तो तत्रैव विहरति अन्तगिरिस्मिं यष्टीवने उद्याने ॥ अश्रोषीद्राजा श्रेणियो बिम्बिसारो ब्राह्मणस्य पुरोहितस्य राजाचार्यस्य । भगवां किल मगधेषु चारिकां चरमाणो महता भिक्षुसंघेन सार्धं त्रयोदशभिक्षुशतैर्येन मगधानां राजगृहं नगरं तदनुसारि तदनुप्राप्तस्तत्रैव विहरति अन्तगिरिस्मिं उद्याने यष्टीवने । श्रुत्वा पुनः अन्यतरं राजामात्यमामन्त्रयसि । भो भणे अमात्य भगवतो बुद्धस्य प्रत्युद्गमनं गमिष्यामि राजगृहं अलंकारापेहि भद्राणि च यानानि योजापेहि सर्वेहि च राजगृहकेहि ब्राह्मणगृहपतिकेहि सर्वेहि च शिल्पायतनेहि सर्वेहि च श्रेणीहि मया सह भगवतो

1. BM °kshāntiya ta ° shitavāṁ brāhmacaryaṁ(M °ryyaṁ) | . — 3. M °yutāni nayutāni ca | B °ca saṁ°. — 4. M °prāpto ti a ° yogacchemam anuttamaṁ ‖ . — 5. M °mbiçāro°.

7. M °jye priyaṁ me priyasya° B kīrttayo rājye priyaṁ me kīrttaye priyasya°. — 8. BM °lokārthaṁ ca ° hmaṇa da°. — 9. B °dāti te | grā° M °dāti me grā° B °ṇi yo upayuktā° M °ājanyorathā°.

11. BM dāsiçataṁ gavāṁ° B °ddhasya pra° M °ddhasya na so pra°. — 13. B °sārddhaṁm arddhatra° M °magadhāṁ rā ° prāptas tatrai ° ti | antargirismiṁ° B °yashṭivane°. — 15. M çrutvā punar açro°.

16. M bhagavān kila ° rddhaṁ arddhatra ° r yena magadhāṁ rā ° nayaraṁ ° prāptaḥ tatraivaṁ vi° BM °ti | a ° shṭivane çru°. — 18. M °punar anya ° ntrayesi | . — 19. M °ṇe amātyo bhaga° B °laṁkāropehi° M °bhadrāni ca jānāti yojāyehi sarvehi ca rājagṛihakehi ca brā ° tikehi ca sarvehi ca çi ° çreshṭhihi mayā saha°.

बुद्धस्य प्रत्युद्गमनं गन्तव्यन्ति ॥ साधु महाराज त्ति स राजामात्यो श्रेण्यस्य बिंबिसारस्य प्रतिश्रुत्वा क्षिप्रमेव भद्राणि यानानि योजापेसि राजगृहे घोषणां कारापेसि चत्वरशृंगाटकचत्वरापणमुखेषु ॥ बुद्धो भगवां राजगृहे अन्तगिरिस्मिं यष्टीवनं उद्यानं समनुप्राप्तो तत्र सर्वेहि भवन्तेहि राज्ञा श्रेण्येन बिम्बिसारेण सार्धं भगवतो प्रत्युद्गमनं गन्तव्यं ॥

ते दानि घोषणां श्रुत्वा क्षिप्रमेव राजकुलद्वारे सन्निपतिता कुमारामात्यपारिषद्याः पुरोहितप्रमुखा ब्राह्मणाः श्रेष्ठिप्रमुखो निगमो सार्थवाहप्रमुखो वणिजग्रामो सर्वा च राजगृहका अष्टादश श्रेणीयो । तद्यथा चक्रिकतालिकगान्धर्विका नटनर्तकऋल्लमल्लपाणिस्वरिका शोभिका लंघका कुंभतूणिका वेलंवका द्विस्वलभाणका पंचवटुका गायनका गुणवर्ता ताण्डविका चेतयिका गणिका हास्यकारका भेरिशंखमृदंगपाटहिका तूणपणववीणावल्लकीएकादशायेल्लवादका अन्ये च बहुवादकरा राजकुलद्वारे सन्निपतेन्सुः सर्वायो च श्रेण्यो । तद्यथा सौवर्णिकहैरण्यिकप्रावारिका मणिप्रस्तारका गन्धिका कोशाविका तैलिका घृतकुण्डिका गौलिका दध्यिका कार्पासिका खण्डकारका मोदककारका कंडुका समितकारका शक्तुकारका फलवाणिजा मूलवाणिजा चूर्णकुट्टा गन्धतैलका अट्टवाणिजा आ[404b]विडका गुडपाचका मधुकारका शर्करवाणिजा ये च अन्ये पि व्यवहारिका सर्वा च शिल्पायतना । तद्यथा लोहकारका ताम्रकुट्टा सुवर्णकारा तद्वुकारा प्रचोपका

1. B °mahârâjanti sa° M °hârâjânti sarâjâmâtyâ çreṇyasya bimbiçârasya prati° B °pram evam eva bha° M °bhadrâni yâ° BM °çriṁgâṭa(B °ta)ke çrama(M °çrava)ṇabrâhmaṇamu°. — 3. M °ddho bhagavân râja° B °ntaçirismiṁ° M °shṭivane u° BM °dyâne sama° M °prâptaḥ tatra ° ntehi râjño çre ° mbiçâlena sâ°.

6. M °dvâre saṁnipa° B °kumârâmâtyâ pâ ° hitapramukhânâḥ çreshṭipramukhâ ni° M °shṭhipramukhâ ni ° hapramukhâ vanijagrâ° B °hapramukhâ vaṇijapramukhâ grâ° M °sarvâṁ ca°. — 8. BM °krikaṁvetaddika(M °tarddikaṁ) gandha ° çobhikâ kelukaṁ-kutûṇikâ va(M °kâ ca)ḍavakâ olkha(M °otkha)lâ bhâ° B °rttâ taṇḍa° M °rttâ tâṇḍuvikâ vetayi° BM °ṇikâ rantapâyakaṁ bhe° M °mṛidaṅgapâṭabhikâ tûnapapaṇavavi° B °vîvallakî-ekâçiyellavâyakâ anye° M °ekâçâyelâvâyanto | anye ° huvâdyekaro râ° B °dyakaro râ° M °re saṁnipa° BM °tetsuḥ sa ° çreṇyâ | .

12. BM °ṛṇike hai° M °ṇyikaprâçâvâri° BM °golikâ dhânyikâ kârpâ(B °rpâ | )si ° kaṁdukâ samitakâ(M °tukâ çaktukâ)rakâ phala(M °lakârakâ) vâṇi(B °vâri)jâ mûlapâvâ-(M °laparâ) cûrṇṇakuttâ gandha° B °tailakâ aṭṭiyânikâ(?) âcaṁbikaguḍapâcakâ mâdhu° M °tailakâ aṭṭivânikâ âvaṁbikâ guḍapâcakâ khaṇḍapâcakâ madhupâcakâ çarka ° sarvâṁ ca çi°.

17. M °mrakârakâ suvarṇṇakârakâ tadvakârâ pracoḍakâ ro° B °rṇṇakârâ tadvakârâ pracco° M °trapushakârakâ çiçapiṭṭakâ yantra° B °trapukârakâ çiçapiṭṭakâ jatukârakâ mâlâ° M °lâkârâ purimakârâ kumbhakârakâ carmakârakâ kaṇḍukâro caruṭâ tandravâyavo ravocakâ rakta° B °ndukârâkâ caruṭâ tamtravâyavocakâ rakta° M °sûpakâ stanevâyâ citrakâro

रोचणा त्रपुकारका सीसपिट्टकारा यन्त्रकारका मालाकारा पुरिमकारका कुंभकारका चर्मकारा कन्दुकारका वस्त्रतन्तवायका रक्तरजका सूचका तूलवाया चित्रकारा वर्धकिरूपकारका कालपात्रिका पेशलका पुस्तककारका नापिता कल्पिका छेदका लेपका स्थपतिसूत्रधारका उत्तकोष्ठकारका कूपखानका मृत्तिकावाहका काष्ठवाहका वल्कलवाणिजा शंखवाणिजा वंशवाणिजा नाविका ओडुम्पिका सुवर्णधोवका मोट्टिका एते चान्ये च उच्चावचा जनता हीनोत्कृष्टमध्यमा सर्वे राजकुले संनिपतेन्सु: ॥

अथ खलु स राजामात्यो संनिपतितं जनकायं विदित्वा भद्राणि यानानि योजापयित्वा येन राजा श्रेण्यो बिम्बिसारस्तेनोपसंक्रमित्वा राजानं श्रेणियं बिम्बिसारमेतदवोचत् ॥ युक्तानि महाराज भद्राणि यानानि महाजनकायं च सन्निपतितं । यस्येदानि देव कालं मन्यसि ॥ अथ खलु राजा श्रेण्यो बिम्बिसार: भद्रं यानमभिरुहित्वा मागधकेहि ब्राह्मणगृहपतिकेहि सार्धं द्वादशेहि नयुतेहि संपरिवृतो महता राजऋद्धीये महतो जनकायस्य हक्कारहिक्कारभेरीमृदंगमरुपटहशंखसंनिनादेन राजगृहातो नगरातो निर्यात्वा येन अन्तगिरिस्मिं यष्टीवनमुद्यानं तेन प्रयासि ॥

अथ खलु राजा श्रेण्यो बिम्बिसारो यावदेव यानभूमिस्तावदेव यानेन यात्वा यानातो प्रत्योरुह्य पद्सा येव येन भगवांस्तेनोपसंक्रमित्वा भगवत: पादौ शिरसा वन्दित्वा एकान्ते निषीदेत् ॥ अप्येकत्या भगवता सार्धं संमोदनीयां कथां संमोदयित्वा सारायणीयां कथां व्यतिसारयित्वा एकान्ते निषीदेन्सु: । अप्येकत्या भगवतो स्वकस्वकानि मातापितृकानि नामगोत्राणि अनुश्रावयित्वा एकमन्ते निषीदेन्सु: । अप्येकत्या येन भगवांस्तेनांजलिं प्रणा[405*]मयित्वा

ca vakirûpakârakâ kâlapattikâ çelâlakâ paustavakârakâ nâvikâ kalpakâ cchâdakâ le* B *sûcakâ tunavâyâ citrakârâ cacakirû * kârapatrikâ çelâlakâ paustavakârakâ nâpikalpakâ cchâdakâ le* BM *sthapatiguḍakârakâ utta * ttikâvâhakâ âshavâhakâ valvajakâ(M *shavâhakâ vatkara)-vâṇijâ çaṁbavâṇijâ vaṁ* B *vikâ âḍavikâ suvaruṇadhocakâ moṭṭikâ e* M *vikâ âdaṁbikâ suvaruṇadhauvikâ mottikâ ‖ e* B *tâ hîno * sarva râ* BM *tetsuḥ ‖.

8. B *yopayi * mbiçâlas te* M *mbiçâlo teno * yaṁ biṁbisâ*. — 10. M *bhadrayânâni* B *ṇi jânâni mahâṁ ca jana* M *yaṁ ca saṁnipa*.

11¹. M *devaṁ kâ* B *kâla ma* M *nyase ‖. — 11². M *ṇyo biṁbiçâro bhadraṁ* BM *mâgadhekehi brâ* B *gṛihapehi sâ* M *ṛiddhiye mahato* BM *sya hikkârapikkârabhe * rupaṭahasaṁ(B *pavaṇaçaṁ)kasaṁ* M *tvâ yenânta*.

16. B *mbisâras yâvad eva yânabhû* M *sâro yâvad evaṁ yânabhûmis tâvad evaṁ yâne * pratyârûhya* B *pratyâruhya* M *yena bhagavânsteno * gavato pâ* BM *detsuḥ a*. — 18. B apokatyâ* M apyekatyâṁ bha* BM *modayitvâ sârâpanîyâṁ(M *yâṁ kathâṁ) vya* BM *detsuḥ |. — 20. BM apyekavatyâ* M *bhagavatâ svaka * ekamantaṁ ni* BM *detsuḥ ‖. — 21. M *ṇâmetvâ * detsuḥ | B *detsuḥ a*.

एकान्ते निषीदेन्सुः । अप्येकत्या मागधका ब्राह्मणगृहपतिका तूष्णीभूता एकान्ते निषीदेन्सुः ॥ तेन खलु पुनः समयेन उरुविल्वाकाश्यपो भगवतो अविदूरे संनिषणो अभूषि ॥ अथ खलु तेषां मागधकानां ब्राह्मणगृहपतिकानामेतदभूषि । किं नु खलूरुविल्वाकाश्यपो श्रमणे गौतमे ब्रह्मचर्यं चरति उताहो महाश्रमणो गौतमो उरुविल्वाकाश्यपे ब्रह्मचर्यं चरति ॥ अथ खलु भगवान्तेषां ब्राह्मणगृहपतिकानामिदमेवरूपं चेतसः परिवितर्कमाज्ञाय आयुष्मन्तं उरुविल्वाकाश्यपं गाथाये अध्यभाषे ॥

किमेव दृष्ट्वा उरुविल्ववासि
प्रहाय अग्निं कृशको वदानो ।
पृच्छामि ते काश्यप एतमर्थं
कथं प्रहीनं तव अग्निहोत्रं ॥

एवमुक्ते आयुष्मानुरुविल्वाकाश्यपो भगवन्तं गाथाये प्रत्यभाषे ॥

अन्नानि पानानि अथो रसानि
कामां स्त्रियो चाभिवदंति यज्ञे ।
एतं मलन्ति उपधीषु ज्ञात्वा
तस्मान्न यज्ञे न हुते रमामि ॥

अथ खलु भगवानायुष्मन्तमुरुविल्वाकाश्यपं गाथाये प्रत्यभाषे ॥

एतेषु त्वं न मनो अकासि
अन्नेषु पानेषु तथा रसेषु ।
अपरं नु तं देवमनुष्यश्रेष्ठं
यहिं रतं काश्यप तुह्य चित्तं ॥

1. B apyekavatyá° M apyekatyáṁ má° BM °detsuḥ ‖ . — 2. M °puna sama ° to abhidúre° B °dúra saṁ ° shi a°. — 3. M °khalu bhagaván tesháṁ brá° B °tikánáṁm e° M °tikánáṁ eta°. — 4. M °khalu uru ° po çravaṇe gauttame° B °po çramaṇo gautamo brahmacaryaṁ carati utá° M °háçravaṇo gauttamo uru° BM °çyapo bra°. — 5. B °n tesháṁ° M °hmaṇakánám i ° cetaso pa° B °ntaṁ oluvilvá° BM °tháye pratyabháshe | .

8. BM °ruvilvává° B °háyam agni kṛi° M °agni kṛi ° dáná | . — 10. B pṛicchami° M °çyapo e°.

13. B annapánáni artho sáni ká° M annapánáni arthe so nishkámáṁ striyo cábhivandanti yajñe B °bhivandaṁti yajñe e°. — 15. M °maranti upadhishu° BM °tvá tasyáç ca yajná na hute abhási ‖ .

18. B eteshu tena mano° M eteshu tena mano akosi anyeshu yáne°. — 20. B apare nu taṁ de° M apare ṇu taṁ de° B °çreshṭaṁ yahitará ká° M °shṭhaṁ yaṁhi taro ká° BM °tulyacittaṁ ‖ .

अथ खल्वायुष्मानुरुविल्वाकाश्यपो भगवन्तं गाथाये प्रत्यभाषे ॥

दृष्ट्वा मुनिं शान्तमनुपधीकं
अकिंचनं सर्वभवेष्वसक्तं ।
अनन्यथाभावमनन्यनेयं
तस्मान्न यष्टे न हुते रमामि ॥

अथ खलु भगवानायुष्मन्तमुरुविल्वाकाश्यपं गाथाये प्रत्यभाषे ॥

मोहन्ते जुहितो अपि मोहन्ते सो तपो हतो ।
यं जहे पश्चिमे काले जीर्णा व उरगो त्वचं ॥

अथ खल्वायुष्मानुरुविल्वाकाश्यपो भगवन्तं गाथाये प्रत्यभाषे ।

मोहं नो जुहितो अपि मोहं मे सो तपो हतो ।
यं जहे पश्चिमे काले जीर्णा व उरगो त्वचं ॥
अपीहि यज्ञेषु च विप्रमुच्यति
इति स्म मे आसि पुरे अजानतो ।
अन्धस्य जातीमरणानुसारिणो
अपश्यतो उत्तममच्युतं पदं ॥
सो दानि पश्यामि अनाविलं पदं
सुदेशितं नागवरेण तायिना ।
अत्यन्तनिष्ठापदमास्पृशे अहं
संसारजातीमरणं प्रहाय ॥
बहू सत्वा विहन्यन्ति करोन्ता विविधां तपां ।
निष्ठां अनधिगच्छन्ता अवितीर्णकथंकथा [405b] ॥

2. M eteshu tena dṛi° BM °nuprâyakam̃ a° shvaçaktam̃ | . — 4. BM °bhâvam anva(M °m anya)rtheyam̃ ta° B °hute na ra°.

6. B °bhagavâm̃n âyu°. — 7. M °juhute agni moham̃ sastapo°. — 8. BM °jirṇṇo ca u° M °ragatva°. — 9. M °khalu âyu°. — 10. B moha no ju° M mohan te juhute agni mohan te so°.

11. BM °jirṇṇo ca u° M °ragatva°. — 12. B °ccati | i°. — 14. B °jâtimaraṇâ°.

16. BM °ni paçyati a° B °suvisitam̃° M °suviçitam̃ nâgabalena tâyinâm̃ | . — 18. BM °padam âdṛiçe dvaye sam̃sâ° B °timaraṇadvayâya | M °timaraṇâdvayâya | . — 20. BM bahu sa° M °tvâ viham̃nyati karonti pûjâm̃ vividhâ tapânâm̃ | B °rontâm̃ vividhâ tapâm̃ | .

21. M nishṭhâ anâdigaccham̃tâ avicirṇṇam̃ katham̃° B °cchantâm̃ avicirṇṇa° B °thâ (*fol.* 405b) di°.

दीर्घरात्रं क्लिष्टो स्मि दृष्टिसंदानसंदितो ।
सर्वग्रन्थेषु मे भगवां परिमोचेसि चक्षुमां ॥

शास्ता मे भगवां श्रावको हं अस्मि सुगते ॥

अथ खल्वायुष्मानुरुविल्वाकाश्यपो उत्थायासनातो एकांशमुत्तरासंगं कृत्वा दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य भगवतः पादौ शिरसा वन्दित्वा भगवन्तं त्रिखुत्तं प्रदक्षिणीकृत्वा भगवतो पृष्ठतो अस्थासि भगवन्तं मोरहस्तेन वीजयमानो ॥ अथ खलु तेषां मागधकानां ब्राह्मणगृहपतिकानां एतदभूषि । उरुविल्वाकाश्यपो श्रमणे गौतमे ब्रह्मचर्यं चरति ॥

अथ खलु भगवां तेषां मागधकानां ब्राह्मणगृहपतिकानां धार्म्यां कथां प्रणामये ॥ रूपं ब्राह्मणगृहपतयो उत्पद्यति पि निरुध्यति पि वेदना उत्पद्यति पि निरुध्यति पि संज्ञा उत्पद्यति पि निरुध्यति पि संस्कारा उत्पद्यन्ति पि निरुध्यन्ति पि विज्ञानं उत्पद्यति पि निरुध्यति पि ॥ आर्यश्रावको च ब्राह्मणगृहपतयो रूपं उत्पादव्ययधर्मो ति समनुपश्यन्तो वेदना संज्ञा संस्कारा विज्ञानमनित्यन्ति समनुपश्यति । रूपमनित्यन्ति समनुपश्यन्तो वेदना संज्ञा संस्कारा विज्ञानमनित्यन्ति समनुपश्यन्तो रूपं दुःखं ति समनुपश्यन्तो वेदना संज्ञा संस्कारा विज्ञानं दुःखं ति समनुपश्यन्तो रूपमनात्मेति समनुपश्यति वेदना संज्ञा संस्कारा विज्ञानं अनात्मेति समनुपश्यति ॥ सो रूपं अनात्मेति समनुपश्यन्तो वेदना संज्ञा संस्कारा विज्ञानं अनात्मेति समनु-

1. M °kilitasya dṛishṭiṁ saṁdá° B °lishṭasya dṛi° BM °ditá | . — 3. M °smin sugate | . — 4. M °pya bhagavato pádau° B °nditvá bhagavantaṁ tṛikshuttaṁ° M °trishkṛityaṁ pra° BM °sthási ‖ bha° M °haste vi° B °vijiyamáno ‖ .

$7^1$. B °sháṁ mádha°. — $7^2$. M °çravaṇo gautamo bra° B °çramane gau°. — 9. M °sháṁ mágandhakánáṁ brá ° dhámyán katháṁ°.

10. M °yo utpadyati pi niruddhyati pi saṁjñá utpádyati pi saṁská utpádyati pi niruddhyati pi vijñánam utpadyati pi niruddhyati pi | B °vijñánaṁ utpadyanti pi nirudhyanti pi á°. — 12. M áryye çrávako ca brá° BM °dharmo(M °rme)ti samanupaçyati ‖ ve° M °vijñána ani° BM °paçyanti rú°. — 14. BM rúpam anityanti samanupaçyanto | vedaná saṁjñá saṁskará vijñánam anityanti samanupaçyanto | rúpaṁ duḥkhaṁ ti(M °khan ti) samanupaçyanto(M °nti | ) ve ° duḥkhaṁ(B °khaṁ ti) samanupaçyanto(M °nti) rúpam anátmeti(M °paṁ duḥkhaṁ) samanupaçyanti(M °nto) | vedaná saṁjñá saṁskárá vijñánaṁ anátmeti(M °naṁ duḥkhaṁ ti) samanupaçyanti(M °nto) | .

17. M rúpam anátmeti samanupaçyanti | vedaná saṁjñá saṁskárá vijñánam átmeti samanupaçyanti so rúpam anátmeti samanupaçyanto | saṁjña saṁskárá vijñánam anátmeti samanupaçyanto | rúpam udaya° B so rúpaṁ anátmeti samanupaçyanti saṁjñá saskárá vijñánaṁ ° çyanto | rúpam u ° yaṁ ti jánáti rú°.

पश्यन्तो रूपमुदयव्ययं ति प्रजानाति । रूपमुदयव्ययं प्रजानन्तो वेदना संज्ञा संस्कारा विज्ञानमुदयव्ययन्ति प्रजानाति । प्रजानन्तो रूपमनित्यन्ति प्रजानाति । प्रजानन्तो वेदना संज्ञा संस्कारा विज्ञानमनित्यन्ति प्रजानाति । प्रजानन्तो रूपं दुःखन्ति प्रजानाति । प्रजानन्तो वेदना संज्ञा संस्कारा विज्ञानं दुःखं ति प्रजानाति । प्रजानन्तो रूपमनात्मेति प्रजानाति । प्रजानन्तो वेदना संज्ञा संस्कारा विज्ञानं अनात्मेति प्रजानाति । प्रजानन्तो किंचिल्लोके न उपादीयति । अनुपादीयन्तो प्रत्यात्ममेव परिनिर्वायति । क्षीणा मे जातिरुषितं ब्र[406ᵃ]ह्मचर्यं कृतं करणीयं नापरमित्थत्वमिति प्रजानाति ॥

अथ खलु तेषां मागधकानां ब्राह्मणगृहपतिकानां एतदभूषि ॥ यतो किल भो रूपमनात्मा वेदना संज्ञा संस्कारा विज्ञानमनात्मा अथ को तर्हि कारको वा कारापको वा उत्थापको वा समुत्थापको वा निक्षेपको वा यो इमां संस्कारां आदीयति वा निक्षिपति वा यस्यिमे संस्कारा शून्या अनात्मनीया आत्मेन वा आत्मनीयेन वा ॥ अथ खलु भगवां तेषां मागधकानां ब्राह्मणगृहपतिकानां इममेवरूपं चेतसो परिवितर्कमाज्ञाय भिक्षूनामन्त्रयति ॥ प्रज्ञप्तेति भिक्षवो बालो अभ्युपगतो अनात्मा वेदना संज्ञा संस्कारा विज्ञानो मे आत्मा न च पुनरहं एवं वदेमि । अहं सो अत्र कारको वा कारापको वा उत्थापको वा आदीयको वा निक्षेपको वा यो इमां च संस्कारान्निक्षिपति अन्यां च उपादीयति अन्यत्र ॥ अथ खलु संस्कारा एव उत्पद्यन्ति संस्कारा एव निरुध्यन्ति ते च सहेतुका उत्पद्यन्ति सहेतुका एव निरुध्यन्ति ॥ सहेतुका संस्कारप्रतिसंधिर्भिक्षवस्तथागतो आत्मा ति

1. B rûpam udavya° BM °jñânam udavyayanti prajânanto(M °jânâto) | . — 2. BM rûpam a°. — 3[1]. M °saṁjñâ saskâro vi° BM °jânâti pra°. — 4. BM °nto | rû ° nâti pra° — 5[1]. M °nto ‖ rûpanâtme° BM °nâti pra°. — 5[2]. BM °nto | ve ° jânâti prajânantâ (M °nto ‖ ) rûpam anityatâ(M °maṇityate)ti prajânâti prajânanto vedanâ saṁjñâ saṁ(B °jñâsa)skârâ vijñâna(B °naṁ) anityatâ(M °nityete)ti prajânâti(M °nâni) pra°.

6[1]. BM °nto | kaṁci°. — 7. M °kṛitakaraṇî° B °ṇîyaṁ nâpari°. — 9[1]. B °bhûshit | . — 9[2]. M anupâdiyante yataḥ ki ° rûpam atmâ ve ° tmâ artha kâ ta° B °tha tâ tarhi° M °rhi kârako vâ karopako vâ utthâyako vâ samu° B °utthâyako va samutthâyako vâ nikshepako vâ yo | i° M °imâṁ saṁskârâ âdi° BM °yasya me ° nyâ anâtmanîyo âtme°.

13. B °grihapatikânâṁ | i° M °idam e ° cetasapari ° bhikshuṇâmantra°. — 14. BM prajñapti bhi° M °bâro abhyu° B °to anâtma vedanâ saṁjnâ saskâ° M °saṁskâro vi°.

16. BM ayaṁ so atra kârako vâ kâro(M °vâ kâlâ)pako(B °pakâ) vâ utthâyako vâ âdîya(M °dîpa)ko vâ ni° M °kshipati ‖ anyâṁ upâ° BM °dîyati ‖ atha°. — 17. BM atha khalu nânyatra saṁskârâ eva u(M °evaṁ u)tpadyanti saṁskârâ evaṁ(B °eva) nirudhya(M °ruddhya)nti te° M °ruddhyaṁti sa°. — 19. BM °skârâ pratisaṁdhi(M °sandhi)r bhi° M °kshavaḥ tathâ° BM °gato âtmâ(M °tmo)ti âdityakâni(M °kâmi) satrâ°.

आदीयको ति ॥ सत्वानां च्युतोपपादं प्रज्ञपयामि ॥ पश्याम्यहं भिक्षवः दिव्येन चक्षुषा विशुद्धेनातिक्रान्तमानुष्यकेन सत्वां च्यवन्तां उपपद्यन्तां सुवर्णां दुर्वर्णां सुगतां दुर्गतां हीनां प्रणीतां यथाकर्मोपगां सत्वां प्रजानामि न च पुनः अहं एवं वदामि । अहं सो अत्र कारको वा कारापको वा उत्थापको वा समुत्थापको वा आदीयको वा निक्षेपको वा यो इमां च संस्कारा निक्षिपति अन्यां च उपादीयति अन्यत्र । अथ खलु संस्कारा एव उत्पद्यन्ति संस्कारा एव निरुध्यन्ति ॥ ते च सहेतुप्रत्यया उत्पद्यन्ति सहेतुप्रत्यया निरुध्यन्ति ॥ सहेतुदृष्टी भवाभवदृष्टी ॥ सहेतुसंस्कारसमुदयं भिक्षवो यथाभूतं सम्यक्प्रज्ञया पश्यतो या भवदृष्टि शाश्वतदृष्टि सा न भवति । सहेतुसंस्कारनिरोधं च भिक्षवः यथाभूतं सम्यक्प्रज्ञया पश्यतो या विभवदृष्टि उच्छेददृष्टि सापि न भवति । तेन भिक्षवो उभौ अन्तौ अनुगम्य मध्येन तथागतो [406ᵇ] धर्मं देशयति ॥

अविद्याप्रत्यया संस्कारा संस्कारप्रत्ययं विज्ञानं विज्ञानप्रत्ययं नामरूपं नामरूपप्रत्ययं षडायतनं षडायतनप्रत्ययं स्पर्शः स्पर्शप्रत्यया वेदना वेदनाप्रत्यया तृष्णा तृष्णाप्रत्ययमुपादानं उपादानप्रत्ययो भवो भवप्रत्यया जातिर्जातिप्रत्यया जरामरणशोकपरिदेवदुःखदौर्मनस्योपयासा । एवमस्य महतो दुःखस्कंधस्य समुदयो भवति ॥ इति पि अविद्यानिरोधात्संस्कारनिरोधः संस्कारनिरोधाद्विज्ञाननिरोधो विज्ञाननिरोधान्नामरूपनिरोधो नामरूपनिरोधात् षडायतननिरोधः षडायतननिरोधात्स्पर्शनिरोधः स्पर्शनिरोधाद्वेदनानिरोधो वेदनानिरोधात्तृ-

1[1]. BM °pádim̃ pra° B °yámi paçyá°. — 1[2]. B °bhikshaḥ di° M °kshusho viçu° B °ddhenápikrá° M °shyakena satvánám̃ cya° B °çyavantám upapadya° BM °ntám̃ suvarṇṇám̃ duvarṇṇám̃ su° M °hinám̃ prahiṇám̃ praṇi° jánanti | na ca pu° B °jánáti na ca punaḥ aham̃ punar evam̃°. — 4. BM °ko vá káropako vá u° skárá bhikshipa(B °kshiya)ti anyá ca u° M °yati ‖ B °yati anyatra atha°.

6. M °khalvatra sam̃skárá evam utpa° B °skárá evam vadámi utpa° skárá evam̃ ni° M °rudyanti | . — 7[1]. M te ca sahetukapratyayá u° tukapra° B °rudhyanti sa°. — 7[2]. M sahetukadṛishṭi bhavábhavadṛishṭi sa°. — 8. BM sahetu(M °tuka)sam̃skáráḥ samu° M °kshavaḥ yathábhûtam̃ sam̃mya° BM °çyati | yávad dṛishṭi(B °shṭi çáçvatadṛishṭi) sá na(M °nam̃) bhavati sa°. — 9. B °bhûtam̃ sam̃mya° sápi na bhavati te°. — 10. BM °nugamyam̃ madhye° B °thágatá (*fol.* 406ᵇ)dha°.

12. M sam̃skárapratyayam̃ vijñáná vijñánapratyayam̃ námarúpa námarúpam̃pratyayam̃ shaḍáyatane shaḍáyataṇam̃pratyayam̃ sparço spa° BM °rçapratyayá vedaná(B °dano) vedaná(M °na)pratyayá tṛishṇá tṛishṇá(M °tṛishṇa)pratyayám u(M °yá u)pádánam upádánapratyayá bhavo° M °bhavapratyayá játi játipratyayá ja° daumana° BM °sá e°. — 15. M °khaskandhasya sa°.

16. M ityapi avidyá° t sam̃skáro nirodha sam̃ská° B °d vijñánam̃nirodho vijñá° M °d vijñánanirodhaḥ vijñánanirodhát námarúpanirodhaḥ námarú° d vedanánirodhaḥ ve° jjátinirodhaḥ já° j jarámaraṇanirodha ço° BM °sá nirodhya°.

ष्णानिरोधः तृष्णानिरोधादुपादाननिरोधः उपादाननिरोधाद्भवनिरोधः भवनिरोधाज्जातिनिरोधो जातिनिरोधाज्जरामरणनिरोधो जरामरणनिरोधा शोकपरिदेवदुःखदौर्मनस्योपयासा निरुध्यन्ते । एवमस्य केवलस्य महतो दुःखस्कन्धस्य निरोधो भवति ॥

इदमवोचद्भगवान् राजगृहे विहरन्तो अन्तगिरिस्मिं यष्टीवने उद्याने इमस्मिंश्च पुनर्व्याकरणे भाष्यमाणे राज्ञो श्रेण्यस्य विम्बिसारस्य तत्रैवासने निषण्णस्य विरजं विगतमलं धर्मेषु धर्मचक्षुर्विशुद्धं एकादशानां च नयुतानां विरजं विगतमलं धर्मेषु धर्मचक्षुं विशुद्धं ॥ ये पि ते द्वादशनयुता युग्यपाला यानपाला ते पि ततो पश्चाद्बुद्धं शरणं गता धर्मं शरणं गताः संघं शरणं गता ॥ आत्तमना ते भिक्षू राजा श्रेण्यो विम्बिसारो मागधका च ब्राह्मणगृहपतिका भगवतो भाषितमभिनन्दे ॥

भिक्षू भगवन्तमाहन्सुः । किस्य भगवं कथं इमेन राज्ञा श्रेणियेन विम्बिसारेण इमस्य पुरोहितस्य सकाशातो भगवतो श्रवणगतेन विपुलो आच्छायो दिन्नो ॥ भगवानाह ॥ न भिक्षवो एतरहिमेव एतेन राज्ञा श्रेण्येन विंबिसारेण पुरोहितस्य सकाशातो मम श्रवणगतेन विपुलो आच्छायो दिन्नो अन्यदापि दिन्नो ॥ भिक्षू आहन्सुः ॥ अन्यदापि भगवन् ॥ भगवानाह ॥ अन्यदापि भिक्षवो ॥

भूतपूर्वं भिक्षवः अ[407a]तीतमध्वानं नगरे मिथिलायां विदेहजनपदे महाराजधान्यां राजा अरिन्दमो राज्यं कारेसि धार्मिको धर्मराजा सुसंगृहीतपरिजनो दानसंविभागशीलो महाबलो महावाहनो । तस्य षष्टिं नागसहस्राणि सर्वालंकारविभूषितानि षष्टिं अश्वसहस्राणि सर्वालंकारविभूषितानि षष्टिं रथसहस्राणि द्वीपिचर्मपरिवाराणि सिंहचर्मपरिवाराणि सवैजयन्तिकानि सनन्दिघोषाणि

5. BM °he viharati(B °ti | ) a° B °ntaraçirismiṁ ° BM °dyâne | i° M °smiṁ ca pu ° mbiçâlasya ° BM °çânâṁ ca nayatâ° B °rmacakshuṁshi vi° BM °çuddhâni ‖.

8. BM °gyapâlo yânapâlo te pi ° M °d buddhaçaraṇaṁ gataḥ dharmaçaraṇaṁ gataḥ saṁgharaṇaṁ gataḥ B °ddhaṁ çaraṇaṁ gato dha ° ghaṁ çaraṇaṁ gatâ â°. — 9. M âttamavâ to bhikshu râ° B °manâ to bhi° M °mbiçâlasya mâ °tam abhyanande ‖.

11[1]. BM bhikshu bha° M °m âhaṁsuḥ ‖ B °nsuḥ ka°. — 11[2]. BM kasya bhagavaṁ ka-(M °van ka)thaṁ° M °yena biṁbiçâlena i ° B °çramaṇa° BM °pulena â°. — 13[2]. M na bhikshavaḥ ati° (*l.* 16) B °vo etarahiṁm evaṁ ete °tasya mama çramaṇa ° âcchâ dinno anya°.

15[2]. B °vo bhû°. — 16. BM °lâyâṁ videha(B °haṁ)janapade mahâjanapadâyâṁ râjâ aminda° M °jyaṁ kârayesi dhâ° B °si | dhâ° BM °rijana dâ°. — 18. BM ta(M tasya) shashṭhiṁ(M °shṭhiṁ) nâ ° sarvâlaṁ(B °rvâraṁ)kâra(B °kâlavi)bhûshitâni shashṭhi-(M °ni | shashṭhi)m açva° B °laṁkâlavibhû° M °laṁkârabhû° BM °shitâni | shashṭhiṁ rathasahasrâṇi(B °ṇi | ) dvî° B °ghoshâni ma° M °hâpravâlâni u° B °shashṭhiṁ dhe° BM °hinî ta°.

महाप्रवाराणि उच्छ्रितध्वजपताकानि षष्टिं धेनुसहस्राणि वत्सदोहिनी । तस्य षष्टिं कन्यासहस्राणि षष्टिं पर्यंकसहस्राणि सौवर्णमयानि रूप्यमयानि दन्तमयानि ॥ अरिन्दमस्य खलु पुनर्भिक्षवो राज्ञो षष्टिं सुवर्णपारिसहस्राणि षष्टिं रूप्यपारिसहस्राणि अभून्सुः ॥ अरिंदमस्य खलु पुनर्भिक्षवो राज्ञो पितृपितामहानि षष्टिं निधिसहस्राणि षष्टिं नगरसहस्राणि ऋद्धिस्फीतानि अकण्टकानि ॥ अरिंदमस्य राज्ञो श्रोणो नाम पुरोहितपुत्रो अभूषि त्रयाणां वेदानां पारगो अक्षरप्रभेदानां इतिहासपंचमानां सनिघण्टुकैटभानां अनुपदव्याकरणकुशलो ब्राह्मणवेदेषु दश कुशलां कर्मपथां समादायवर्ती कामेषु आदीनवं दृष्ट्वा अनुहिमवन्तं गत्वा ऋषिप्रव्रज्यां प्रव्रजितो ॥ तेन दानि बाहिरकेण मार्गेण युज्यन्तेन घटन्तेन व्यायमन्तेन चत्वारि ध्यानान्युत्पादितानि पञ्चाभिज्ञा च साक्षीकृता महर्द्धिको महानुभावो ऋषी संवृत्तो ॥

अथ खलु भिक्षवो श्रोणस्य ऋषिस्य दीर्घस्याध्वनो त्ययेन एतदभूषि ॥ राजा अरिन्दमो मम दारकवयस्यो सहपांशुक्रीडितो तस्य चाद्य चतुराशीति वर्षसहस्राणि महाराज्यं कारयन्तस्य समयो खलु राज्ञो अरिन्दमस्य प्रव्रज्याये यं नूनमस्याहं संचोदयेयं ॥ अथ खलु भिक्षवो श्रोणको ऋषिस्तद्यथापि नाम बलवां पुरुषो संमिञ्जितां वा बाहां प्रसारये प्रसारितां वा बाहां संमिंजये एत्तकेन क्षणवीतिहारेणानुहिमवंतातो आश्रमातो वैहायसमभ्युद्गम्य महादेवाम्रवने प्रत्यस्थासि ॥ अद्राक्षीद्भिक्षवो अरिन्दमस्य ब्राह्मणपुरोहितो राजाचार्यः श्रोणकं ऋषिं महादेवाम्रवने अन्यतमस्मिं आम्रमूले निषण्णं दृष्ट्वा च पुनर्येन श्रोणको ऋषी तेनोपसंक्रमित्वा श्रोणकमृषिं साधु च सुष्ठु च प्रतिसंमोदित्वा श्रोणकं ऋषिं अभिवादेत्वा येन

1. B ta sha° M tāḥ shashṭhiṁ kaṁnyā ° shashṭhim paryaṅka° B °shashṭhiṁ paryeka° ntamayāni a°. — 3. B alinda° M °jño shashṭhiṁ su° B °ṛṇṇamayāni sahasrāṇi shashṭhi rū° M °shashṭhiṁ rū°. — 4. M aliṁdamasya ° hānidhiṁ shashṭhiṁ sahasrāṇi shashṭhiṁ na° B °shashṭhiṁ nidhi ° garasahasrāṇi riddhisphītāni akaṁthakāni ‖ M °ṛiddhasphitāni akanṭhakāni ‖. — 5. M arinda° B °sya rajño çreṇo° M °jño çreṇyo nāma° BM °shi trayāṇāṁ ca ve° M °go saksha° BM °paṁcamānāṁ sanirghaṁṭha(M °rghaṇ tha)kaiṭabhānāṁ anupada(B °pado)ko vyā ° çaleshu brāhmaṇadeveshu° M °lāṁ kakarma°.

9. M °rakena mārgeṇa pūjyatena gha° B °ñcābhijñā ya sā° M °ṛishiṇāṁ saṁ°.

12[1]. BM °vo çreṇyasya ṛi°. — 12[2]. M rājā aninda° B °kridito° M °to tasya codya caturaçī ° ntasya samaye kha ° jño aninda° B °ndasya pra° M °nūnaṁ tasyā°. — 15. M °kshavaḥ çroṇa ṛishiḥ tadya° B °vo çreṇako ṛi° M °sho samiṁji vā° BM °sāritāṁ bāhāṁ saṁmiñjaye(M °ye | ) e° M °vīthihāre ° himavantāto ā ° devāpravane°.

17. M °vo rājño anindamasya brāhmaṇo pu° BM °cāryaḥ çre(M °ryyo çro)ṇakaṁ ṛishiṁ mahādevomravane° B °smiṁ āmrava(*fol.* 407[b])ne anyatamasmiṁ āmramūle nishaṇṇo dṛi° M °sharṇṇo dṛi° B °r yena çreṇako° BM °nopasaṁkramitvā çreṇaka° B °m ṛishiṁ sā° M °sushṭhu ca pra ° thilāyaṁ te ° jño aninda ° danāye B °danāya ta°.

मिथिला तेन प्रक्रमे राज्ञो अरिन्दमस्य वेदनाय ॥ तदहो एव च भिक्षवः राज्ञो अरिन्दमस्य कामेषु व्याकुलना उत्पन्नो योनिशो मनसिकारो श्रोणकस्य ऋषिस्य दर्शनकामता उदपासि ॥ अथ खलु भिक्षवो राजा अरिन्दमस्तायेवेलाये इमां गाथामध्यभाषेत् ॥

तस्य ग्रामवरं देमि नारियो च अलंकृता ।
यो मे श्रोणकमाख्यासि सहायं पांसुक्रीडकं ॥
तस्य च ब्राह्मणो आसि कुलीनो अध्यापको ।
सुदुःखिदुर्मनं दृष्ट्वा इदं वचनमब्रवीत् ॥
मह्यं ग्रामवरं देहि नारीयो च स्वलंकृता ।
अहं श्रोणकमाख्यास्यं सहायं पांसुक्रीडकं ॥
तुह्यं हि ताव विजिते तुह्यं उद्यानभूमिये ।
पुष्पिता फलिता आम्रा तत्र सो आसते ऋषी ॥

ततो स राजा त्वरमाणो अमात्यमध्यभाषति ॥

क्षिप्रमस्माकं योजय कृत्स्ना नागां अलंकृता ।
भेरीपटहा वाद्यन्तु एको शंखो च मध्यमः ॥
वयस्यं द्रष्टुमिच्छामि श्रोणकं पर्युपासितुं ।
नानावृक्षफलोपेतं प्रयासि . . . वनं ॥
राजा . . . . . . . . . . . . . . . ।
. . . . . . . . श्रोणको यत्र ध्यायते ॥
तं च सो ऋषिं अद्दशि सहायं पांसुक्रीडकं ।
दृष्ट्वा च श्रोणकं तस्मिं इदं वचनमब्रवीत् ॥

1. M °jño aninda° BM °shisya vâçucakâmatâ uda(M °du)pâsi ‖ . — 3. M °kshavaḥ râjâ anindamo tâye ve° gâthâm̃ adhyabhâshe | . — 5. BM kasya grâmavalâm̃ de° B °mi nori°.
6. BM ko me° M °yam̃ pâm̃çukri° BM °ḍanam̃ | . — 7. B °ṇo açi ku° BM °ko mantradharo su°. — 8. BM °duḥkhî durma° M °ida va°. — 9. BM °grâmavalam̃ de° M °svaram̃kṛitâ | . — 10. M °khyâsi sahâyam̃ pâm̃çukri° B °yam̃ prânsu° BM °ḍanam̃ | .
11. B tubye etâ ca vijite tuhya udyâ° M tuhyam̃ etâm̃ ca vijite tuhyam̃ udyâ°. — 12. BM °so sâmyate° M °ṛishiḥ | . — 13. M tataç ca râ° B tato ca râ° M °amâtyom adhyebhâ°. — 14. BM °pram asmâm̃ yo° M °jaye yam̃ kṛitsnâ nâgâ alam̃kṛitâḥ ‖ . — 15. B °ṭaha vâ° M °ṭaha vâdyâstu e° B °ekaçam̃kho ca dharmâ tu ca va°.
16. M bhruvasya dra° B °yasya dra°. — 17. BM °prayâsi buddhaçâsanam̃ | . — 18. BM râjâ çro°. — 19. BM °yate tam̃°. — 20. B tam̃ so ṛishim̃ | dṛishṭvâ sahâ° M tam̃ sa ṛishim̃ | dṛishṭvâ sahâyam̃ ṛishim̃ dṛishṭvâ sahâyam̃ pâm̃çukri° B °ḍanam̃ dṛi°.
21. B °smim̃n idam̃°.

कृपणो व कथं भिक्षो मुण्डसंघाटिको धनो ।
समातापितृको ध्यायं वृक्षमूले पि तिष्ठसि ॥

अथ खलु भिक्षवो श्रोणको ऋषि राजानमरिन्दमं गाथाये प्रत्यभाषे ॥

न राज कृपणो भवति धर्मकायस्य श्रियापि च ।
यो च धर्मं समुपक्रम्य तद्धर्मे न रतो नरो ।
स राज कृपणो भवति ज्योतिष्टोमपरायणो ॥

अथ खलु भिक्षवो राजा अरिन्दमो श्रोणकं ऋषिं गाथाये प्रत्यभाषे ॥

कथं भवां सुखं शयति वनप्रान्तस्मिं श्रोणक ।
कथं अरण्ये विहरन्तो एकाकी रमसे कथं ॥
कथं भगवं कायस्य परितापो न विद्यते ।
रक्षां व ते संविधेमि अथ नगरं नयामि ते ॥

अथ खलु भिक्षवः श्रोणको ऋषि राजानमरिन्दमं गाथाये प्रत्यभाषे ॥

एकस्य चरतो राज किं मे राष्ट्रं करिष्यति ।
प्रथमं खु भद्रमधनस्य अनागारस्य भिक्षुणो ॥
यो हं ग्रामातो प्र[408a]क्रमामि राष्ट्राणि निगमा तथा ।
अनपेक्षो व प्रक्रमामि न कोचिदुपरुध्यति ।
द्वितीयं खु भद्रमधनस्य अनागारस्य भिक्षुणो ॥
पन्थेन गच्छमानस्य ये भोन्ति परिपन्थका ।
पात्रचीवरमादाय सुखं गच्छति सर्वतो ।
तृतीयं खु भद्रमधनस्य अनागारस्य भिक्षुणो ॥

1. B kṛipaço va tatvaṁ bhi° M °ṇo va taho tatvaṁ bhi ° dhanaṁ | B °dhana | . — 2. M °le ca ti° BM °shṭhati || . — 3. M °ṛishi râjânaṁ anindanaṁ gâ°. — 4. BM na râjâ kṛi° B °kṛipano bha ° dharmo kâyenasya° M °rmakâmasya çreṇiyâ || . — 5. M °ca dharmâṁ upasaṁkramya tâṁ dharmeṇa ra° B °mya tân dharmeṇa ra° M °naraḥ | .

6. B sa râjaṁ kṛi° M sa râjâ kṛi° BM °jyotistama° M °yaṇaḥ || . — 7. M °anindamo°. — 8. BM kahiṁ bhagavâṁ° M °ntarasmiṁ°. — 9. B °araṇyo vi°. — 10. M °gavan kâmeshu pari° B °kâmeshu paritâyo na vidyate ra°.

11. BM rakshâ ca tena saṁbibhemi(B °mi || ) a°. — 12. M °ṛishiḥ râjânam aninda°. — 13. M °carate râjaṁ kim me râshṭraṁ° B °to râjâ kiṁ° M °shyasi | . — 15. BM °kramesi râ ° mâ tava | .

16. B °pekshâ ca prakramesi na ko° M °pekshâmi prakrame ca kvacid upani ru°. — 18. M *passe les trois dernières lignes de cette page et les deux premières de la suivante.*

मिथिलायां दह्यमानायां नास्य दह्यति किंचन ।
चतुर्थं खु भद्रमधनस्य अनागारस्य भिक्षुणो ॥
नते कोष्ठस्मिं ओसरन्ति न कुंभेन कुलोपकं ।
परितिष्ठति एषाणो तेन यापन्ति सुव्रता ।
पंचमं भद्रमधनस्य अनागारस्य भिक्षुणो ॥
नानाकुले प्रव्रजिता नानाजनपदाश्रिता ।
अन्यमन्यं प्रियायन्ति पश्य धर्मस्य धर्मतां ॥

अथ खलु भिक्षवः राजा अरिन्दमो श्रोणकं ऋषिं गाथाये प्रत्यभाषे ॥

नित्यं खलु तेषां भद्रं येषां कीर्तेसि श्रोणक ।
वयन्तु गृद्धा कामेषु किं करिष्यामि श्रोणक ॥

अथ खलु भिक्षवः श्रोणको ऋषी राजानं अरिन्दमं गाथाये प्रत्यभाषे ॥

उपमान्ते महाराज करिष्यन्तं शृणोहि मे ।
उपमाये इहैकत्या अर्थं जानन्ति पण्डिता ॥
भूतपूर्वं महाराज कुंजरो षष्टिहायनो ।
पतितो गिरिदुर्गेषु गंगावेगेन वुह्यते ॥
तत्र काको विचिन्तेति अल्पप्रज्ञो अचेतसो ।
यानं इमं लब्धं भद्रं भद्रो आयाम अल्पको ॥
तस्य रात्रिं दिवं चापि तत्रास्ति नियतो मनो ।
खादन्तो नागमांसानि पिबन्तो भागीरथीजलं ।
पश्यन्तो वरचित्राणि उपयाति विहंगमो ॥

2. B caturthasya bha°. — 3. BM nato koshṭi(M nate koshṭhe)smiṁ osa(M °sara)nti na kuṁbho na kulo pi yaṁ | . — 4. B °ti meshâṇâ tena° M °ti teshâṇâṁ tena°.

6. B °vrajito nânâja° BM °dâ çatâ(B °tâ | ). — 7. B anyamanya pri ° sya dharmatâ || . — 8. M °kshavo râjâ aninda ° bhâsha. — 9. BM nityaṁ khu teshâṁ bhadra(M °dran te) ye° B °kirttasi çroṇako M °rtte | çroṇakâ | . — 10. M vayaṁ shu vṛiddhakâ° B °gṛiddhakâ° M °shyâma çroṇakâ || .

11. M ° ṇakâ ṛi ° aninda°. — 12. BM uttamâ° B °n taṁ çruṇohi me | . — 15. BM °hyato | .

16. BM °prajñâ sacetaso | . — 17. M yânam idaṁ la° BM °dro vâyam analpako | . — 18. BM tatra râtriṁ° M °divaṁ tatra asya ni° B °trâsya nirato° M °mana. — 19. M khâdyanto || nâgamâni pi° B °banto ca bhâ° BM °girathaṁ | (M °thaṁ) jalaṁ. — 20. BM °upayânâ vi°.

सा तं भागीरथी गंगा प्रमत्तं कुणपाश्रितं ।
समुद्रं अभिसारेति जगती यत्र पक्षिणां ॥
मकरा (तिमि)तिमिङ्गिला बालं नं बधित्वान खादति ।
कामापेक्षा एवमेव राज प्रपद्यन्ति पुद्गला ॥
तं ते राज अहं ब्रूमि मा राज धर्मे प्रमादय ।
अथ घोररूपं नरकं प्रपतिष्ये अवाक्शिरो ॥
संजीवं कालसूत्रं च संघातं द्वौ च रौरवौ ।
अथापरं महावीचिं तपनं संप्रतापनं ॥
इत्येते अष्ट महानरका आख्याता दुरतिक्रमा ।
आकीर्णा रौद्रसत्वेहि प्रत्येकं षोडशोत्सदा ॥
चतुष्कर्णा चतुर्द्वारा विभक्ता भागशो मिता ।
उन्नता योजनशतं समन्ता योजनशतं ॥
अथ ये नरकप्रक्षिप्ता अयसा प्रतिकुब्जिता ।
तेषामयोमया भूमि प्रज्वलिता तेजसंयुता ॥
कद्यंतपना घोरा अर्चिमन्तो दुरासदा ।
रोमहर्ष[408b]णरूपा च भीष्मप्रतिभया दुःखा ॥
महद्भयंकरा सर्वे अर्चिशतसमाकुला ॥
एकैकं योजनशतं आभाये संप्रभासति ॥
यत्र सत्वा बहू रौद्रा महाकिल्बिषकारका ।
चिरं कालं प्रतप्यंति अपि वर्षशतान्यपि ॥
अयोमयेहि दण्डेहि शूलेहि नरकपालका ।
हनन्ति प्रत्यमित्राणि ये भोन्ति कृतकिल्बिषा ॥

1. M °giratho gaṁ ° kuṇapaçri°. — 3. BM °ṅgilâ(M °ṅgirâ) abalânâṁ bandhitvâ°. — 4. BM na sâpeksha(B °kshe)kaṁ evam evaṁ mahârâja pra(B °ja ye pa)padya° B °nti puṅgalâ | M °nti puṁgavo ‖ . — 5. BM kṛityâ te rujaṁ a(M °jam a)haṁ bravimi mahârâja dharmaṁ pramâdaya(M °rmaṁ | prasâdâye).

6. BM ghora° M °shye ‖ âkî° (*l.* 10) B °shye | avâraçiro saṁ°. — 7. M *passe les lignes* 7-9. B °vau athâ°. — 8. B °viciṁ ta°. — 10. BM âkirṇṇa rau° M °tsade | .

11. B °rdvâra vi° M °ktâ bhogaçoṇitâ | . — 13. BM atha so na° B °pratikshiptaṁ a° M °ptâ âya°. — 14. M teshâṁ ayomayî bhû°. — 15. M karddayaṁ ta°.

16. BM °bhîshmaṁ pra° M °bhayâ sadâ | duḥ° BM °khâ ma°. — 17. BM °râ sarva arci(B °rciçata)samâ°. — 18. BM ekaika yo° M °taṁ âyâse saṁ° B °prabhosati | . — 19. B °hu bahu rau°. — 20. BM ciraṁ bâlâ pra° M °tapyanti api°.

21. M °sthûlo narakapâraka | B °sthûle narakapâragâ | . — 22. M haranti pra ° lvishâḥ | .

तन्ते हं कीर्तयिष्यामि गाथाये अनुपूर्वशः ।
श्रोत्रं मो दत्वा सत्कृत्यं शृणोहि मम भाषतो ॥
संजीवस्मिं च निरये ऊर्धपादां अधोशिरां ।
प्रलंबयित्वा तचन्ति वासीहि परशूहि च ॥
ततो नखेहि तीच्णेहि आयसेहि स्वयंभुहि ।
अन्यमन्यं पि पाटेन्ति क्रुद्धा क्रोधवशानुगा ॥
असिनो चायसा तेषां तीच्णा हस्तेषु जायिषा ।
येहि छिन्दन्ति अन्योन्यं प्रदुष्टमानसा नराः ॥
तेषां संछिन्नगात्राणां शीतो वायुः प्रवायति ।
सर्वाङ्गजनितो तेषां पूर्वकर्मविपाकशः ॥
एवं तेषामभिज्ञाय श्रोणको तस्य राजिनो ।
संजीवन्ति आख्यासि आवासं पापकर्मणां ॥
संजीवतश्च निर्मुक्ता कुक्कुलमवगाहय ।
अन्यमन्यं समागम्य दीर्घायतनविस्तरा ॥
सर्वे ते खु प्रधावन्ति योजनानि अनेकशः ।
दह्यमाना कुक्कुलेषु दुःखां वेदन्ति वेदनां ॥
कुक्कुलातो च निर्मुक्ता कुणपं अवगाहिय ।
दीर्घं महन्तं विस्तीर्णं उद्विद्धं शतपौरुषं ॥
तमेनं कृपया तत्र तीच्णशक्तिमुखा खरा ।
छविं भित्वान खादन्ति मान्सशोणितभोजना ॥
कुणपातो समुत्तीर्णा द्रुमां पश्यन्ति शोभनां ।
हरितपत्रसंछन्नांस्ते उपेन्ति सुखार्थिनः ॥

1. M tato haṁ°. — 2. B çrotra mo vâya sa° M çrota mo vâya sa°. — 3. M saṁjîvesmiṁ°. — 4. B °tvâ taṁ ksheti vâ° M °tvâ tamaksheti câsihi pa° B °sîhi çûhi ca |.

6. M °nyaṁ hi pâdenti kruddhâṁ kro° B °kruddhyaṁ kro°. — 7. BM açino vâyasâ° BM °tîkshṇahasteshu ca pâyithâ |. — 8. M °cchindati a ° mânaso naraḥ |. — 9. M °saṁcchimâtrâ° B °nnamâtrâ° BM °ṇâṁ mino vâyaḥ pradhâvati |. — 10. BM °janato°.

11. M °teshâṁ abhi° BM °râjani |. — 12. BM saṁjîvanti â°. — 13. M °jûvataṁ ca° B °ktâ kûkula°. — 14. B °rghâya na ca vi° BM °starâ |. — 15. BM teshu ca pra°.

16. B °nâ kûkuleshu° M °danâ ‖. — 17. B kûkulâto° M °rmukto ku ° avadâhatha |. — 18. B °stîrṇṇa so viddhaṁ° M °rṇṇaṁ yo viddhe ça°. — 19. M °kṛipayo tatra tîkshṇâṁ çakti° B °tîkshṇâ ça° BM °kharo |. — 20. BM °bhitvâ° M °janaṁ |.

21. M kûṇapâ° B °pâto utîrṇṇo dru° M °tîrṇṇo dru ° çyanti çobhanâ |. — 22. M °nnâ te u° B °peti su°.

तमेनं कुललां गृद्धा काकोलूका अयोमुखा
ऊर्ध्ववृक्षे च नां दृष्ट्वा खादन्ति रुधिरम्रक्षिता ॥
यदा च खादिता भोन्ति अस्थीनि अवशेषिता
अथ तेषां छविमांसं रुधिरं चोपजायते ॥
ते च भीत्वा उत्पतित्वान अलेना लेनसंछिन्नो ।
असिपत्रवनं घोरं रक्षमाणा उपागमि ॥
ततो क्षता च आर्त्ता च बहुरुधिरम्रक्षिता ।
असिपत्रवना मुक्ता यान्ति वैतरणीं नदीं ॥
ते तां च अवगाहन्ति तत्र क्षारोदकां नदीं ।
तेषां च अङ्गमङ्गानि वर्धिता प्रतिविध्यति ॥
ततो अंकुशेहि विक्षित्वा आयसेहि यमपौरुषा ।
उत्क्षिपित्वा नदीतीरे भुंजावेन्ति अयोगुडां ॥
ताम्रलोहं च संतप्तं पायायन्ति विलीनकं ।
तत्तेषां अन्त्रमादाय अधोभागेन गच्छति ॥
एवं पापीयकर्मान्ता [409*] निरयं प्रतिपद्यथ ।
अकृत्वा कुशलं कर्म काममार्गानुसारिणः ॥
ये च पापानि कर्माणि परिवर्जेन्ति मानुषाः ।
एकान्तकुशलाकारा न ते गच्छन्ति दुर्गतिं ॥
तस्मा दुरूपमागम्य कर्म कल्याणपापकं ।
पापानि परिवर्जेत्वा कल्याणं आचरे शुभं ॥
अथ वा पुनर्भावेय आर्यं अष्टांगिकं शुभं ।
सर्वदुःखप्रहाणाय ज्ञात्वा धर्मं निरोपधिं ॥

1. M °kolukâ a°. — 2. B urddhavṛikshe ca naṁ dṛi° M °kshe ca naṁ jitvâ ° kshikâ |. — 3. B yadâ ya khâdita bhonti asthînyavaçe°. — 4. B °cchavimâ° M °cchaviṁ mâṁsaṁ ru° B °raṁ câpa°. — 5. B te ca hitvâ u° M °alenolena saṁ° BM °saṁsthitâ asi°.

6. M °raṁ kûṇapâṇâ° B °kshaṇyapâṇâ°. — 7. B °kshatâ ca â° BM °rttâ ca bâhâ ru°. — 9. B te tâm ava° BM °nti tattâṁ kshâ°. — 10. B teshâṁ aṅgamaṁgâni baddhatâ pra° M teshâṁ aṁgamaṅgâni varddhatâ pratibandhyati ‖.

11. M tato 'ṅkuçehi vijhiṁ(?)tvâ° BM °âyase ya° M °paurupâ |. — 13. M °taptâṁ pâpâyanti°. — 14. M taṁ teshâṁ patra° B °shâṁ patrâm âdâ°. — 15. BM esha pâ° M °rmânto ni°.

16. M °rma kalyâṇaṁ ca pâpakaṁ |. — 17. M °rivajjayanti pâpakâṁ ‖. — 18. M °çalokâlâ na ° cchati du°. — 19. B tasyâ durupam â° M tasyâ durûpam âgamya kâmamârgânusâriṇaḥ | B °rma kalpâpâpakaṁ |.

21. BM °veyaṁ â° M °shṭâṅgika çu° B °ashṭhâṁgi°. — 22. BM °dharma ni°.

एवंरूपां महाराज सत्वा वेदन्ति वेदनां
नरकेषु पापकर्मान्ता प्रमत्ता बालबुद्धिनो ॥
तन्ते राज अहं ब्रूमि मा राज धर्मे प्रमादय ।
मा घोररूपं नरकं प्रपतिष्ये अवाक्शिरो ॥
संविग्नमनसो राजा श्रोणकस्य सुभाषितं ।
श्रुत्वा संवेगमापद्ये अद्भुतरोमहर्षणं ॥
ततो राजा त्वरमाणो अमात्यं अध्यभाषत ।
क्षिप्रं कुमारमानेथ दीर्घायुं राष्ट्रवर्धनं ॥
अस्ति मे दहरः पुत्रो दीर्घायु राष्ट्रवर्धनः ।
तं राज्ये स्थापयिष्यामि सो वो राजा भविष्यति ॥
ततो च राजदूता च अमात्या चानुकंपका ।
क्षिप्रं कुमारमानेन्ति दीर्घायुं राष्ट्रवर्धनं ॥

अथ खलु भिक्षवो राजा अरिन्दमो दीर्घायुं कुमारं गाथाये अभाषे ॥

आमन्त्रेमि भवन्तव प्रव्रज्या मम रोचति ।
अहं काको व दुर्मेधो मा कामानां वशमन्वगा ॥
षष्टिं नगरसहस्राणि स्फीतं राज्यमकण्टकं ।
तत्पुत्र प्रतिपद्याहि राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वे ।
न हि न संगमन्तेन महासैन्येन मृत्युना ।
माहं काको व दुर्मेधो कामानां वशमन्वगा ॥
षष्टि नागसहस्राणि अत्र सर्वे स्वलंकृता ।

1. M °rûpâ mahâ ° satvâṁ vada° B °nti vedanâ na°. — 2. BM °ttâ varabu°. — 3. M taṁ te râjaṁ ahaṁ brumi mâṁ dharmapradâyanâ | B tan te râjaṁ ahaṁ krumi mâṁ dharmâdharma pramodaya | . — 4. M gho° B nâ gho ° avaçiro | M °avâsiro | . — 5. M °râjaṁ çro°.

6. B °vedam âpadyate a° M °vega âpadya arbhuta°. — 7. M °tvaramâno a° BM °shate | . — 8. BM °rghâyu râ°. — 9. M °haro pu° BM °râshṭhrava° M °rddhanaṁ | .

11. B °dûtâmâtyo nukaṁ° M °tyâ canukaṁ°. — 12. M °nekiṁ dirghâyu râshṭra° B °râshṭraṁ va°. — 13. M °kshavaḥ râjâ aninda ° ye adhya°. — 14. BM °ntresi bhavanto pra° B °rocanti | . — 15. BM °kâkeva du° M °dho mâ kâmâ tâṁ vasam a°.

16. BM °jyam akaṇṭhakaṁ | . — 17. M °niryântayâmi°. — 19. B °hi naḥ saṁ° M °hi no saṁ°. — 20. BM nâhaṁ kâko ca durmedho mâ kâmânâṁ vaça(M °vaso)m anvagâ(M °gâḥ) | .

21. B shashṭhi nâ° M shashṭhiṁ nâ° BM °ṇi yatra°.

दन्तिनो बलसंपन्ना हेमकल्पितवाससो ॥
आरूढा प्रासशूलयष्टीतोमरनिगडायुधा ।
तां पुत्र प्रतिपद्यस्व राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वे ।
न हि न संगतं तेन महासैन्येन मृत्युना ।
माहं काको व दुर्मेधो कामानां वशमन्वगात् ॥
षष्टिमश्वसहस्राणि सैन्धवा शीघ्रवाहिनो ।
सर्वालंकारभूषितानि शूरारूढा च सर्वशो ॥
. . . . . . . . . . . . . . . . . . . . . .
माहं काको वा दुर्मेधो कामानां वशमन्वगा ॥
षष्टिं धेनुसहस्राणि सर्वे वत्सोपदोहिनी ।
तां पुत्र प्रतिपद्याहि राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वे ।
माहं काको व दुर्मेधो कामानां वशमन्वगा ॥
षष्टि कन्यासहस्राणि आ[409b]मुक्तमणिकुण्डला ।
तां पुत्र प्रतिपद्याहि राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वे ।
माहं काको व दुर्मेधो कामानां वशमन्वगा ॥
षष्टिं पर्यंकसहस्राणि सौवर्णरूप्यमयानि च ।
तां पुत्र प्रतिपद्याहि राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वे ।

1. M °no varasaṁpaṁno he° B °saṁpanno he° BM °lpikavâsasâ | . — 2. M °ḍhâ pâçaçûlayashṭito° B °tomalâ nigadâyu° M °nigadâyudhâḥ | . — 3. M °pratipadyâma svarâ° B °dyasya râ°. — 5. BM °hi naḥ saṁ°.

6. M nâhaṁ kâko ca du° B mohaṁ kâko ca du° M °vasam a°. — 7. M shashṭhim açva ° ṇi sendhavâ çi° B °sainyavâ çi°. — 8. M °bhûshânâṁ çûlo rûḍho va sa° B °shitânâṁ çûro rûḍhâ° BM °rvaço | mâ° (*l.* 10). — 10. B °ko du° M °ko ca du ° vasam a° BM °nvagâḥ | .

11. M shashṭhiṁ dhe ° ni sarvaikaṁçopavâhini | B °rve kaṁsopado°. — 12. B tâṁ pratipadâpâdyâ° M °pratipadyehi ° niryyâṁtayâ°. — 13. M °dyaivaṁ pra°. — 14. M nâhaṁ° BM °ko ca dumedho° M °vasaṁm a°. — 15. B yashṭhi kaṁnyâ° M shashṭhiṁ kaṁnyâ° BM °kuṇdalâ | .

18. M nâhaṁ kâko ca du° B nahaṁ kâmeca du° M °vasaṁm anvagât | . — 19. B shashṭhiṁ kaṁnyâsa° M shashṭhiṁ râjâsaha° B °pyamayâṁ | .

21. M °ne garaṇaṁ° B °ne maraṇa çu°.

न हि न संगतं तेन महासैन्येन मृत्युना ।
माहं काको व दुर्मेधो कामानां वसमन्वगा ॥
षष्टि पारिसहस्राणि सौवर्णरूप्यमयानि च ।
तां पुत्र प्रतिपद्याहि राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वुवे ।
न हि न संगतं तेन महासैन्येन मृत्युना ।
माहं काको व दुर्मेधो कामानां वशमन्वगा ॥
षष्टि निधानसहस्राणि जातरूपमनल्पकं ।
तां पुत्र प्रतिपद्याहि राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वुवे ।
न हि न संगतं तेन महासैन्येन मृत्युना ।
माहं काको व दुर्मेधो कामानां वशमन्वगा ॥
षष्टिं निधिसहस्राणि सप्तरत्नमनल्पकं ।
तां पुत्र प्रतिपद्याहि राज्यं निर्यातयामि ते ॥
अद्यैव प्रव्रजिष्यामि को जाने मरणं श्वुवे ।
न हि न संगतं तेन महासैन्येन मृत्युना ।
माहं काको व दुर्मेधो कामानां वसमन्वगा ॥

अथ खलु दीर्घायु कुमारो राजानं गाथाये प्रत्यभाषे ॥

पुरे श्रुतं मया एतं माता कालगता मम ।
नैवाहं शक्तो भेष्यामि देवेन विना जीवितुं ॥
यथा आरखकं नागं पृष्ठतो न्वेति पायको ।
एवं ते अन्वयिष्यामि आदाय तव सुंभकं ॥

1. B °hi naḥ saṁ°. — 2. BM náhaṁ káko ca du ° sam aṁnvagá(M °gáḥ) | . — 3. M shashṭhiṁ pá°. — 4. B °hi | rá°. — 5. M °dyaivaṁ pra°.

6. B °hi tat saṁga° M °hi naḥ saṁ°. — 7. BM náhaṁ káko ca du° B °rmedhá | ká° M °vasam anvagát | . — 8. B shashṭhi ni° M shashṭhiṁ dhá°. — 9. B °dyáma rá°. — 10. M °çushe | .

11. BM °hi naḥ saṁ°. — 12. BM náhaṁ káko ca du° M °vasam a°. — 13. B *passe les lignes* 13-17. M shashṭhiṁ ni°. — 14. M °ryántayámi°. — 15. M °dyaivaṁ pra°.

16. M °hi naḥ saṁ°. — 17. M náhaṁ káko ca du°. — 19. BM pare°. — 20. M °haṁ çlakshamishyá° B °haṁ çaktihishyámi°.

21. M °to nvaṁ páyake | . — 22. B °shyámishyámi ádáya ca suṁ° M °dáya suṁbhakaṁ tathá || .

अथ खलु भिक्षवो राजा अरिन्दमो अमात्यपारिषद्यां गाथाये अध्यभाषे ॥

यथा सामुद्रिकां नावां वाणिजान धनार्थिनां ।
मकरो तत्र पाटेय वाणिजा व्यसनं गता ॥
मा वयं अन्तरायं करोम . . . . . . मम ।
. . . . . . . . . . . . . . . . . . . .
इमं कुमारं गृह्णीत्वा दीर्घायुं राष्ट्रवर्धनं ।
क्षिप्रमन्तःपुरं नेथ प्रासादं रतिवर्धनं ।
तत्र तं च रमेष्यन्ति देवकन्योपमा शुभा ॥
ततो कुमारं गृह्णित्वा महामात्रा यशस्विनः ।
महता राजानुभावेन प्रविशेन्सु मिथिलां पुरीं ॥
ततो खु एका उत्थाय राजकन्या अलंकृता ।
आमुक्तमाल्याभरणा राजानमेतमब्रवीत् ॥
तं नो ब्रवीहि गन्धर्वो शक्रो वासि पुरंदरः ।
राजानत्तीं ते पृच्छामि . . . . . . . . ॥
कथं त्वमस्माञ्जहासि राज्यं स्फीतमकण्टकं ।
दीर्घायुं कुमारं तथा सामात्यं सधनधान्यकं ॥

अथ राजा तां राजकन्यां आह ॥

देवो न नागो न गन्धर्वो न शक्रो न पुरन्दरः ।
मानुषो हं उत्त्रस्तो कामेषु श्रुत्वा [410a] ऋषेरनुशासनीं ॥
माहं काको व दुर्मेधो कामानां वशमन्वगा ।

1. M °anindamo° B °tyaparipadyaṁ ga° M °shadyaṁ gâ°. — 2. B °drikânâ vâṇi° M °drikâ nâvâ vâṇijâ ° rthinâ | . — 3. M °tra potedyaḥ vâṇijâṁ vyasavaṁ gataḥ | B °tra ghaṭeyo vâ ° gato | . — 5. B mâ ayaṁ° M mâ iyam antarâyaṁ mama imaṁ ku° B °roma mama imaṁ | ku°.

6. B *omet ce vers.* — 8. BM tatra te ca ramishya° M °devakaṁnyo° BM °pamo çu°. — 9. B °gṛihnitvâ° M °gṛihnitvâ°. — 10. B °râjanu ° çetsu mithilâyâṁ pu° M °çetsu mathurâṁ puriṁ | .

11. M °ekâm utthâ °jakaṁnyâ alaṁkṛitâḥ || B °jakaṁnyâ araṁkṛitâ | . — 12. BM °muktâmâ°. — 13. B na vo bra° M na no bra° BM °vimi gandharvâ çakro vâ sapuraṁdaraḥ | . — 14. BM râjânatti te(M °tti ta) pṛicchâmi ka°. — 15. M kathaṁ asmâṁ jahâshyasi || râjyaṁ° B °smâjjahâsi | râjyaṁ ca sphitaṁ ca makaraṇḍakaṁ | M °kaṇṭhakaṁ.

16. M °kumâra tathâ sâmânyâdha° B °dhânyaṁ || . — 17. B °jakaṁnyâṁ° M °kanyâm âha || . — 18. BM devâ na va nâgo na vâ gandha°. — 19. M °haṁ ca uttrastho kâ° B °trastho kâ° M °ṛisha bhartuḥ sâçreṇi || B °she bhatuḥ çâseni nâ° — 20. BM nâhaṁ kâko ca du° M °rmedhâ kâ ° vasam anvagât.

अद्यैव च कुर्यादिष्टं को जाने मरणं श्वे ।
न हि न संगतं तेन बहुसैन्येन मृत्युना ॥

इत्युक्त्वा स च राजा तस्यैव श्रोणकस्य ऋषेरन्तिकात्प्रव्रजितः ॥

भगवानाह ॥ तत्किं मन्यध्वं भिक्षवो अन्यो सो तेन कालेन तेन समयेन श्रोणको नाम ऋषिरभूषि न खल्वेतदेवं द्रष्टव्यं । तत्कस्य हेतोः । अहं स तेन कालेन तेन समयेन श्रोणको नाम ऋषि अभूषि ॥ नान्यो राजा अरिन्दमो द्रष्टव्यो । अयं सो राजा श्रेणियो बिम्बिसारो ॥ तदापि एषो यो अस्य श्रोणकं कथेसि तस्य विपुलो दायो दिन्नो । इदानीं पि एतेन पुरोहितपुत्रस्य विपुलो दायो दिन्नो मम बुद्धस्य वर्णं कथेसि इति ॥

अरिन्दमराजजातकं समाप्तं ॥

इदमवोचद्भगवानात्तमना च देवासुरगरुडकिन्नरमहोरगा सा च सर्वावती पर्षत्ते च भिक्षवो भगवतो भाषितमभ्यनन्दन् ॥

इति आर्यमहासांघिकानां लोकोत्तरवादिनां पाठेन इति श्रीमहावस्तुअवदानं समाप्तं ॥

---

ये धर्मा हेतुप्रभवा हेतुन्तेषां तथागतो ।
ह्यवदत्तेषां च यो निरोधो एवंवादी महाश्रमणः ॥

---

1. M adyaivaṁ ca kuryyâdiptaṁ ko yâne° B °dyaiva kuryâd âptaṁ ko° M °çubhaṁ | . — 2. BM na hi taṁ saṁga° M °tena mahâsai°. — 3. M ityuptkâ sa° B ityuktvâ(ou ptkâ) sa ° syaiva çrâvakasya risher antikân pravra° M °ntikâṁ pravrajito || . — 4². M °manyedhve bhi° B °manyadhva bhi ° ṛishir na kha ° drashṭhavyaṁ ta°.

6. M °aninda°. — 7¹. M °yo biṁbiçâro B °ro ta°. — 8. B °dinnâ mama bu ° rṇṇaṁ kaṇḍami iti || M °rṇṇaṁ kathayam iti || . — 10. M iti çrîmahâvastuavadâne aninda° B °ptaṁ || samâptâ cet mahâvastuavadânaṁ || ârye ma° (*l.* 13).

11. M °ttamanâ ye ca de ° ndan iti || âryyama°. — 13. B ârye mahâ° M °dinâṁ pâthena iti çri° B °ṭhena || ye° (*l.* 15). — 15. M °gataḥ | B °gato hya°.

16. B °rodha e° M °rodhaḥ e ° çravaṇaṁ || .

Les manuscrits ajoutent le colophon suivant :

यः शृणोति मुनेर्धर्मं श्रुत्वा चाभिनिवेशति ।
सर्वपापविनिर्मुक्तो स गच्छति सुखावतीं ॥
श्रद्धया श्रोतव्यं तस्मात्सुगतस्यायं सुभाषितः ।
नानाविदर्शनैः तैस्तैः जिनेन भाषितः पुरा ॥
सो यं सुभाषितं भक्त्या सुगतस्यानुभावतः ।
मया संपूर्णलिखितं कैवल्यवर्त्मदेशकः ॥
अतो यं मम पुण्यं स्यात्सर्वकिल्बिषनाशनं ।
अपायद्वारनाशार्हं बोधिमार्गोपदेशकं ॥
तेन पुण्यानुभावेन सर्वभूतानि सर्वशः ।
सर्वक्लेशविनिर्मुक्ता प्रयान्तु हि सुखावतीं ॥
ये सत्वाः अन्धा काणा च तथा कुब्जा विचित्रका ।
अन्ये पिपासिताः क्षुब्धाः सर्वदुःखनिपीडिताः ॥
तेन पुण्येन ते सर्वे सर्वसुखसमन्विता ।
विविधा भोगा संभुक्ता लभन्तु मोक्षमव्ययं ॥
षट्सु गतीषु ये सत्वाः मग्नाः जातिजराकुला ।
ते सर्वे मम पुण्येन भवन्तु बोधिमार्गगाः ॥
ये सत्वाः बालजातीयाः सद्धर्मेण विवर्जिताः ।
पापेषु सततं सक्ताः रागद्वेषेण मोहिताः ॥
[410ᵇ] ते सर्वे मम पुण्येन भूयो जातिस्मरास्सदा ।
दानशीलादिसंयुक्ता चरन्तु बोधिचारिकां ॥
राजा भवतु क्षेमावान् चरन्तु मन्त्रिणो नये ।
वीरा भवन्तु सततं संग्रामे जितशत्रवः ॥

1. BM °mune dharmam̃ (M °rmmam̃) çru°. — 2. M °pápam̃ vi° B °rmuktá sa° M °kto suga°. — 3. M çrotavyam̃ çraddhayá tasmá° shitam̃ | . — 4. B °rçane tais taiḥ° BM °puráḥ ‖ . — 5. M °shito bhaktyá ° bháshitaḥ | .

6. BM °lyavatmade°. — 7. M °to yat mama puṇyena sarva° B °puṇya syá°. — 8. B °dválanásá° M °dváraṇásoham̃ bo°. — 10. BM °vinimuktá°.

11. M °satvá andhakánám̃ ca° B °andhakánám̃ ca° BM °citratá | . — 12. M °sitá kshubdháḥ sa° B °kshubdháḥ sa°. — 13. M °puṇyána te sarve bhavetsu sukhasamanvitáḥ | . — 14. BM °bhoga sam̃° M °bhuptká la°. — 15. M °magná játijalákule | B °kule | .

17. M °bárajátiye saddha°. — 18. M °shu çatato çakiyáḥ rá° B °satatá çaktáḥ° BM °gadveshe° M °hitá ‖ B °táḥ (*fol.* 410ᵇ) te°. — 19. B °bhúyá já° BM °smaras sadá | . — 20. BM °cárakám̃ | .

22. M °bhavatu sa ° çatrave ‖ .

काले वर्षन्तु मेघाश्च शस्यपूर्णा मही सदा ।
एतस्मै प्रणिधानेन यत्पुण्यं जायते शुभं ॥
तेन पुण्यानुभावेन भवेयं बोधिपारगः ।
संसारार्णवतीर्णाय देहिनां कुशलाय च ॥

शुभमस्तु सर्वदा ॥

श्रीमन्नेपालिके वर्षे विन्दुस्तनयहगते ।
मासे आषाढे शुक्लपक्षे पूर्णिमातिथिसंगमे ॥
उत्तराषाढसंयुक्ते योगे इन्द्रसमागमे ।
रवे वासरसंयोगे तस्मिं एव शुभे दिने ॥
श्रीनन्दाचार्येण स्वार्थं लिखितो यं सुभाषितः ।
श्रीमन्महामुने भक्त्या संपूर्णमगमच्छुभं ॥

ग्रन्थप्रमाणं श्लोक २५००० ॥

संवत् ८४२ आषाढमासे शुक्लपक्षे पूर्णमास्यां तिथौ उत्तराषाढानक्षत्रे इन्द्रयोगे आदित्यवासरेः ध्वकुट्टसिधयकाजुरो ॥ ललितपत्तनमहानगरेः न्यग्रोधरमहाविहारावासितवज्राचार्यकुलिसश्रीनन्दवेदेन स्वहस्तेन लिखितं शुभं ॥ सक्षो-यावजाचार्य श्रीगजेन्द्रवज्रयात चोस्तंविया ॥

शुभमस्तु सर्वदा ॥

यादृशी पुस्तकं दृष्ट्वा तादृशी लिखितं मया ।
यदि शुद्धमशुद्धं वा शोधनीयं महद्बुधैः ॥

शुभमस्तु सर्वदाकालं ॥

1. BM °pûrṇṇo mahî°. — 3. M° pâragâḥ ‖. — 5. M °dâ ‖ (*Fin du manuscrit.*) B *omet cette ligne.*

7. B °âshâḍhaçukle pû°. — 8. B uttrâshâ°.

11. B °pûrṇṇaṁm aga°. — 13. B °thau uttrâshâ°. — 14. *Ces dernières lignes, jusqu'à la fin, sont simplement transcrites, sans corrections.*

# COMMENTAIRE.

Page 1, ligne 3. — तस्य . . . अस्य, तस्यास्य, par une répétition dont les exemples sont fréquents ici.

Ligne 7 et suiv. — Cf. la version en prose, II, 425.

Ligne 13. — Même dans ce style si souvent abrupt, une lacune, que rien du reste n'annonce dans les mss., est ici certaine. Il faudrait au moins un demi-çloka annonçant que le roi donne un ordre.

Ligne 16. — अस्य, scil. *assa* = स्यात्.

Page 2, ligne 1. — Pour le rôle du purohita, il faut se reporter à la version en prose.

Ligne 8. — Ce sont les paroles du roi au prétendu brâhmane.

Ligne 15. — गच्छेयं, le potentiel dans la fonction de l'aoriste.

